७८—अनाशकायनम् इत्याचक्षते ब्रह्मचर्यसाधनवती न नश्यति, तस्मादनाशकायनमपि ब्रह्मचर्यमेव।.........अनशनात् अनशनात् अनाशकायनम्। छां०उ०भा०८-५-३

७९—अरण्यायनं ब्रह्मचर्यम्। अरण्यशब्दयोः अर्णवयोः ब्रह्मचर्यवतोऽयनात् अरण्यायनं ब्रह्मचर्यम्। ......तत् तत्र हि ब्रह्मलोके अरश्च ह वै प्रसिद्धो ण्यश्च अर्णवौ समुद्रौ। तत्रैव।

ABBREVIATIONS

१—ई० उ० भा०	ईशोपनिषद्भाष्यम्
२—ऐ० उ० भा०	ऐतरेयोपनिषद्भाष्यम्
३—क० उ० भा०	कठोपनिषद्भाष्यम्
४—के० उ० भा०	केनोपनिषद्भाष्यम्
५—छां० उ० भा०	छान्दोग्योपनिषद्भाष्यम्
६—जय०	जयमङ्गला
७—तै० उ० भा०	तैत्तिरीयोपनिषद्भाष्यम्
८—निरु०	निरुक्तम्
९—पा० अ०	पाणिनीयाष्टाध्यायी
१०—प्र० उ० भा०	प्रश्नोपनिषद्भाष्यम्
११—बृ० उ० भा०	बृहदारण्यकोपनिषद्भाष्यम्
१२—ब्र० सू० भा०	ब्रह्मसूत्रभाष्यम्
१३—भ० गी० भा०	भगवद्गीताभाष्यम्
१४—मां० उ० भा०	माण्डूक्योपनिषद्भाष्यम्
१५—मां० का० भा०	माण्डूक्यकारिकाभाष्यम्
१६—मुं० उ० भा०	मुण्डकोपनिषद्भाष्यम्
१७ वि० सं० भा०	विष्णुसहस्रनामभाष्यम्
१८—श्वे० उ० भा०	श्वेताश्वतरोपनिषद्भाष्यम्
१९—स० सु० भा०	सनसुजातीयभाष्यम्
20. E.Y.	S. Verma, Etymologies of Yaska, Hoshiyarpur 1963.

पातञ्जल महाभाष्य में शब्द-विमर्श

डा० वैद्यनाथ झा *

भगवान् पतञ्जलि का व्याकरण शास्त्र के इतिहास में एक विशिष्ट तथा सम्मान्य स्थान है। पाणिनि की अष्टाध्यायी पर लिखित इन का भाष्य अपनी प्रौढ़ता एवं गरिमा के कारण 'महाभाष्य' के नाम से विख्यात है। भारत के प्रसिद्ध शंकराचार्य, कुमारिल, प्रशस्तपाद, मण्डन, वाचस्पति आदि किसी भी आचार्य का भाष्य 'महाभाष्य' के नाम से प्रख्यात नहीं है। इससे आचार्य पतञ्जलि की महत्ता स्पष्ट सिद्ध होती है। इन्होंने, अपने महाभाष्य में पाणिनि के सूत्रों की व्याख्या के प्रसङ्ग में उन सूत्रों पर उठने वाली सभी शङ्काओं का समाधान किया है और आचार्य पाणिनि को 'प्रमाणभूत आचार्य' कह कर अत्यधिक गौरव प्रदान किया है। 'वृद्धिरादैच्' (१।१।१।) सूत्र के व्याख्यान में (आ० ३) इन्होंने पाणिनि के सूत्रों के प्रत्येक अक्षर को सार्थक बतलाते हुए कहा है—

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन[1] भवितुम्, किं पुनरियता सूत्रेण ?" (पा० महा०)

इस तरह पाणिनि के सूत्रों का विस्तृत एवं प्रामाणिक व्याख्यान लिखने के कारण आचार्य पतञ्जलि का नाम संस्कृत साहित्य के इतिहास में अजर एवं अमर है।

इनके महाभाष्य के अध्ययन करने से इनमें शब्द सम्बन्धी महत्त्वपूर्ण विचार उपलब्ध होते हैं।

सर्वप्रथम ग्रन्थ के आरम्भ में 'अथ शब्दानुशासनम्' पद की व्याख्या करते हुए 'केषां शब्दानाम् ?' यह प्रश्न उठा कर 'लौकिकानां वैदिकानां च' यह उत्तर देते हैं। इससे शब्द के प्रथमतः दो रूप सिद्ध होते हैं—(क) वैदिक और (ख) लौकिक

* संस्कृत विभाग, बिहार विश्वविद्यालय, एल० एस० कॉलेज, मुजफ्फरपुर

१—'···वर्णेनैकेनाप्यनर्थकेन ···' पाठान्तर।

(संस्कृत)। ब्राह्मणग्रन्थों में इन दोनों का उल्लेख 'दैवी' और 'मानुषी' शब्द से तथा यास्क के निरुक्त एवं पाणिनि के सूत्रों में 'छन्दस्' 'अध्याय' और 'भाषा' शब्द से प्राप्त होता है।[२] पर ये दोनों अवान्तर भेद हैं, मौलिक नहीं। अतः भाषा-भेद के प्रयोजक नहीं हो सकते। इसीलिए जैमिनि के मीमांसासूत्र (१।३।३०) की व्याख्या में शबरस्वामी ने लिखा है—

"य एव लौकिकास्त एव वैदिकास्त एव च तेषामर्थाः।"

अर्थात्—जो शब्द लौकिक हैं वे ही वैदिक हैं दोनों के अर्थ में भी कोई अन्तर नहीं है। अतः दोनों भाषा एक ही संस्कृत है, दोनों में कोई भेद नहीं।

इसीलिए आज कल भी 'देवभाषा' शब्द से दोनों का ग्रहण किया जाता है। जैसे हिन्दी भाषा 'पृथ्वीराज रासो' ग्रन्थ के समय से लेकर वर्तमान समय तक काव्य प्रयोग तथा प्रान्तभेद से वाग्व्यवहार आदि के कारण अवान्तरभेद युक्त होने पर भी एक ही हिन्दी भाषा समझी जाती है, वैसे ही वैदिक एवं लौकिक—दोनों भाषा अवान्तर भेद युक्त होते हुए भी एक संस्कृत शब्द से ही गृहीत होती हैं।

भाषा के अर्थ में 'संस्कृत' पद का सर्वप्रथम प्रयोग आदिकवि महर्षि वाल्मीकि कृत 'रामायण' में उपलब्ध होता है। लंका में भगवती सीता से वार्तालाप के सम्बन्ध में विचार करते हुए हनुमान जी कहते हैं—

"अहं ह्यतितनुश्चैव वानरश्च विशेषतः।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति॥[३]

(सुन्दर का० ३०।१७-१८)

२–दे० 'संस्कृतस्यादिभाषात्वम्' (मेरा लेख), 'मनीषा' १९७७ ई०, सं० वि० वि०, दरभंगा।

३–'मानुषी' संस्कृतां वाचम्=साधारणमानवैः व्यवह्रियमाणां लोकभाषां संस्कृतवाणीम्, द्विजातिरिव संस्कृतां वाचम्=वेदविद् द्विजातिरिव (ब्राह्मण इव) वैदिक संस्कृतभाषां प्रदास्यामि=प्रयोक्ष्यामि, इत्यर्थः।

इस तरह सिद्ध होता है कि भगवान् पतञ्जलि ने जो वैदिक और लौकिक— इन दोनों भेदों का उल्लेख किया है वह अवान्तरभेद की ही दृष्टि से, न कि मौलिक भेद की दृष्टि से; जैसा कि ऊपर के विवेचन और शबरस्वामी के कथन से स्पष्ट हो जाता है ।

भगवान् पतञ्जलि ने अपने 'महाभाष्य' के आरम्भ में ही "अथ शब्दानुशासनम्" की व्याख्या के प्रसङ्ग में, शब्द के स्वरूप पर विस्तृत विचार उपस्थित किया है । इस सम्बन्ध में विचार करते हुए उन्होंने प्रश्न उठाया है कि "अयं गौः" यहाँ प्रत्यक्षज्ञान के विषय व्यक्ति, गुण, क्रिया और आकृति में किसे 'गो' शब्द से बोध्य समझा जाय ?

क्या जो गलकम्बल, पूँछ, ककुद, खुर और सींग वाला पदार्थ (अर्थात् पशु-व्यक्ति) है, वही शब्द है ? नहीं, वह तो द्रव्य है ।

तो क्या गलकम्बलादिमान् पदार्थ द्रव्य (गोव्यक्ति) का अपने शरीर-व्यापार द्वारा अभिप्रायों का संकेत करना, चलना-फिरना, आंख मूँदना तथा खोलना आदि ही शब्द है ? नहीं, वह तो क्रिया है ।

तो उस गोव्यक्ति का जो शुक्लत्व (श्वेतता), नीलत्व (नीलापन), कृष्णत्व (कालापन), कपिलत्व (कैल होना), तथा कपोतत्व (चितकबरापन) है, क्या वह शब्द है ? नहीं, वह तो गुण है ।

तब उस गो व्यक्ति का (सभी गायों में सदा रहने वाला) जो एक मात्र गोत्व है, जो कि पृथक्-पृथक् गोव्यक्तियों में सामान्यरूप से देखा जाता है एवं गोव्यक्तियों के छिन्न-भिन्न होने पर भी जो स्वयं अच्छिन्न रहता है, वह शब्द है क्या ? नहीं, वह तो आकृति (जाति) है ।

अन्त में आक्षेपकर्ता प्रश्न करता है कि 'आखिर शब्द किसे कहा जाय ?' समाधानकर्ता उत्तर देता है कि—

'जिसके उच्चरित (अभिव्यञ्जकवर्णों से प्रकाशित) होने पर गलकम्बल, पूँछ, ककुद (डील), खुर और सींग वाले पशुव्यक्ति का ज्ञान होता है, वह शब्द है ।'

अथवा—साधारणतया लोकव्यवहार में प्रचलित पदार्थ के बोधक रूप से प्रसिद्ध वर्णरूप ध्वनिसमुदाय ही शब्द है।[४]

इसके बाद व्याकरणाध्ययन के प्रयोजन का वर्णन करते हुए उन्होंने शब्द के परिवर्तित रूपों का उल्लेख किया है। भाषा के प्रवाह के कारण कालक्रम से एक ही शब्द के अनेक विकृतरूप हो जाते हैं। जैसे एक ही गो शब्द के गावी, गोणी, गोता, गोपोतलिका इत्यादि अनेक विकृत (असाधु) रूप चल पड़ते हैं। इसी तरह 'हे अरयः' की जगह 'हे अलयः'[५] का प्रयोग भी वाग्व्यवहार में आ जाते हैं। पतञ्जलि के समय में एक ही शब्द के अनेक अपभ्रंशरूप प्रचलित थे जिन्हें वे 'अपभ्रंश' 'अपशब्द' (असाधु) 'म्लेच्छ' (संस्कृत व्याकरण की दृष्टि से भ्रष्ट अतएव निन्दनीय) आदि कहतेहैं—

"भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति। एकैकस्य हि शब्दस्य बहवो-ऽपभ्रंशाः। तद्यथा-गौरित्यस्य शब्दस्य गावी, गोणी, गोता, गोपोतलिके-त्यादयो बहवोऽपभ्रंशाः।"

"तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छि-तवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः।"

"शब्देनैवार्थोऽभिधेयो, नापशब्देनेति।"[६]

४—"अथ गौरित्यत्र कः शब्दः ? किं यत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ?, नेत्याह; द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः ?, नेत्याह; क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः ? नेत्याह; गुणो नाम सः। यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्य-भूतं, स शब्दः? नेत्याह; आकृतिर्नाम सा। कस्तर्हि शब्दः ? येनोच्चरितेन सास्ना-लाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति, स शब्दः अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः' इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।" (व्याकरणमहाभाष्य, पस्पशाह्निक)

५—इसी तरह 'यद्वानः' के स्थान में 'यर्वाणः' तद्वानः' की जगह 'तर्वाणः' आदि असाधु शब्द भी प्रयोग में आ गये।

६—व्याकरण महाभाष्य, पस्पशाह्निक। [स्पशबाधनस्पर्शनयोः (भ्वादिः), स्पर्शनं ग्रन्थनम्, तस्माद् यङ्लुकि कर्त्तरि पचाद्यच् पस्पश इति सिद्ध्यति।]

इन उद्धरणों के अनुशीलन से ज्ञात होता है कि पतञ्जलि के समय में एक ही शुद्ध शब्द के अनेक अपशब्द व्यवहार में आ गए थे। अतएव साधु शब्द की तरह उन अपशब्दों से भी अर्थबोध धड़ल्ले से होता था। पतञ्जलि ने इस का भी संकेत—

"समानायामर्थावगतौ शब्देन चापशब्देन च। तत्र धर्मनियमः क्रियते—शब्देनैवार्थोऽभिधेयो नापशब्देन। एवं क्रियमाणमभ्युदयकारि भवति।"[७]

इन पंक्तियों में किया है।

इसका तात्पर्य यह है कि यद्यपि व्यवहार में अर्थबोध साधु एवं असाधु—दोनों प्रकार के शब्दों से होता है, तथापि साधु शब्द के ही प्रयोग से धर्म होता है, और असाधु शब्द के प्रयोग से अधर्म। 'वैयाकरणभूषणसार' में कौण्डभट्ट ने भी यही बात कही है—

"वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।"[८]

भाषा के प्रवाह की गति बड़ी ही विचित्र होती है। वह नदी की तरह स्वतन्त्ररूप से बढ़ती ही रहती है, रुकती नहीं। फलतः एक ही भाषा के धातु, शब्द आदि कालक्रम से देश विदेश में नियत हो जाते हैं। जैसे गमन अर्थ में 'शव' धातु का प्रयोग 'कंबोज' देश में ही प्रचलित है, आर्य लोग इस धातु का 'शव, (मुर्दा) अर्थ में प्रयोग करते हैं। इसी तरह गमन अर्थ में 'हम्म' धातु सौराष्ट्र में ही प्रयुक्त है, 'रंह' धातु पूर्व और मध्यप्रदेशों में प्रचलित है। पर आर्य लोग गमन अर्थ में 'गम' धातु का ही प्रयोग करते हैं, 'हम्म' तथा 'रंह्' का नहीं। 'काटना' अर्थ में 'दाति' (दो=दा+क्तिच्) शब्द पूरबी देशों में तथा 'दात्र' (दो=दा+ष्ट्रन्) शब्द उत्तरी देशों में प्रयुक्त हैं। भगवान् पतञ्जलि ने प्रान्तभेद से भाषा के बदलते हुए इन रूपों का निर्देश अपने 'महाभाष्य' में इस तरह किया है—

"शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्यमेषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।"[९]

इनके पूर्व भगवान् यास्क ने भी अपने निरुक्त में भाषा के इन रूपों का उल्लेख किया है—

७—व्याकरण महाभाष्य, पस्पशाह्निक

८—वैयाकरणभूषणसार, कारिका ३८

९—व्याकरण महाभाष्य, पस्पशाह्निक ['सर्वे देशान्तरे' (वार्तिक) का व्याख्यान]

"शवतिर्गतिकर्मा कम्बोजेषु एव भाष्यते। विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।"[१०]

भाषा के प्रवाह से न केवल शब्द का प्रयोग देश-भेद से अर्थविशेष में नियत हो जाता है, अपितु अर्थ में भी अन्तर हो जाता है। उदाहरणार्थ 'अरण्यानी' शब्द ले सकते हैं। यह शब्द 'अरण्यस्य पत्नी' इस अर्थ में यास्काचार्य के समय में प्रचलित था, जैसा कि उन्होंने लिखा है—

'अरण्यानी-अरण्यस्य पत्नी' (निरुक्त ९।३।८)

यहाँ पत्नी शब्द की व्याख्या करते हुए दुर्गाचार्य ने लिखा है—

"पत्नी पालयित्री देवतेति।"

इस तरह 'अरण्यानी' शब्द का "अरण्य का पालन करने वाली, अर्थात् वन-देवता"—अर्थ सिद्ध होता है।

किन्तु पुंयोग में 'अरण्यानी' शब्द का व्युत्पादन करने वाले भगवान् पाणिनि ने "इन्द्रवरुण भवशर्व···" (पा० सू० ४।१।४९) इत्यादि सूत्र में 'अरण्य' शब्द का उल्लेख कर यास्काचार्य के अर्थ (अरण्यस्य पत्नी) का ही समर्थन किया है। पर आचार्य शाकटायन के "हिमारण्याद् गुरौ" (१।३।५७) इस सूत्र के, तथा "हिमारण्ययोर्महत्त्वे" (कात्यायन) इस वार्तिक के अनुसार 'अरण्यानी' शब्द का अर्थ 'विशाल जंगल' और 'हिमानी' का अर्थ 'वर्फ का समूह (ढेर)' होता है। इस तरह इन दोनों शब्दों के अर्थ में परिवर्तन स्पष्ट हो जाता है। यह परिवर्तन समय के भेद से हुआ है।

विचार करने पर प्रतीत होता है कि प्राचीन समय में विशालवन को ही 'अरण्य' और उपवन (छोटे-छोटे वन) को 'अरण्यानी' कहा जाता था। 'दण्डकारण्य' 'नैमिषारण्य' आदि शब्द विशाल-वन के अर्थ में ही प्रयुक्त हैं। दण्डकारण्य के प्रसंग में "तेन तत्र महारण्ये मृगयां परिधावता[११]" इस (हनुमान की) उक्ति में दण्डकारण्य को स्पष्टरूप से 'महारण्य' कहा गया है। इसी तरह "सुरम्ये नैमिषारण्ये गोष्ठीं चक्रुर्मनोरमाम्[१२]" स्कन्द पुराण की इस पंक्ति के अनुशीलन से भी 'नैमिषारण्य' का

१०—निरुक्त २।१।

११—वाल्मीकि-रामायण, सुन्दरकाण्ड ३१।९

१२—स्कन्दपुराण सत्यनारायण कथा

महारण्यत्व सिद्ध होता है। क्योंकि असंख्य ऋषियों का निवास एवं सत्संग (गोष्ठी) उपवन में असंभव हैं। अतः कात्यायन ने 'हिम के ढेर' को 'हिमानी' और 'विशाल वन' को 'अरण्यानी' कहा है। इनका वार्तिक है—"हिमारण्ययोर्महत्त्वे" (इन्द्रवरुणभवशर्व..................." पा० सू० ४।१।४९ का वार्तिक) और उदाहरण है—

'महद् हिमं हिमानी, महदरण्यम् अरण्यानी'।

ऐसी स्थिति में यास्क के 'अरण्यस्य पत्नी' इस व्याख्यान में 'पत्नी' शब्द का जो 'पालयित्री देवता' रूप अर्थ दुर्गाचार्य ने किया है, वह भ्रममूलक प्रतीत होता है।

ऊपर के विवेचन से शब्द की परिवर्तनशीलता स्पष्ट हो जाती है। यह परिवर्तन भाषा के प्रवाह के कारण होता रहता है। भाषा के इसी अबाधगति-प्रवाह को महामुनि पाणिनि ने अपने सूत्रों के नियमों से नियन्त्रित किया। भगवान् पतञ्जलि ने अपने महाभाष्य में वर्णोपदेश की आवश्यकता बतलाते हुए "इष्टबुद्ध्यर्थश्च[13]" इस वार्तिक से यह बात सूचित की है। स्पष्टीकरण आगे इस प्रकार किया है—

"यानि तर्हि अग्रहणानि प्रातिपदिकानि, एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थं उपदेशः कर्तव्यः। शशः षष इति मा भूत्, पलाशः पलाष इति मा भूत् मञ्चको मञ्जक इति मा भूत्।[14]"

इस तरह भाषा के नियम-नियन्त्रित होने पर भी उच्चारण आदि के भेद से संस्कृत शब्दों के अनेक विकृत रूप चल पड़े, जिनसे प्राकृत आदि अनेक भाषाए उत्पन्न हुईं।

महामुनि भरत ने अपने नाट्यशास्त्र में इस बात का उल्लेख किया है—
"एतदेव विपर्यस्तं संस्कारगुणवर्जितम्।
विज्ञेयं प्राकृतं नाम नानावस्थान्तरात्मकम्॥" (१७ अ०)
एतदेव=संस्कृतमेव।

१३—व्याकरण महाभाष्य पस्पशाह्निक (वर्णोपदेशप्रयोजनाधिकरण)।

१४—व्याकरणमहाभाष्य; प्रदीप एवं प्रकाश (हिन्दी) टीका सहित, पृ० ७८

इसका अर्थ यह है कि संस्कृत शब्द ने ही, व्याकरण के संस्काररूपी गुण से वर्जित (व्याकरण-नियम की दृष्टि से असाधु) होने पर, अवान्तरभेद वाली अनेक प्राकृत भाषाओं का रूप धारण किया।

शब्द प्रयोग के क्षेत्र की व्यापकता बतलाते हुए महर्षि पतञ्जलि ने

"महान् शब्दस्य प्रयोगविषयः—सप्तद्वीपा वसुमती, त्रयो लोकाः चत्वारो वेदाः साङ्गाः सरहस्या बहुधाभिन्नाः, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाथर्वणो वेदः, वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः...।"[१५]

इत्यादि ग्रन्थ से शब्दों के मूल रूपों तथा उनके दिनानुदिन बदलते हुए रूपों ('ऊष' 'तेर' 'चक्र' और 'पेच'—इन के अर्थ में क्रमशः 'उषिताः' 'तीर्णाः', 'कृतवन्तः' और 'पक्ववन्तः' इन परिवर्तित रूपों) के अन्वेषण की आवश्यकता बतलाई है— "उपलब्धौ यत्नः क्रियताम् ।"[१६]

शब्द एवं अर्थ का सम्बन्ध नित्य या अनित्य है इसका भी विशद विवेचन "सिद्धे शब्दार्थसम्बन्धे"[१७] इस वार्तिक के व्याख्यान में भगवान् पतञ्जलि ने किया है, जहाँ शब्द, उनके अर्थ एवं उनके परस्पर सम्बन्ध को नित्य माना गया है—"सिद्धे शब्देऽर्थे सम्बन्धे चेति"।

अर्थात् शब्द, उनके अर्थ एवं उनके परस्पर सम्बन्ध को सिद्ध (नित्य) मान कर भगवान् पाणिनि का शास्त्र (शब्दशास्त्र) लिखा गया है।

इस तरह महर्षि पतञ्जलि के महाभाष्य में शब्द सम्बन्धी गम्भीर तथा विशद विवेचन उपलब्ध होता है, जो व्याकरण एवं भाषाविज्ञान--दोनों ही दृष्टि से महत्वपूर्ण है।

—०—

१५–व्याकरण महाभाष्य, पस्पशाह्निक, ("सर्वे देशान्तरे" वार्तिक)

१६– ,, ,, ("सर्वे देशान्तरे" वार्तिक)

१७–व्याकरणमहाभाष्य पस्पशाह्निक, प्रदीप एवं प्रकाश (हिन्दी) टीका सहित, पृ० ३४

जहाँगीरविरुदावली : एक परिचय

डॉ० जगन्नाथ पाठक

पाण्डुलिपिः—

हरिदेव मिश्र द्वारा विरचित 'जहाँगीरविरुदावली' की एकमात्र पूर्ण पाण्डुलिपि हमें प्राप्त हुई है। इसमें ४२ पत्र हैं। प्रत्येक पत्र पर छः पंक्तियां एवं प्रत्येक पंक्ति में प्रायः उनचालीस अक्षर हैं। ग्रन्थ के अन्त में लिपिकार ने लिपिकाल का निर्देश किया है, तदनुसार हरिपुर (दिल्ली) में मणिकण्ठ के पुत्र ने १७१२ वि० सं० (१६५५ ई०) में इस ग्रन्थ की प्रतिलिपि की थी।

पाण्डुलिपि प्रायः सुवाच्य है तथा पत्र अक्षत हैं। यत्र-तत्र कतिपय अक्षरों को पढ़ने में कठिनाई हुई है। लिपिकार ने सामान्यतः णकार के स्थान में नकार का तथा खकार के स्थान में षकार का प्रयोग किया है। श और स के प्रयोग में भी व्यवस्था नहीं, एवं 'च्छ' के स्थान में 'छ' मात्र है।

आफ्रेट के 'कैटलागस कैटलागरम' तथा 'न्यू कैटलागस कैटलागरम(मद्रास) में इस पाण्डुलिपि का उल्लेख नहीं है।

लेखक :—

ग्रन्थ के अन्त में 'पुष्पिका' इस प्रकार है—"इति श्रीहरिताम्रकुलकर्णपूर-मैथिलमयूरनवनारद-श्रीजहाँगीरकुलवन्दिष्यमान-श्रीहरिदेवमिश्रविरचिता विरुदावली सम्पूर्णा।"

हरिदेव मिश्र नाम से 'कर्णकुतूहल' नामक काव्य के रचयिता का निर्देश 'न्यू कैटलागस कैटलागरम' में है, जिन्होंने 'शृङ्गारसञ्जीवनी' नामक ग्रन्थ की रचना की है। शृं० सं० का प्रकाशन 'अकबरसाहिशृङ्गारदर्पण' के परिशिष्ट के रूप में हुआ है।[1] हरिदेव मिश्र को लेकर डॉ० पी० के० गोडे महाशय ने शोध-लेख भी लिखा है।[2]

● अनुसन्धान अधिकारी, गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ, इलाहाबाद

१--गंगा ओरियंटल सिरीज बीकानेर से १९४३ में प्रकाशित।

२--स्टडीज इन इण्डियन लिटरेरी हिस्ट्री II, पृ० २११.

इन हरिदेव मिश्र की समय-सीमा का निर्धारण गोडे महाशय ने १६५० से १७०० ई० के बीच किया है तथा 'शृङ्गारसञ्जीवनी' के अन्त में प्राप्त पद्य के अनुसार हरिदेव मिश्र नीलमणि का पौत्र तथा गौरीपति का पुत्र था। साथ ही, यह भी विदित होता है कि वह मथुरापुर में उत्पन्न होकर वहीं रहा और बाद में वाराणसी गया और लक्ष्मण चन्द्रदेव के आश्रित रहा।

परन्तु, प्रस्तुत 'विरुदावली' का लेखक हरिदेव मिश्र उपर्युक्त हरिदेव मिश्र से सर्वथा भिन्न है यह बात 'विरुदावली' की 'पुष्पिका' तथा अन्त के इस पद्य से स्पष्ट है—

तादृक्सप्तसहोदरैकवलभीमूर्द्धन्यरत्नाङ्कुर-
श्रीभाजं चरणं महीपतिगुरोर्नत्वा मया गुम्फिते।
ग्रन्थेऽस्मिन्मुदमञ्जतात् कुमुदिनी माताऽथ मातामहः
श्रीमानच्युतठक्कुरो जनयिता सन्मिश्रविश्वेश्वरः॥


इस पद्य के अनुसार मैथिल हरिदेव मिश्र के गुरु महीपति, माता कुमुदिनी, मातामह अच्युतठक्कुर तथा पिता विश्वेश्वर मिश्र थे।

लेखक द्वारा अपने मातामह (नाना) के रूप में निर्दिष्ट अच्युत ठक्कुर मिथिला के शासक महेश ठक्कुर (१५५६ ई० से राज्य-आरम्भ) के पुत्र थे। अच्युत ठक्कुर के तीन अन्य भाई थे—गोपाल ठक्कुर, परमानन्द ठक्कुर (१५८० ई० के बाद राज्य-प्राप्ति) और शुभङ्कर ठक्कुर (वैमात्रेय)। शुभङ्कर ठक्कुर का समय है १५७१ ई०—१६२० ई०। हरिदेव मिश्र के नाना अच्युत ठक्कुर के पुत्री मात्र हुई, जिससे हरिदेव मिश्र का जन्म हुआ।

हरिदेव मिश्र के वंश का नाम हरिताम्र (हरिअम्मय) है। यह मंगरौना मूलक वत्सगोत्रीय थे, ऐसा पञ्जी-प्रबन्ध से विदित होता है। हरिदेव मिश्र का समय यथासम्भव १५३५ ई० से १६२५ ई० के बीच निर्धारित किया जा सकता है।

काशीप्रसाद जायसवाल के निर्देशानुसार इनका गाँव वर्तमान 'जमथरि' है जो दरभंगा (बिहार) में झंझारपुर से पश्चिम चार मील पर है, किन्तु दरभंगा सं०

वि० वि० के एक शोधच्छात्र श्री शशिनाथ झा शर्मा उन्हें 'दीप' ग्राम का निवासी कहते हैं जो झंझारपुर से लगभग पूर्व दो मील पर है। उक्त शोधच्छात्र से प्राप्त हरिदेव मिश्र का वंश परिचय इस प्रकार है—



हरिदेव मिश्र के पिता विश्वेश्वर मिश्र वैयाकरण थे। उन्होंने म० म० भवनाथ झा द्वारा विरचित 'प्रयोगपल्लव' नामक व्याकरण ग्रन्थ पर 'पल्लवदीप' नाम की व्याख्या लक्ष्मण सं ४३६ (१५४५ ई०) में हरिदेव मिश्र के लिए लिखी थी—

"ल सं० ४३६ भाद्रवादित्रयोदश्यां बुधे दीपग्रामे श्री हरिदेवार्थं लिखितमिदं विश्वेश्वरेणेति।"

(प्रयोगपल्लव व्याख्या, दरभंगा सं० वि० की मातृका के आधार पर)

हरिदेब मिश्र ने जिन गुरु महीपति का निर्देश किया है वह उनके यथासम्भव सबसे बड़े भाई थे। महेश ठक्कुर के वंश में उत्पन्न म० म० कृष्ण सिंह ठक्कुर द्वारा लिखित 'खण्डवलाकुलदीपिका' नामक एक प्रकाशित प्राचीन ग्रन्थ से विदित होता है कि 'अच्युत ठक्कुर के दौहित्र हरदेव शर्मा और रघुदेव शर्मा 'दिल्लीपति पातिसाह' (जहाँगीर ?) के पास पहुँचे थे और मिथिला राज्य के तृतीय भाग का विभाजन

करा लाये थे। उन्हे 'पातिसाह' से ताम्र-पत्र भी प्राप्त हुआ था। जैसा कि मिथिला के 'पञ्जी-प्रबन्ध' से विदित होता है, पतिसाह' ने हरिदेव मिश्र को 'अविलम्ब-सरस्वती' और रघुदेव मिश्र को 'बुद्धिसरस्वती' उपाधि प्रदानकी थी (उपर्युक्त शोध छात्र द्वारा प्रदत्त सूचना के आधार पर)। 'खण्डवलाकुलदीपिका' के प्रासङ्गिक पद्य इस प्रकार हैं—

दौहित्रतामथ गतो हरदेवशर्मा तस्यानुजो बुधवरो रघुदेवशर्मा।
दिल्लीपतेर्नरमणेरथ पातिसाहात् राज्यं विभाज्य मिथिलात्म-
तृतीयभागम् ॥६६॥
आनिन्यतुस्तदवबोधि दलञ्च ताम्रं यत्प्रातिरूपकमिहौकसि मे दलञ्च।
सद्धारिताम्रकुलजाविह सोदरौ च विद्याविनोदरसिकौ शुभकर्मदक्षौ॥

मूल पाण्डुलिपि में यद्यपि 'वीरविरुदावली' और 'विरुदावली' नाम ही मिलते हैं किन्तु स्पष्ट रूप से यह सम्राट जहाँगीर की विरुदावली है यह ध्यान में रख कर प्रस्तुत काव्य का नाम 'जहाँगीर-विरुदावली' रखा गया है।

मिथिला में विरुदावली और प्रशस्तावली लिखने की अपनी एक विशिष्ट परम्परा थी। जहाँगीरविरुदावली के रचयिता हरिदेव मिश्र के अनुज रघुदेव मिश्र द्वारा लिखित एक अन्य 'विरुदावली' वाराणसी से प्रकाशित थी। यह विरुदावली प्रमाणों के आधार पर शाहजहाँ की प्रशस्ति में रचित सिद्ध होती है, इसमें संदेह नहीं। इसकी कुछ पाण्डुलिपियों की चर्चा आफ्रेट के संग्रह में तथा काशी प्रसाद जायसवाल द्वारा संगृहीत मिथिला की पाण्डुलिपियों की सूची में प्राप्त है। सौभाग्य से यह 'विरुदावली' भी पूर्ण रूप में हिन्दी साहित्य-सम्मेलन, प्रयाग के हिन्दी संग्रहालय (९२९।१४९१) में प्राप्त हो गई है इस पर कृष्णदत्त की व्याख्या भी यहां उपलब्ध हैं।

विरुदावलियां प्रायः एक ढंग से लिखी जाती थीं, जहां० विरु० में कलिकर्ण-कलिका', 'शोभनश्लोकाः' और 'वीरविरुदम्' के प्रयोग हुए हैं तो रघुदेव मिश्र ने भी अपने ग्रन्थ में कान्तकलिका २८। शूरश्लोक २८। वीर-विरुदानि २८ का प्रयोग किया है। हरिदेव मिश्र की भांति उनके अनुज रघुदेव मिश्र ने भी अपने पूर्वजों की

चर्चा की है तथा हरिदेव मिश्र को अपने 'ज्येष्ठ' के रूप में स्मरण किया है। ग्रन्थ के अन्त में लिखते हैं—

श्री विश्वेश्वरमिश्रतः कुमुदिनी देवी कुमारं कुला-
लङ्कारं समवाप यं गणपतिं गौरी गिरीशादिव ।
दौहित्रोऽच्युतठक्कुरस्य कृतिनः श्रीहारिताम्रान्वय-
श्रेष्ठोऽसौ रघुदेवबालककविर्वैदेहभूमण्डनः ॥
विद्याहृद्यसुखं महीपतिमथ श्रीबुद्धिनाथं ततो
लक्ष्मीदेवकुलाधिदेवमहितं श्रीमोहन मोहनम् ।
नत्वा श्रीहरिदेवदेवजनुपं ज्येष्ठं वयोभिर्गुणैः
कृत्वेमां विरुदावलीमिह सदानन्देऽनुजे न्यस्तवान् ॥

'विरुदावली' एक विधा बन चुकी थी। 'साहित्यदर्पण' में इसे 'विरुदम्' कहा है, जो 'गद्यपद्यमयी राजस्तुति' होती है। किसी ने लिखा है—

'वर्ण्यनामाङ्कविरुदवर्णनप्रचुरोज्ज्वला ।
वाक्याडम्बरसंयुक्ता कथिता विरुदावली ॥'

इसी विरुदावली-परम्परा में रचित 'सुन्दरविरुदाली', 'राघवविरुदावली', 'माधवविरुदाली' (चित्रकवि-विरचिता) आदि विरुदावलियां मिथिला से प्रकाशित हो चुकी हैं।

प्रस्तुत रचना

'विरुदावली' मुगल बादशाह जहांगीर (मुहम्मद सुलतान सलीम) का यशोगान है। जहांगीर का राज्यकाल १६०५-१६२७ था। कवि ने सामान्य यशोगायक की भांति अपने आश्रयदाता की मुक्त कंठ से प्रशंसा की है।

कविता में अतिशयोक्ति का मात्रा से अधिक प्रयोग विषय की दृष्टि से अनुकूल ही प्रतीत होता है। साथ ही अनुप्रास-अलङ्कार के सफल गठन के कारण काव्य में चमत्कार उत्पन्न करने की क्षमता असमान्य रूप से आ गयी है ऐसा प्रायः अनुभव किया जा सकता है।

कवि ने 'विरुदावली' को 'त्रिशत्त्रिका' अभिहित किया है। कारण यह कि प्रस्तुत ग्रन्थ में बीच-बीच में 'कलिकर्णकलिका', 'शोभनश्लोकाः' 'वीरविरुदम्' इस 'त्रिक' का तीस बार निबन्धन किया गया है। प्रत्येक 'वीरविरुदम्' के साथ मूल पाण्डुलिपि में संख्या की भी सूचना है। ग्रन्थ के अन्त में कवि लिखता है—

"जय जय महाराज एकैककलिकाश्लोकविरुदात्मकत्रिकरचितविरुदावली निबद्धो लपनगवद्गुणाम्भोधिपुञ्जपारजिगमिषव [?] क इव न लज्जते महाकविः। यद्यपि नाम त्रिकस्य जातिपरनिर्देशमादिशन्तोऽर्वाचीनसमीचीनकवयो बहूनि पद्यानि समाचरन्ति तथापि पञ्चोपरित्रिंशदवधिकान्येव त्रिकानि द्विचतुःषट्दशकलान्येव विरुदानि द्वादशोपरिचतुःषष्ठिपर्यन्त एव, कला एव कलिकाः, तदेव देव चिन्तयामः।"

इन शब्दों में 'विरुदावली' को 'त्रिशत्त्रिका' अभिहित करने का कारण निर्दिष्ट है। किन्तु कहने की शैली स्पष्ट नहीं, अतः पंक्तियों के तात्पर्य-बोध में कठिनाई का अनुभव होता है।

'विरुदावली' का कला-पक्ष अपने आप में इतना पुष्ट है कि वह अलग से विचार के लिए एक विस्तृत निबन्ध की अपेक्षा रखता है। यत्र-तत्र सम्राट् जहांगीर के पराक्रम के वर्णन में ऐतिहासिक स्थानों का निर्देश मात्र है। कवि ने आगरा का वर्णन बड़ा मनोरम किया है। जहांगीर के युग में 'आगरा' संसार की एक अप्रतिम-नगरी के रूप में प्रतिष्ठित थी।[1]

'विरुदावली' का जो एक और आकलनीय वैशिष्टच है वह है विभिन्न छन्दों का सफल प्रयोग। कवि ने संस्कृत के प्रचलित छन्दों के प्रयोग के साथ प्रवर्तमान भाषा हिन्दी में प्रयुक्त होने वाले भी अनेक छन्दों का सफल प्रयोग किया है। यह भी पृथक् अनुसन्धान का विषय है। संस्कृत के किसी परवर्ती काव्य में इतनी विविधता के साथ छन्दःप्रयोग प्रायः देखने को नहीं मिलता है। एक ओर आनुप्रासिक ललित पदावली के प्रयोग से कवि ने संस्कृत भाषा से अनभिज्ञ आश्रयदाता को प्रसन्न

१—द्र० 'हिस्ट्री आफ जहांगीर' पृ० १२६, प्रो० बेनी प्रसाद, इण्डियन प्रेस इलाहाबाद, पञ्चम संस्करण।

करने का प्रयास किया होगा, दूसरी ओर उसने विविध छन्दों के प्रयोग द्वारा भी सभासदों के बीच विराजमान सुलतान (सुरत्राण) को चमत्कृत करने का प्रयास किया होगा ।

मुगलकाल में संस्कृत के विद्वानों और कवियों को बहुत प्रतिष्ठा मिली । अकबर महान् के आश्रय में 'अकबरीय कालिदास' के नाम से गोविन्द भट्ट सर्वाधिक प्रतिष्ठित हुए । भानुचन्द्र और सिद्धिचन्द्र ने कादम्बरी की प्रसिद्ध टीका लिखी । इसी प्रकार जहांगीर और शाहजहां के दरबार में भी अनेक विद्वानों और कवियों को आश्रय मिला । रसगङ्गाधर के रचयिता पण्डितराज जगन्नाथ ने अपने इन्हीं महनीय गुण-ग्राहक को 'दिल्लीश्वरो वा जगदीश्वरो वा' कहा था और इन्हीं के 'पाणिपल्लव-तल' में अपने 'नवीन वय' का यापन किया था ।[1]

रुद्र नामक एक दाक्षिणात्य कवि ने 'जहांगीरशाहचरित' नाम से उल्लासों में विभक्त एक गद्य काव्य नारायणशाह के पुत्र प्रतापशाह के आदेश से लिखा था ।[2] किन्तु इस रचना के कुछ विकीर्ण अंश ही नासिक में उपलब्ध हुए थे । रुद्र कवि ने 'राष्ट्रौढवंश महाकाव्य' की रचना १५९६ ई० में की थी ।

हिन्दी के प्रसिद्ध कवि केशवदास ने 'जहांगीर-जस-चन्द्रिका'[3] लिखी है । इस ग्रन्थ का विषय भी बादशाह जहांगीर का यशोगान है । जिस प्रकार 'विरुदावली' के आरम्भ में जहांगीर के द्वार पर अनेक देशों के राजाओं के विद्यमान रहने का निर्देश करते हुए कवि ने तत्तत् देशों की नामावली दी है उसी प्रकार इस ग्रन्थ में भी

१–द्रष्टव्य—द कंट्रीब्यूशन आफ मुस्लिम्स टू संस्कृत-डॉ० सत्यव्रत शास्त्री, इन्स्टिच्युट आफ इण्डोलाजी, दिल्ली १९७७ ।

२–द्रष्टव्य 'राष्ट्रौढवंशमहाकाव्य' की सी० डी० दलाल लिखित 'भूमिका' गायकवाड़ ओरियन्टल सिरीज, बड़ौदा १९१७ ई० ।

३–'केशव-ग्रन्थावली' खण्ड ३ के अन्तर्गत प्रकाशित, सं० विश्वनाथ प्रसाद मिश्र; हिन्दुस्तानी एकेडेमी, उत्तर प्रदेश, इलाहाबाद, १९५९ ई० ।

अनेक देशों के नाम दिये गये हैं, जो ऐतिहासिक दृष्टि से आकलनीय हैं—

गौर गुजरात गया गोड़वाने गोपाचल,
गंधार गखखर गूढ़ गायक गनेस के।
अरब अरैाक आबू आसेर अवध अंग,
आसापुरी आदि गांव अर्गल सुबेस के।
संभल सिंघल सिंधु सोरठ सौबीर सूर,
खंधार खुरेस खुरासान खान खेस के।
साहिन के साहि जहांगीर जू की सभा,
'केसौ राय' राजत हैं राजा देस-देस के ॥६६॥
रोहि रोहितास राठ रूम सामराज भूरि,
भखखर भरोंच भूरि भावते भूतेस के।
चीन चोल चित्रकूट चेद चंपानेर चारु,
पानीपथ पारसीक पर्वत प्रवेस के।
हैहय हरेवे हिंगुलाज हुर्मज हजारा,
दिली दीपघोखि गिरिनार द्रविडेस के।
साहिन के साहि जहांगीर जू की सभामध्य,
राजत हैं 'केसौराय' राजा देस-देस के ॥१००॥
कांमरू कनीज कच्छ कर्नाट कैकेय कुरु,
कासमीर कोसल कुमाऊँ कुंतलेस के।
कामबोज कुंकन कुनिंद अरु कुंतीभोज,
किरकीची कुल कोल केरल सुदेस के।
कुंडिन कुमार सोम सरमक सूरसेन,
बाहलीक साकल सकल निषधेस के।
तैलिंग तिलक विद्यानगर फिरंग सब,
साहिजू की सभा राजै राजा देस-देस के ॥१०१॥

मालव मेवार मुलतान मारु सल्लिवार,
माथुर मगध मच्छ मेवान महेस के ।।
वलक वलोच वंग बंगाल वरार विंध्य,
वालुका विहार धार वर्बर कुवेस के ।।
साहिन के साहि जहांगीर साहिजू की सभा,
'केसौ राय' राजत हैं राजा देस-देस के ।।१०२।।

'जहांगीरविरुदावली' की पाण्डुलिपि डॉ० मुरलीधर पाण्डेय (प्रवाचक, रणवीर केन्द्रीय संस्कृत विद्यापीठ, जम्मू तवी) के माध्यम से उदारचेता श्रीयुत प्रेमनाथ त्रिपाठी–ग्राम खटखरिया, पो० रामपुर ३८, थाना—करमा, जि० मिर्जापुर से प्राप्त हुई है। पाण्डुलिपि के लेखक श्री प्राणनाथ त्रिपाठी श्रीयुत प्रेमनाथ त्रिपाठी जी के पूर्वज थे। श्रीयुत प्राणनाथ त्रिपाठी के पिता का नाम था मणिकण्ठ त्रिपाठी, जिनके पुत्र के रूप में लिपिकार ने ग्रन्थ के अंत में सूचित किया है। मणिकण्ठ त्रिपाठी गोपालनाथ त्रिपाठी के सुपुत्र थे, जिन्होंने रघुवंश की 'इन्दिरा' नामक टीका लिखी थी। अपनी टीका में चतुर्थ सर्ग की समाप्ति पर श्री गोपाल त्रिपाठी लिखते हैं—

गोपालः सरुआरदेशधतुराग्रामात् सुनीराधिपः
संख्यावत्सु निसर्गभक्तिरसिकश्चक्रे रघोरिन्दराम् ।
शृङ्गारादिविजृम्भिताश्च सुमुखीं शब्दार्णवादुत्थितां
सेव्यां सर्वबुधैश्चराचरगुरोः पत्नीमिव प्रेयसीम् ।।

इति सरुआरदेशोद्भवत्रिपाठिखेदूपुत्रगोपालेन कृतायां रघुवंशकाव्यस्येन्दिराटीकायां चतुर्थः समाप्तः ।

'विरुदावली' का प्रस्तुत संस्करण सम्पादन की दृष्टि से विद्वानों को 'पुनराकलनीय' प्रतीत होगा, यह स्वीकार करते हुए हम इसे प्राथमिक प्रयास के रूप में प्रस्तुत करते हैं। और बड़ी विनम्रता के साथ विद्वानों द्वारा इसके संशोधन आमन्त्रित करते हैं। प्रायः समासगर्भित पदों के पृथक्करण में भ्रान्तियों की विशेष गुंजायश है। साथ ही ऐसे अनेक स्थल हैं जिनका सन्तोषजनक अर्थावगम मुझे नहीं हो पाया है। दूसरी पाण्डुलिपि के अभाव में इसके संशोधन में भी बड़ी कठिनाई हुई है।

हरिदेव मिश्र से सम्बद्ध सामग्री मुझे अपने मित्र डा० किशोरनाथ झा के सहयोग से उपलब्ध हुई है।

———

हरिदेवमिश्र-विरचिता

जहाँगीर-विरुदावली

[१]

[1]शरशङ्खशरासनचक्रचकासनचारुचतुष्टयबाहुमती
मधुरध्वनिकुण्ठीकृतकलकण्ठी कण्ठीरवगमना भवती ।
जय लोचनसङ्केतितजगदङ्के पङ्केरुहमुखि सुखितभवे
नवकज्जलवेषे धृतविधुलेखे महिषमतङ्गजसिंहि शिवे ।।

[२]

जयति किल जम्भारिरिव सम्भावितशतकोटिर्न तु त्रोटितगोत्रपक्षः, हुताशन इव हेतिप्रकाशनस्फुरदुद्धतिर्न तु मलिनपद्धतिः, वैवस्वत इव सदैवसुतस्समाचरितदक्षिणदिगाश्रयो न तु वयोऽधिकेषु रुग्णेषु वा दर्शितपराक्रमः, दशमूर्द्धेव युद्धे बलीमुखावधूतशुभ्रांशुको न तु प्रांशुकोषपालितनरान्तको न तु देवान्तकः, पाशीव सर्वदा शीलितघनरसो न तु सोत्कण्ठः पश्चिमदिगालम्बने,मारुत इव चारुतरोनपञ्चास(श)द्भावसम्भावितशरीरोत्तमेन जिष्णुनाऽपि शातनीयाङ्गः, राजराज इव भ्राजदलकाङ्गनासुखदमुखचन्द्रमा न त्वेकमात्रमानसकृतप्रेमा, शम्भुरिव सम्भुक्तसर्वमङ्गलो न तु पराभिषङ्गलोलुपद्विरसनं दधानः श्रीसुरत्राणः । यः खलु भास्वानपि नास्वादितद्विजराजकरः, कलानिधिरपि न कुरङ्गवत्सलः;

१—इतः पूर्वं लिपिकर्त्रा 'श्रीगणेशाय नम' इति लिखित्वाऽऽरम्भः कृतः ।

यमाकर्ण्य कर्णमिव नवीनमम्बुजविलोचनोऽपि निजबाहुवर्गचतुरर्गलान्तरालसंवासमासादयति महालक्ष्मीम्[१]; येन जन्मनः प्रभृति परिपन्थिपृथ्वीपतिमिथुनमस्तकानां करवालकर्षणमधीतम्, यस्मै घनानुबन्धगन्धर्वनिकुरम्बसम्वर्द्धितस्वरूपसङ्गीतये शीतकरतरणिताटङ्कयुगलमवधुन्वती नित्यमेव स्पृहयति पुलोमजाऽपि; यस्माद् विसस्मार वीरविक्रमादित्यविरहवेदनां भगवती विश्वम्भरा; यस्य कीर्तिकेतकदृशौ (शोः?)लोचनकनीनिकेदमखिलमाकाशमण्डलम्; यस्मिन् जगदण्डदण्डधारिणि शशिमण्डलस्येव दोषानुषङ्गः।

[३]

अथ कथञ्चिदुल्लसितपाटलिम्नि भगवति पङ्केरुहामादिबान्धवे दिवान्धवेदनापरुषपांशुमुष्टिवत् प्रसरति सर्वतोऽरुणांशुकलापे, शुकलापेषदानमितनिद्रानिकुञ्चितैकदृशि नागरकदम्बके, कदम्बकेशराभिरामरोमाञ्चनिकूतकलेवरं कान्तमपसारयन्तीषु प्रगल्भखण्डितासु खण्डितासु, तिमिरकापालिकस्खलितरुद्राक्षमालिकामनोहारिणि क्वणति मधुकरमण्डले, समुचितं समयमासाद्य, किरात-कौरव--कलिङ्ग-कार्णाट-कुन्तल-कुभ्रू [लू?]त-कच्छ-काम्पिल्य-केकय-कामरूप-कोशल--कुरुक्षेत्र-काश्मीर--केरल-करुष--कुन्तिभोज--काम्बोज---कोङ्कण-कुशाम्ब-कलमाष-कीर-कान्यकुब्ज-कालञ्जर-खश-खुरशान--गुर्जर-गया-गोनर्द्द-गौड--गान्धार--चम्पकारण्य—चीन-चार्वाट-चेदि--चोल - त्रिगर्त-तेलङ्ग -दण्डका- दरद-दासेरक-दशार्ण-द्रविड-नेपाल--नैमिष-पुलिन्द-पञ्चाल-पाण्डच-पव्हर-प्रयाग-पञ्चनद-प्रभास-पुष्कर--प्राग्ज्योतिष-विदर्भ-वङ्ग-वाल्हीक-वर्द्धमान-मरु-मलय-मद्र-मारवार-

---

१—'लिपिकर्त्रा संवासमासादयति महालक्ष्मीमायेन' इति लिखितम् अत्र संवासमिति महालक्ष्म्या विशेषणत्वप्रदानेन किञ्चिदर्थबोधे सौविध्यं स्यात्। 'लक्ष्मीम्। येन' इति संशोधितमस्माभिः।

मगध-मोरङ्ग-मिथिला-माल-माण्डवी-मेकल-मथुरा-मत्स्य-महाराष्ट्र-
-शक-शूरसेन-सिन्धु-सौवीर-हूण-हस्तिनापुरप्रमुखदेशाधिपतयो राजान आजानुबाहवो महाहवोद्दण्डपाण्डवाश्चण्डवाहिनीचरचरणयन्त्रण-त्याजनायकम...राजेन[?]प्रेषितैरिव निजबालकैः फलकैरवलम्बितपृष्ठदेशाः केशादाचरणमतिनिश्चलाङ्गलतिकाविकाशितातिरुचिरचित्रलाक्षाः कक्षान्तरव्यस्तहस्तयुगलापदेशेन मनसि नियम-[य]न्त इव स्वामिभक्तीः प्रतीहारदेशमासेदुः ।

[४]

तदा चैकेन राज्ञा विज्ञापितोऽन्येन पुनरञ्चलेऽवलम्बितः परेण करे कलित इतरेण प्रत्यङ्गमालिङ्गितोऽपरेण चिबुके चुम्बितः कश्चन कुमारमागधो वागधोगतभुजङ्गाधिपः पातिसाहवरवीर-श्रीजहाँगीरप्रबोधनाय दक्षिणं करकमलमुन्नमय्य त्रिंशत्त्रिकां वीर-विरुदावलीं पल्लवयति स्म ।

[५]

उल्लासायतवास्तुपङ्कजवनीवैहासिकोऽयं पुरः
पौलोमीकुचकाञ्चनालकुसुमः स्मेराभिरामो रविः ।
यः पूर्व्वाचलमौलिमङ्गलमलङ्कुर्व्वन् गुणौघैर्भवत्-
तुल्यानुद्भवसप्रतिज्ञदिवसव्यालीढफालीयति [?]॥

[६]

जय मन्मथसुन्दर भूमिपुरन्दर कुन्दरदस्मित रङ्गरते जित-बङ्गपते ।

नवदर्पणगण्डलसन्मणिमण्डल चण्डललितकरिमत्तगते अरि-दत्तनते ।

शशिभावितयुद्धतया भृशमुद्धत शुद्धफलकनिभगुम्फविशोभितवदनविधो ।

मधुराधरपल्लव दलितविपल्लव गल्ल विसर्पिदृगन्तरुचे शुभदन्तशुचे ।

भ्रुकुटिस्फुरदञ्जनकुद्मनु (कुड्मल?) खञ्जन खञ्जनलोचन लोलगते चलचोलपते,

मुखचन्द्रविहारक निर्म्मलतारकहारकलितहृदयैकनभो हृदयङ्गम भोः ।

नखशम्बरवञ्चकसायकपञ्चकसञ्चककरतलतूणधृते हृतहूणपते ।

बलिपट्टमनोरमनाभिसुकूपकरूपजलाकृतिरोमलतेरितपाशतते ।
कचराहुनिपीतगलन्मुखशीतमयूखसुधायितरेखमनोहरपृष्ठतनो ॥
नलिनीगणजङ्गमकामविहङ्गमसङ्गमनाभिगभीरसरोलसदूरुतरों । शरणागतपञ्जर जितकालञ्जर कञ्जरचितपदपद्मविधे मणिसद्मनिधे ।

कवितामृतपुञ्जरसिक युवकुञ्जर कुञ्जरमितविलसद्युन (व?)ते गतमद्यमते ॥

कलिकर्णकलिका

[७]

जाने सङ्गीयमाने युवतिभिरभितो भूपरूपस्य बिन्दौ
दस्त्रौ जातावुदस्रौ मदनमधि रतेरप्युदासीनताऽऽसीत् ।
रम्भा दृष्टिं न सम्भावयति धनदजे किञ्च कर्त्तुं विलासान्नासासङ्कोचमासादयति बलरिपौ सा पुलोमात्मजाऽपि ॥

[८]

जगज्जयश्रियोऽभिरामरोमराजिकानिकामनव्यबाहुचण्डधाम-सम्भवद्यमस्वसा ।

विपक्षमण्डलप्रतापवह्निवारियुक्कलाप उल्लसज्जनानुताप-सिन्धुसेतुसन्निभा ।

स्फुटं यमस्य दुष्टजीवरोषरिङ्गदङ्गुलीव विस्फुरन्महःप्रदीप-दीपनैकवर्त्तिता (का?) ।

यशोऽरविन्दषट्पदालिराहवप्रसङ्गशालिशत्रुकुम्भिकुम्भपालि-सत्कटाहटङ्किका ।

महारणेऽपि तत्र तत्र भीतकालपीकलत्रचारुदृक्सहस्रपत्रमीलने तमश्छटा ।

किरातभूकुरङ्गदृष्टिलोचनैकवारिवृष्टिकारियुद्धयज्ञसृष्टिसुन्दर-स्रुवोद्भटा ।

विदर्भबङ्गकामरूपमद्रमारवारभूपसद्यशोविशुद्धरूपकम्बुकूट-शाणिका ।

निकामभीमकालिकेव नाकसीमबद्धसेव चाकसीति दिव्यदेव तावकी कृपाणिका ॥

शोभनश्लोकाः

[९]

जय जय शीरध्वजभुजधीर ध्वनिजितकीर द्रुतपरवीर स्फुट-करवीर प्रतिभटहीर प्रकटशरीर प्रसरदुशीर प्रचुरपटीर स्वकुलकरीर ।

वीरविरुदम् ॥१॥

[१०]

सुनयनतार स्फुरदवतार स्फुटमुपकारक्षयितनकार द्युतिजितमार त्रिदशकुमारव्रजसुकुमार प्रसरदुदार स्वरुचिरदार स्फुरदभिसार क्षितितलसार च्छुरितमसारच्छविगिरिसार ज्वलदसिधार प्रचुरतुषारद्युतिघनसारप्रतिनिधिहार प्रथितविहार प्रचलितचार प्रबलविचार त्रुटदभिचार प्रलमदपार क्षितिपतिभारस्फुरदुपहारक्षयितविकार द्युसदनुकार द्युतिमदगारस्थितपरिचारव्रज बहुवारप्रखरकुठार द्रवदिषुधार ॥

कलिकर्णकलिका

[११]

आलपामो मुहुष्पालपाधीश ते जालपालिस्थितो मालपा मे प्रियाः

याहि रे यत्र जीवस्युपालोकयत्युत्तरामेकदृग्दत्तरागः प्रभुः[?]।

वाहराजीमहाडम्बरव्यापृतौ साहिगाजीकुलालङ्कृतौ धावति।

तर्कयामस्तमां सम्भजेतापदं जं (यं?) भजेतापदं चेन्न तस्याश्रितः स्यात् ॥

[१२]

त्वद्बाहुर्वीरदर्वीकरपतिरुदयच्चण्डकोदण्डदण्ड-
व्याजभ्राजत्फणातिस्फुटघटितशरश्रेणिपुङ्खद्विजिह्वः
कुर्वाणः पानलीलां विपुलरिपुलसच्चक्रनिष्क्रामदायु-
र्वायोराशासु काशानिशविशदयशःकञ्चुकं मुञ्चति द्राक् ॥

शोभनश्लोकाः

[१३]

मत्तमातङ्ग सत्तमासङ्ग आगतानीन्द्र नागपारीन्द्र वीरशृङ्गार नीरभृङ्गार चिक्कणाकूत दृक्कणाहूत कामिनीशक्त यामिनीरक्त ॥

वीरविरुदम् ॥२॥

[१४]

जय युवतिकुचाप्तसम्पाकलिम्पाकसम्पातलम्पाकलुम्पाखिलं पातकं पाति चम्पाकसम्पातिझम्पानलं पाति पम्पाजलं पार्थिवानां गणस्ते भयात् ।

जगदपि यशसानुलिम्पानुकम्पाभरं पासि सम्पालयन् पापसम्पातनं पार्श्वगं पामरं पार्थिवं पालयन् पादसम्पातिचम्पारणादिक्षमावल्लभः ।

जगति मष(ख)शतेन सम्पावनं, पावकं पासि तं पानसम्पादितं पातकं पाटयन् पालिकम्पारिसम्पायिनं प्राशशम्पाशतं पातनं पालपेन्द्रानतः ।

त्वमसि निखिलशत्रुलुम्पी नकम्पी भुजं पीठसम्पीडकं पीवरं पीनयन् पीतिशम्पीयझम्पो वहन् पीतकं पोलुसंपीतचम्पीयभूपालसेनाशतः ।

तव जयति रणे सुपर्वाणामर्वा मुहुर्वाचमुर्वालसद्वालधिर्वाजिसर्वाजिनिर्वाहनिर्वागरिर्वातगर्वातिनिर्वाणकृच्छ्राणदुर्वारगुर्वाननः ।

त्वयि चलति चलो विधुर्वा रविर्वा कविर्वा सविर्वा सनिर्वासकृद्वाधिउ[?]र्वानिपर्वागिरिर्वासुकिर्वा नमद्वारिधिर्वातिनिर्वादिनिर्वापक ।

त्वयि चलति जपन्त्यथर्वाणि गीर्वाणगुर्वादिसर्वादिदुर्वाससोर्व्वागरिर्बाहुगर्वादखर्वाण्यदुर्वादनिर्झरचार्ब्बाटमर्वादिमुर्ब्बारवत् क्रन्तसि ।

क इव तव तुलां प्रकुर्वीत गर्वी जगद्वीथिगुर्वीतिचर्वी त्वमुर्वीशखर्वीकृतिर्वीतदर्वीकरोर्वीपतिर्वारगुर्वीयमुर्वी सुदुर्वीक्षणा युष्मदोजायितैः ।

जय जय जगतामलङ्कारसङ्काशशङ्काकलङ्कारिकङ्कालटङ्कासिकिङ्कारितं काविलं कातरं कातरं कारयन् काममङ्काहितं कामिनीरत्नमुल्लासयन् ।

जपति धरणिवल्लभं काननं कात्यहङ्कारपङ्कारुणं कामदं काष्ठसंक्रामदं काब्धिकं कातिरङ्काहितं कालसंकालकं कायकं कामयन्तं प्रभापल्लवैः ।

प्रविशति विगलत्करं कातिभङ्कारिभङ्कारितं कालरिंकालिसंक्रामितं काननं कामिनं का न संक्रान्यतङ्का गदं कारटं कारकं कार्मुकं चेदिहाकर्षसि ।

सुरपतिसमताकलङ्की नशङ्की नपङ्की सुटङ्कीकृतं कीरकीर्त्तितं कीलितं क्रीडितं कीदृशं कीर्तिपूरं न भूमण्डले सन्तनोति क्षमावल्लभः ॥

कलिकर्णकलिका

[१५]

भ्रमरसमरवलितललितकटकधरकसिन्धुरे
नलिनमलिनकरणचरणवदनमदनबन्धुरे ।
भवति चरति महति समिति नमति नृपतिमण्डली
दमितनमितशमितगमितसुतनुरतनुमण्डली ॥

[१६]

स्फारारम्भारारम्भे कुम्भे भणनभणनभणभणदलितरुणः
स्कन्धावन्धी लोलल्लोलद्रणनरणनरणरणदुरुरसनः ।
याति स्वैरं युष्मत्कुम्भी झणनझणनझणदनुपमनिगणः
स्त्रीभिः पृष्ठे गायन्तीभिस्तननतननतनतरलितनगरः ॥

[१७]

स्त्रीषु त्वं कुसुमायुधोऽसि दुरितोद्रिक्तेषु दण्डायुधो
हृन्मत्तेषु हलायुधो बलिविपच्चक्रे तु चक्रायुधः ।
क्षोणीभृच्छतपक्षविक्षतिविधौ वज्रायुधो न स्फुर-
त्यादर्शं कमिवारचय्य रचितो धात्रा धरित्र्याः पतिः ॥

शोभनश्लोकाः

[१८]

महितलमारार्थिततर समधिकसारार्पितशर
हृदमलहारार्दितपर तरुणिमतारार्चितहर ॥

वीरविरुदम् ॥३॥

[१९]

जय जय मतिपरिणामकलितहरिनामकदम्बक,
जय जय खरसुविरामविदित भुवि रामविडम्बक ।
जय जय परमनिकामरुचिरमणिकामधुरन्धर,
जय जय मरकतधामरसिकशतधामरबन्धुर ।
जय जय विहसितराम नयनवितरामनतिक्रम
जय जय नृपकलिवामनमितबलिवामनविक्रम,
जय जय पिशुनसभामनिखिलसुषमामणिदीपक,
जय जय कुलजनतामरसितसुलतामणिनीपक ।
जय जय शतदलदामललितदलदामयपत्तन,
जय जय मुनिवरसामसरसतरसामहिनर्तन ।
जय जय भुवनललामजनितसकलामरवन्दन,
जय जय रिपुविधुयामविदितविनयामलचन्दन ॥

कलिकर्णं रुलिका

[२०]

कमलमदमोचने तव चलति लोचने
दिवि हसते न का भुवि तु रमते न का ।
यदि नयनमर्व ते चलति गुरुगर्व ते
रिपव उरुपर्वते मशकमनुकुर्वते ॥

[२१]

रम्भास्तम्भानुकृत्या वरकरटियुवोन्मूलयत्यूरुयुग्मं
दन्तानुत्पाटच कर्णे कलयति स वरं श्लाध्यमाध्यभ्रमेण ।
पारीन्द्रोऽपि प्रबुद्धः क्रकचति कुचयोः कुम्भिनः कुम्भबुद्ध्या
वीर त्वद्वैरिणीनामपि घनविपिने दैवदृग्दारुणैव ॥

शोभनश्लोकाः

[२२]

कलितरण कलितरण महिमधुर महिमधुर वलितनय
बलितनय परमहित परमहित नमदयुत नमदयुत ॥

वीरविरुदम् ॥४॥

[२३]

श्रिया नाकलुण्ठा...करालः क्वणत्किङ्किणीचङ्क्रमालङ्कृतश्रीः ।
ध्रुवं चर्वयन् सर्वतः शर्वरीशं बलत्तारकस्तारमत्तान्धकारः ॥
मसीतत्यसीमातसीपुष्पनीलं दधत्कुम्भकूटस्फुटारम्भमम्भः ।
अहो यामुनं वारि किं वारिणं वा कलिन्दाचलं दारयद्यातमुर्वीम् ॥
घनानन्दनिष्यन्दमैरन्दवृन्दप्रणन्दन्मदस्यन्दसन्दर्भिकुम्भः ।
समीकाध्वरे रक्षिकाजालभाजा वसोर्द्धारयेवानुबद्धात्मभित्तिः ॥

ससिन्दूरबिन्दूदयद्दूरशुण्डः मदभ्रातिशुभ्राधिकभ्राजिदन्तः ।
नवाखण्डलोद्दण्डकोदण्डशाली बलाका निराकारयन् कालमेघः ।।
यमोद्दण्डदण्डाभशुण्डानुबद्धः शिखामूलतःस्थूललाङ्गूलनद्धः ।
यथैवोभयाशाहिपाशावकाशा महासुन्दरो मन्दरोऽमन्दरोचिः ।।
निजद्योतविद्योतितद्योतनाभ्रं दधच्चामरं धाम मुक्तामणीनाम् ।
निराधारसञ्चारसम्भारभाजा वियद्गङ्गयेवाङ्गमालिङ्गिताङ्गम् ।।
उदञ्चन्मदाम्भोतिसम्भोगलम्भोद्भटालिच्छटातिस्फुटाच्छादितद्यौः
वसत्येष मत्तेभयूथाधिपत्ये पवित्रातपत्रावृतस्थावनाकिम् [?]।।
महोत्तालमत्तालसत्तालशुण्डः सुनासीरनासीरनाशीरणेषु ।
कदा नारदानाय दानाम्बुधारो धराजन्यराजन्य राजाधिपस्ते ।।

कलिकर्णकलिका

[२४]

मुक्ताप्रस्तरनिस्थुषी करणिकाहेतोः कटः प्राङ्गणे
जागर्त्ति श्रुतिशूर्प्पनर्तनपरो युष्मद्गजग्रामणीः ।
स्फीतं यद्दशनप्रकाण्डमकृशक्रौञ्चावलीभृत्तट (टे?)
शुभ्राविर्भवदर्भहंसपटलप्रागल्भ्यमभ्यस्यति ।।

शोभनश्लोकाः

[२५]

मन इव नभसः पताकापटाकारतो वेपते हे पते गच्छ गच्छेति कच्छे महोदन्वतस्थ(स्त?)न्वते निर्भरध्वानमध्वानमध्यात्मनः किं लघुत्वाय मुक्तांशुकैरङ्गकैरङ्गनाः ।

प्रतिभटपटलीतिरस्कारढक्कारवप्रोल्लसल्लोलकल्लोलदोर्बन्धने सिन्धुनेयं धरा स्थापिता सापि तावद्रजःपूरकर्प्पूरमुष्ट्यावृणोति स्फुटादित्यदीपं दरव्रीडया ।

अथ गमनविलम्बिकादम्बिनीचारुचित्कुर्वंते पर्वतेन्द्राभिराम-द्विषो दिङ्मतङ्गा भृशं गाढवक्षोभवक्षोभशुष्यन्मदाम्भोमरू-भूतकुम्भस्थलीमूकमत्तालिवैतालिका [:] ।

त्वयि चलति चकोरबन्धुश्चिरं धूरिलीलायितोऽम्भोधिगर्भा-धिरा(वा)सव्यथामद्य सद्यः स्मरन्त्युद्भटं भोगिभर्तुर्मटत्कृत्य मध्ये मृणालीवदाशु द्विफालीभवन्ति स्फुटाः ।

[२६]

वियन्मापनस्तम्भवद्राजमानोऽ-
भवद् राजमानो रणप्राङ्गणेषु ।
गिरीन्द्राकृतिस्ते मतङ्गाधिराजो
मतङ्गाधिराजोद्भवस्येव शिल्पम् ॥

शोभनश्लोकाः

[२७]

अरुणीकृतकर चरुणीकृतनर तरुणीरसपर तरुणीरसपर ॥

वीरविरुदम् ॥५॥

[२८]

प्रक्षालितमुख यक्षाधिकसुख रक्षापरुष बुभुक्षाकुलनर मक्षान-कवर भक्षार्प्पणतर पक्षाश्रयणसमक्षागतजन कक्षाहितकर रक्षा-विनत ऋभुक्षादिकसुर उक्षालसगत कुक्षावतिकृश प्लक्षादिकघन-लिक्षायितपर भिक्षाशरणविलक्षाहितगण दक्षादपि कन(ण)भक्षा-दपि सुविरक्षातिनिपुण त्र्यक्षानतसित पक्षामलनव दाक्षायणिधव शिक्षापकयुध लक्षाहितशर पक्षानिलकर शिक्षातलदर लक्षादि-(धि?)कहय सक्षात्रियचय नः क्षासयभय मक्षानभिरत सक्षातरु-

धीरवक्षा भवदरिरक्षारवचन (ग) सक्षाकृतिगजपक्षानतकुथकक्षा-सतघन लक्षादपि शतलक्षार्प्पकपरपक्षावलित्रि[तृ]णकक्षानलघन ऋक्षाधिपमुख लाक्षारुणनख द्राक्षावचन वलाक्षाम्बरधर साक्षादरुण तितिक्षावरुण जिघृक्षारहित मुमुक्षासहित यियि(य?)क्षाविदलित रक्षामदनसदृक्षाकृतिरसि भिक्षावधिकदिदृक्षाजनकविपक्षावनिप तरक्षारिभ इव दक्षारिनयनप्रक्षारितजल कक्षाधरनिजिघृक्षापरिचल दक्षासकटकरक्षावनिमख नश्छादय रुजमक्षायतभुज ।।

कलिकर्णकलिका

[२९]

जय जय जगदेकरक्षाकरक्षात्रकक्षानुकक्षापरीक्षामुदक्षातिदक्षाधिकक्षान्तिपक्षाश्रितक्षामलिक्षामलक्षाग्रतक्षातिशिक्षारि (ऋट)-भुक्षात्मज ।

त्वमसि भुवि नवीनयक्षाधिपश्छान्तपक्षारिवृक्षासिकक्षानलश्छादकक्षातलक्षाहितक्षातयक्षाकरक्षालितक्षात्रियोध्वा (च्छ्वा)-सिवक्षाः सुभक्षालयः ।

कलयसि गुणवद्दिदृक्षाविवक्षामुमुक्षायियि(य?)क्षारिभिक्षासिसृक्षास्वभक्षाहितेक्षाविलक्षान्तरिक्षादिरक्षाः कटाक्षासदृक्षास्यपक्षान्तरिक्षाधिपः ।

प्रतिभटपटलीदिधि(ध)क्षाधिकक्षारकक्षावलक्षाश्वनक्षातिल-क्ष्याम्बुजाक्ष्याकुलाक्षार्द्धदीक्षाभरच्छायकुक्ष्यागतक्ष्मालित्रक्षातपच्छात्रवक्ष्माधवः ।

[३०]

क्षान्तोऽपि त्वमभू [:]क्ष(क्षु?)रप्रशिखरप्रक्षिप्यमाणेक्षणः
क्षीरोदावधिकक्षमाधिपतयः क्ष्वेडैरिव क्षालिताः ।
क्षोणीन्दौ क्षणमुत्थिते क्षितिभृति क्षिण्वन्त एते क्षपाः
क्षुभ्यन्ति क्षुभिता अपि क्षत इव क्षारोक्षणैः क्षत्रियाः ॥

[३१]

युष्मद्यशोजालपान्थस्य भूपाल ।
इन्दुं किल स्वेदविन्दुं जगद् वेद ॥

शोभनश्लोकाः

[३२]

भूपरूप कूपसूप धानगान पानतान शुद्धबुद्ध युद्धरुद्ध कीरवीर धीरहीर खण्डदण्ड चण्डपण्ड ॥

वीरविरुदम् ॥६॥

[३३]

माराधितसुख माराजितमुख मारालकरुचिदारकहारक
भाराघरकल भारामितबल भारानमितभुजङ्गमपुङ्गव ।
धारायितबहुधारायितविधुधाराधितशरदायकनायक
हारांचरितविहारामृतवसुहारावितपरपत्तनकर्त्तन ।
कारातपदपकारावहसहकारांतिमधुरजल्पनकल्पन
दारावलिबलदारामकजगदाधारकरणचत्वरसत्वर ।
सारीकृतशुकसारीनुत सहसारीनपनय गर्ज्जकतर्ज्जक
मारीहरसुकुमारीकृतसुकुमारीकृतरत निर्द्धनवर्द्धन ।
तारे युधि समितारे निरूपमतारेश्वर सुखसद्रदभद्रद
चारोदितपरिचारोचित युधि चारोहसि तुरगन्धरकन्धर ।
सारं वह सहसारञ्जकसहमारुन्तुद रिपुदारकपावक ।
सारङ्गनयनसारम्भणघनसारं जयति यशस्तव सम्भव ॥

कलिकर्णकलिका

[३४]

यात्रायामपि कीर्तयस्तव न वा यद्रोहिणीवल्लभ-
द्रोहिन्य(ण्य)स्तदवैमि मङ्गलनृपैरेवासि धात्रा कृतः ।
रम्यं[?] श्रीभरतो मुखं हि भवतो जागर्त्ति दन्तोऽर्ज्जुन-
स्त्वद्भ्रूविभ्रमने(णे)विभाति न लता भव्यो भुजस्ते पृथुः ॥

[३५]

स्वमालतिकेव भुजस्तव देव रणे यमपाश इव प्रचकास
पुरे भवतस्तु जगत्त्रयवस्तु रुजैव पवित्र न केवलमत्र ।
उपैति दृगन्त नवस्तव हन्त करे विहरन्ति जवेन जगन्ति
इह त्वयि देव न तं जगदेव पुनर्बलदेव विलासमुदेव ॥

शोभनश्लोकाः

[३६]

लोलभृङ्ग चोलसङ्ग दोससङ्ग भोलवङ्ग वृन्दवास वन्दिवास
कुन्दलास तुन्दिलास द्रोणवद्य शोणवद्य घोणहृद्य घोणमद्य हीनदेश
धीनदेश दीनकेश चीनकेश तारतुङ्ग सारभङ्गभारभङ्ग चारचङ्ग॥

वीरविरुदम् ॥७॥

[३७]

आरादाराधितनर नारावाराजितकर शोचनसोचन ।
वीराऽवीराकृतकृप धीरानीरासितनृपमण्डलकुण्डल ।
तारादारायितमुख पारावारायितसुख शङ्करकिङ्कर ।
नीराधीरायितबहुचीराभीरायित महिवल्लभ दुर्ल्लभ ।

हीरामारायित हसतारागारायितयश उद्यतहृद्यत ।
श्रीरातीरावलिभरकोरासोरायुधनर कृष्यसि हृष्यसि ।
साराचाराशय परिवाराधाराधय हरिचन्दननन्दन ।
कीरालीराधितवलभीराशीराक्तबलपत्तनमत्तन ।
कारागाराहितजनधारासाराधिकधनदायकनायक ।
हीरालीराजितकर वीरानीराजितवरसिन्धुरबन्धुर ।
आरामाराधनधनसाराकाराधिकघनकुन्दकनन्दक ।
सीरागी रार्जसि गतभीराभीराधिपनतभूजनपूजन ।।

कलिकर्णिकलिका

[३८]

शङ्करमाधव शङ्करमाधव शीतलरोचित शीतलरोचित कानकोटर काननकोटर वाहितमण्डल वाहितमण्डल चापलतापित चापलतापित राजतराजित राजतराजित वासवधूपन वासवधूपन दारणसाहस दारणसाहस सायकरावनिकायकरावनि रङ्गरसङ्गत सङ्गरसङ्गत वैरवदावलि कैरवदावलि कैरवदावलि लङ्घयिदारुण संहतिदारुण सुन्दरदानिव कुन्दवदानिव धूसरमण्डल धूसरगण्डल मन्मकरीशत कर्मकरीकृत पाणितलक्षण माणितरक्षण ।।

[३९]

स्वामिन् दुष्करयुद्धपुष्करमधि त्वद्बाहुबाहुर्भृशं
भ्राजत्कङ्कणपुञ्जकुञ्जरशिरःसूरं समाक्रामति ।
स्नाता नेत्रजलैः कृशानिव तृणान्यादाय ते कुर्वते
तादृग्गर्वसुवर्णपर्वतमहादानं दिशत्सैनिकाः ।।

शोभनश्लोकाः

[४०]

मत्तचलद्गज दत्तव्रदद्व्रज शक्तरणक्रिय भक्तजनप्रिय मुक्त-मतिभ्रम युक्तमतिक्रम ॥

वीरविरुदम् ॥८॥

[४१]

कातरित खातजित गोरमण घोरजन चित्रकर छत्रधर जल्पिजय जल्पितहय टापजर चापघन डिण्डिमक ढुण्ढिचर नापपत तापशत थाथक्कत दानभृत धालपर नालशर पल्लवित फुल्लसित वल्लिरत भल्लिहत भल्लशत यत्नपर रत्नवर लाभपण वाभगुण शातिनहु खातिबहु सत्यगत हृत्यनत क्षयचय [?] मद्रजय ॥

कलिकर्णकलिका

[४२]

बभ्राम शुभ्रा महोमण्डले वीर भूपाल कीर्त्तिः स्वकापालिकी कापि ।

चन्द्रोऽयमुद्दामचैत्रक्षपालम्पटस्तत्कपालं पटः स्वर्णदी भाति ।
चापप्रतापस्तवोदेति लोकेषु पण्डायितो देव चण्डातपो येन ।
अम्भोधिसम्पायभम्पादितो ह्येष भूयो दुराशाभिराशामुखं याति ॥

[४३]

प्राप्यद्दुत्तरवारिताण्डवतमोविस्तारमस्तायते
तत्तादृग्भटभीमभालवियतः सिन्दूरबिन्दू रविः ।
वारंवारविधूतनूतनपटोन्मीलन्निमीलद्युति
द्योतन्ते द्विषतां त्रिकूटकटके खद्योतवद् योषितः ॥

शोभनश्लोकाः

[४४]

धीरललित वीरवलित चीरचलित कीरकलित कुन्दकदन कन्दरदन वृन्दवदन मन्दमदन सारसहित मारमहित पारप्रहित दारदहित सर्वस(श?)मन गर्वगमन सर्वसुमन उर्वदमन तुङ्गतनय बङ्गविनय सङ्गमणय गङ्गगणन ।।

वीरविरुदम् ।।९।।

[४५]

अमरसम समरयम वरसदम सरसगम तरुणतम वरुणरम पवनजय जवनहय अरिभवन परिभवन अमदगज समदगज अहिमकर महिमकर भयदमन हयगमन चलदसिक बलरसिक नमदहित शमसहित अमितबल स(श)मितखल गलितरुज ललितभुज सुचिरसुख रचितमुख अमलतर कमलकर धृतहसन सितवसन मधुगदन विधुवदन गुणसदन घनरदन ।।

कलिकर्णकलिका

[४६]

वङ्गद्वङ्गद्वाजिभ्राजद्वीचीनीचीभूतार्क्कः
स्फाराकाराम्भोदक्षोदेभालीकालीभूताभ्रः ।
दत्तच्छत्रश्रेणीफेणीभावं धावन्नाकाशे
धत्ते चित्ते मोदं कोदण्डाहिर्वाहिन्यद्धिस्ते [?] ।।
क्रुद्धा युद्धारम्भे दम्भेनालं कालं कर्षन्ती
शम्पाकम्पाधारानाराचालीष्कालीवोज्भन्ती ।
सेना तेनाशक्तारक्ता शुद्धे युद्धे नृत्यन्ती
राजन् राजन्येषा लेषा(खा)धीशं कीशं कुर्व्वन्ती ।।

[४७]

युद्ध्यन्भूमिजिघृक्षयैव सबलः क्षिप्रं भुवि प्रापितः
कुर्व्वन् तच्च पदस्पृहामहरहर्न्नाकाय चाकारितः ।
कामं चामरयुग्मलोभचपलः सद्यो जितश्चामरै-
स्तत्किं वीरवर त्वयाऽरिनृपतेः क्रुद्धेन युद्धे कृतम् ।।

शोभनश्लोकाः

[४८]

त्रस्तत्रस्तप्रतिबलमतिनल मस्तग्रस्तस्फुटखलपटुबल हस्तन्यस्तक्षमशरशमधर ग्रस्तव्यस्तप्रतिभटहतनट त्रस्त[?]प्रस्तम्भितनृप कृतकृप ।।

वीरविरुदम् ।।१०।।

[४९]

भयभञ्जनसञ्जनन्ञ्जनदञ्जनखञ्जनगञ्जनकञ्जदृशं तनुमध्यकृशम् ।

स्थलपङ्कजराजिविराजितराजतराजसमाजनमन्मुकुटं वलदक्षिपुटम् ।

अनिशं गिरिशृङ्गवदङ्गतुरङ्गमसङ्गमरङ्गमनङ्गसमं भवभङ्गयमम् ।

वियदङ्गनरिङ्गनभृङ्गनखद्घनटङ्गनतुङ्गतरङ्गपरं गतरङ्गपरम् ।

कुण्डलतारकचुम्बनचिक्कनचारुचमत्कृतचन्द्रमुखं वलदिन्द्रमुखम् ।

महिमृन्मणिमौलितयन [?] परिरम्भन(ण)चारुचरतरणतलतामरसं घनकामरसम् ।

लपितत्रपितामृतमुक्तमहातपवारणहिमरुचिमहितसुखं हृदि रहितरुषम् ।

प्रणमद्धनुरिन्दुकलाविशिष(ख)द्युतिविद्रुतवैरिमहातमसं महि-चन्द्रमसम् ।

अरिसुन्दरिमण्डलगण्डदलस्थलदृग्जलकज्जललिखितगुणं गुण-सुखितजनम् ।

रिपुमोहसमर्प्पकदर्प्पसुसर्प्पविसर्प्पदहर्प्पतिरत्नवरं जययत्न-परम् ।

विषदद्विषदञ्जलिशुक्तियशोमयमौक्तिकमण्डितमहिमहिलं विन-यग्रहिलम् ।

प्रतिपद्य भवन्तमरन्तमनन्तपदं तृणयत्यचिरेण धरा गुणपुञ्ज-परा ॥

कलिकर्णकलिका

[५०]

इदं तव यशोरिपुक्षिति[प]दुर्यशोनील[युक्?]
युताम्बरविशोधनप्रसरदूषजूषद्युति ।
कुहूनिशिरहन्मुहू रजनिवल्लभोल्लासनं
पयोदसमयोदये हरत्ति हंसहानिव्यथाः ॥

[५१]

इयमखिलमही महाराज ते राजते खड्गसौदामिनीदामिनो तेन भीतेव दिक्सुन्दरी सुन्दरीभूतसेनाचलद्वाजिधारामधाराल-योद्धूतधूलीवृतिच्छद्मना मीलयत्यर्क्कचन्द्रेक्षणे ।

रणरणितनिकामभव्यामलव्यामलम्बैकघण्टेभदानाम्बुवर्षाति - वर्षातिपातेन दिक्कुम्भिमानामयूरावलीरावलीनां विधत्तेऽथ भव्या-कुलव्याकुलः स्पन्दते राजहंसोत्करः ।

चलति चरणचङ्क्रमादेव विश्वम्भरा देव विश्वम्भरा भुग्नमास्ते विमाना विमानावलीविभ्रमेवाचिरं भासमाना चिरं भासमाना विरोधावलम्बिप्रिया विप्रियाढ्या गिरीन् गाहते ।

ध्वजपटपटलाङ्गलीभिर्म्मृज्यत्यम्बुधिश्चौतमासन्तसामन्तहृत्ता-पगाढाग्निधूमानुरूपांशुभिः पांशुभिर्द्दूषितं पूषनेत्रं हरिन्नागरी-नागरीतिस्फुरद्बाहुदण्डप्रयाणे तव ॥

[५२]

नलो गतबलो मतः कुरुगुरोरुरो भिद्यतां
पृथोरिह वृथोदयः क इव कर्णमाकर्णयेत् ।
अगीरथ भगीरथस्त्रुटितगौरवाः कौरवा
भवद्भुजभुजङ्गमो यदधुना धुनीते धनुः ॥

शोभनश्लोकाः

[५३]

सीरधर वीरकर धीरतर कीरकर नीरभर तीरचर चीरधर कीरकर वीरवर हीरशर ॥

वीरविरुदम् ॥११॥

[५४]

दलयसि परबलमानमनिलसमानमनिलसमानतुरगनिवह वहसि सुकृतमनिदानकृतमनिदानबहुतरदानवहुतरसिकतररसिकरतनकृततालचलकृततालभुजगतपनभुजगतपणावनवयुवसुवलितरङ्गसुवलितरङ्गरुचिरसकलरुचिरसकलसलसदनुपमकरवालदलकरवालदलपरवादनकुशल शलभितविधुरविरोधिविधुरविरोधिसुरवरयोधिसुरवरथकरथकरिपरशुकलापपरशुकलापरसुमतिरुचिरसुमतिरुचिरचिरचटुमधुरमणीकमधुमधुरमनीकपृथुलसदसिपृथुलसदसिकसदसिकरनबहुमानन बलहुमानतपनसमानतपनसमान तपनसहितहितपरिचरणप्रवालचरणप्रवाल करतलवालकलितललित धवलिमलसितविसारिहसितविसारिकुवलयनयनकुवलयनयन रणविकशितरवारिविततरवारिपरमदहनपरमदहन ॥

कलिकर्णंकलिका

[५५]

जय जय जितबलदेव देव दुर्ज्जनगणगञ्जन,
महितलतिलकनिकामनव्यनिर्म्मलकलिभञ्जन ।
वदनकमलविनिविष्टहृष्टनयनस्फुटखञ्जन,
सम्मुखमनुजसमाजराजपदवीमुखसञ्जन ।
अभिनवनिर्म्मलचरितभरितभुवनश्रुतिकन्दर,
दुर्घटघटकपयोधिमध्यमर्द्दनघनमन्दर ।
चञ्चलचकमकचारुचन्द्रचिक्कणमणिमण्डन,
निजभुजभुजगविपक्षलक्षहृदयानिलखण्डन ।
उत्तानतरङ्गतुरङ्गखुरदलितललितभटमुकुटचय,
तलमलितविसर्प्पितजलधिजलघृष्टपुष्टभुजविजय जय ॥

[५६]

कीर्त्तिस्ते राजहंसी चलति महिमनीहारनीहारभूभृत्
कन्दादाहृष्टमन्दाकिनि विलसति का दीर्घदिग्दीर्घिकासु ।
जानीमस्तङ्गतासीदियमिह चरता सोमहंसेन तत्त-
न्नक्षत्रस्तोमडिम्बावलिरभिलुठति व्योमपृष्ठे तदस्याः ।।

शोभनश्लोकाः

[५७]

मुखविधुरि(वि?)धुरितसरसकलाधरगुणमधुमधुरिततरसकलाधर ।
मुखरुचितुषकृतिकितवसुधाकर नृपतिपरिषदुष(प)कृतवसुधाकर ।
कुसुमविशिखसम···रतिभाजन युवतिवदनहिमकररुचिरसभाजन ।
गुणगणविरचितसकलसभाजन मरकतमणिमयसकलसभाजन ।
रमणिमनसि मनसिजसुमनोरमस्मितविरचितचिरचितसुमनोरम ।।

वीरविरुदम् ।। १२ ।।

[५८]

मनसिजनीलागञ्जक निरुपमशीलाभञ्जक ।
रिपुहृदि कीलासञ्जक निजकुलरञ्जक ।।

[५९]

जय जयोत्कलिकाप्रायकामकल्लोलितव्यक्तरोमाञ्चकञ्चु-कितकुचकाञ्चनाचल कलावतीकदम्बकोलाहलितकीर्तिडिण्डिमप्रचण्डिमध्वनितगजदण्ड ।

जय जय यमदण्डताण्डवितकुन्तखण्डितारातिरुण्डमुण्डावली-कमण्डलुमण्डितव्योममण्डितोद्दण्डकीर्त्ति कापालिकश्रीखण्डखण्ड-कायमानशशिखण्ड ।

जय जय चण्डमुण्डासुरचिपिण्डचङ्क्रमितचामुण्डादशनप्रकाण्डवैतण्डिके ष्व(स्व?) पक्षानिलद्विखण्डितद्विषदेरण्डखण्ड।

जय जय सङ्ग्रामशौण्डचिक्कणकृपाण कूष्माण्डवद्दलितगण्डकस्तूल (स्थूल?) सामन्तकन्धरक्षतजकासारकारण्डरीकृतरिपुशिरस्त्राणभाण्डेनसदनरेशभ्राजद्वेषद्विषदरविन्दोच्चय जयदिन्दो॥

कलिकर्णकलिका

[६०]

पाण्ड्यप्रभोः पुण्डरीकेक्षणाकुण्डलोद्दण्डमार्त्तण्डनिष्खण्डनप्रौढबाहूभवच्चण्डकाण्डावलीकुण्डलीभूतकोदण्डपाण्डित्यकण्डूलदोर्द्दण्डनिश्शुण्डवेतण्डगण्डस्थलीगण्डशैलोदयत्पाण्डवाखण्डमुक्तामहातण्डुलस्तोमनोराजिताजाण्डसन्मण्डपोद्यन्महीमण्डलोदूढदिग्बालहिण्डीरपिण्डीभवत्कीर्तिचण्डी यदाकाशकासारकाण्डीरकाण्डीरसण्डीननाराचतुण्डीयभारातिखण्डीकृताराति भाण्डीरदोश्शाखदेवद्विषद्भूमिरण्डाकरण्डीकृतद्वेषिमुण्डीयपूर त्वया भीष्मशुण्डीन्द्रसिंहः शिखण्डीसपण्डीयते हन्त चण्डीपतिः सोपि चण्डीस(श)गाण्डीवधन्वापि॥

[६१]

द्विषस्तत्रमण्ड मटद्भुजदण्ड।
पिबन्ति सुखण्डमिवाहवचण्ड॥

[६२]

काण्डैः खाण्डवसीम्नि ताण्डवयता गण्डस्थले गाण्डिवं
येनाखण्डलगुप्तकुण्डलिकुटीकुण्डेऽनलः पिण्डितः।
येनाखण्डि शिखण्डिवाहनपितुर्दोःकाण्ड कण्डूरसौ
कोदण्डे भुजदण्डभाजि भवतः पण्डायते पाण्डवः॥

शोभनश्लोकाः

[६३]

तरणधरण चरणशरण भरणकरण करणहरण सरणसरण ॥

वीरविरुदम् ॥१३॥

[६४]

गुणवन्निकुरम्बनिकामहिते महितेभरणाभरणासितरे
सितरेचितकीर्तिलतासुरसे सुरसेवनकेवललम्बिशिखे
विशिखेद्धविरुद्धकदम्बमृतावमृतादपि तावरसालपने
लपनेन्दुसनिद्रसरोजवने जवने रणसीमनि भीमनिभे
मणिभेदितगाढतमोभवने भवनेत्र इवातनुमोहरसे
हरसेवकवद्घनभूतिधरेतिधरेन्द्रवदुत्कराजनते
जनतेक्षणवच्छ्रुतिचुम्बिमुखे विमुखेश इव क्रतुदानवहे
नवहेलिवदभ्युदयत्कमले कमलेश इवाघनरकशमने
शमनेङ्गितवज्जनपापरमे परमेष्ठिवदथ चतुराननके
ननकेतकवद्भवमुक्तरसे तरसेन्द्र इव क्षितिभृत्तपने
तपनेन्दुवदञ्चितविष्णुपदेऽनुपदेशिभवत्कुनयाचरणे
चरणेन चलत्कमलाभरणे कमलाभरणे समरङ्गमिते
समरङ्गमिते वसुधामहिते वसुधामहिते सुरसारमिते
सुरसारमिते सुभग त्वयि भूः ॥

कलिकर्णकलिका

[६५]

जय वीर तुरङ्गमरमणघनतुरगतरलतरधुरवलय ।
विभ्राजिविधुन्तुदविकलबहुवीरमुकुटमालमिहिरचय ॥
मत्तालिकरटिवरकोटिकटविकटकटाहकतटपटल ।
पटपटितशिलीमुखबिलगलितरुधिरवल्लिवरविजयफल ॥
जय वीरधरालसुरधरालचपलपत्तिभटकटकशत ।

डगमितमहीतलवलयढणढणितढक्कायितपर्वत ।।
उद्दण्डचलितभुजदण्डवसवलितशरासनवलयलय ।
मणिकुन्तलमण्डलदिवसकरपरिधिबुद्धपरविनय जय ।।

[६६]

त्वन्नासादलदोलनेहचमणेनासादयन्तः स्वयं
चारुण्यं कृतमौलयोर्नयनयोश्चारुण्यलेशे तव ।
शङ्कामन्दरवास्तवाननविधौ कामं दलद्भ्रूलते
दन्तावद्धमृणाजना यदि मनाग् दन्तावलं पश्यसि ।।

शोभनश्लोकाः

[६७]

श्यामहरिनामपरिणाम करिग्रामधरधाम रसतामरसवाम-हस रामलसदामहितदाम हितराम जितराम जितभाम हित-भास हितचामरितचासरित कामकर कामकर सामपर सामपर धामधर धामधर वामनर वामनर टामतर नामनव सामलय सामदय यामजनतामरण पामरण तामसन काममभिकामशुभ नामतर यामभुव सामयदुरामविधुषामयुतसामनुत् ।।

वीरविरुदम् ।।१४।।

[६८]

समराधिकरन्ता रिपुनिकरं तापयति परं तावककटकः
प्रचलितहरिदन्तालयसुरदन्तावलवरदन्ताहतिघटकः ।
चलति त्वयि लङ्का कलितकलङ्का विशति बिलं कातरितमुखी

न चलति सकलं काननपटलं कारतरिकलङ्काविलसुमुखी ॥
जलधेर्जितशम्पा विशति भृशं पारकमनिशं पारगवनिताः
न हि कुचमनुकम्पालयपृथुकं पाययति सकम्पा सुरदयिता ।
बलवत्यपि चम्पावदनरुचं पाति नवकुचं पारणमहिला
घनरत्नशुचं पाटयति कुचं पालयति शुचं पारदचपला ॥
तृणमेव निजं भावयति भुजं भासितमपि रम्भासुरदमनः
त्रिजगत्यपदम्भा दृक्चलदम्भा त्यजति मदं भामपि समनः ।
कृतपतिपरिरम्भा विचलति रम्भा दलरुचिरं भारतललना
विहरणसारम्भा विहसति रम्भा सुचिरतरं भावितदमना ॥
उरसि स्फुटमालोलितमालमालो दिशि दिशि मालो गमनपरः
कमताव[?]निपालो विपदमुपालोकयति कपालोपहितकरः ।
निवसति नेपाली गिरिवरपालीतरुविटपालीमधि विधुरा
परिनृत्यति कालो घनपुलदिवि[?]काली सुविपुलकालीयमधुरा ॥

कलिकर्णकलिका

[६९]

बङ्गास्सङ्ग्रामरङ्गातुर जहति भृशं गामनङ्गाभतुङ्गा-
स्तुङ्गा गङ्गातरंगा क्षितिरपि रजसाङ्गारमङ्गालिलिङ्गाः ।
अङ्गा भृङ्गा लवङ्गालिषु जहति वनं गात्रभङ्गान्मतङ्गा-
बङ्गालाङ्गानिरङ्गावलिवदजगलङ्गाचमङ्गारसङ्गात् [?] ॥

[७०]

सर्वसङ्गापितोदारशृङ्गारनीरैकभृङ्गार युष्मत्तुरंगावदानप्रसं-
गाकुलः को न गंगापतिं देव संगाहते: [ते]
सन्मृदंगाजिवाजन्निषङ्गा—

भिलोलद्भुजङ्गाभबाणाभिषङ्गादमी धिक्कलिङ्गा विस-(श)न्ति प्लवंगा इव प्रौढतुङ्गाटवीः ।

भीतभामिन्यपाङ्गालिभङ्ग्या पिस[श]ङ्गाननं भामभङ्गाद् विहङ्गायितं भ्रामश्शृङ्गालिसङ्गामिवङ्गालयं भ्रामनीमण्डलं गाढमाकर्ण्य संग्रामरङ्गागतं त्वामनङ्गारिरङ्गातिभीतो न भङ्गारसं गाहते निर्भरं गालवः स्वस्ति सङ्गायति ।।

[७१]

गन्धर्वीचयचित्रभाजि भवति स्वस्वप्रियप्रत्यया-
दुन्मीलन्त्यमरावतीमृगदृशामुद्दण्डकोलाहलाः ।
कालोर्कायमिति[?]त्वदाहवहतस्वाराज्यभाजोऽपि च
त्वच्छत्रूनपसारयन्ति रभसादुद्भिद्य मोहाङ्कुराः ।।

शोभनश्लोकाः

[७२]

तर्कतरुणतरमुक्तमतिभ्रम अर्कवरुणवरसक्तसुहृत्तम
चिक्कणचलदवलक्षहयक्रम दृक्कणमददरिलक्षजयक्षम
खर्व्वदमरपरवर्ज्जितविभ्रम सर्वसमरवरगर्ज्जितविक्रम
अर्वरमणगमनस्फुरदुद्यम वर्वरमन उदयद्यमसुभ्रम
गर्वगमितरिपुलक्षमदव्रज पर्वतमितविपुलक्षमसद्गज ।।

वीरविरुदम् ।।१५।।

[७३]

परिभज्यति [?]शम्पा गुरुतरकम्पा चम्पा बहु विलपन्ती,
कमता[?]चिरसम्पादितबहुझम्पा पम्पा भुवि निवसन्ती ।
करिवरमिह लोला लयति विलोला...कुलशुभदन्ती,
परिमज्जति कोलाकृतिरपि दोला दोलायितहृदवन्तीः ।
प्रचलन्ति पतङ्गा इव तेलङ्गा भङ्गादपगतवेशं,

कलयन्ति विहङ्गा इव चलदङ्गा वङ्गा वनविनिवेशम् ।
विकलन्ति कलिङ्गा भृशमभिषंगादंगारिततनुतापाः,
दधति स्फुटमंगा हिमगिरिगंगासंगाहनमपचापाः ।
जलनिधिरपि तुंगीभवति विहंगी संगी पणवनिनादैः
वनमधि मोरंगी गतिजितभृंगी पिंगीभवति विषादैः ।
सुरसमु...कुरंगीदृगपि मृदंगीसंगीतकरसभारं
जनयति रिपुरंगीकृतसुलवंगी भंगी रसमनुवारम् ।
पवनस्य तु पंगोरिव गतिभृंगोरंगोदितगजरोधैः।
भवकुञ्चितशृंगो विपुलभुजंगो लङ्को लगति सुयोधैः ।
भवतश्चतुरंगोपहिततुरंगोसङ्कोषितसुविलम्बं
रजसा दिवि संगोपयति पतंगोनंगोपमनिजबिम्बम् ।

कलिकर्णकलिका

[७४]

परजनवञ्चनविमुख सुमुख मम जल्पितमिदमवधेयं
केवल वससि सकलवरतनुहृदि कुत्र कृतिः पठितेयम् ।
यदि खलु धरणिवलयमुषितैरपि मधुरममृतमिह पेयं
साहिजहान सकलनरपतिकुलतिलक चकितमुपगेयम् ।।

[७५]

चालन्या नभसा दिशो मृगदृशो धुन्वन्ति देव द्विषद्-
राजाकीर्तिवितानवर्तुलतुषत्वत्कीर्तिचूर्णच्छटा[:]।
ऊर्ध्वं भातितमा तमालकुसुमस्तोमानुकारं तुषैः
स्त्यायन्ते भुवि तारकाबिलगलच्चूर्णालयश्चन्द्रिका: ।।

शोभनश्लोकाः

[७६]

क्रुद्धकरशुद्धशरयुद्धजरदङ्कगदलदङ्ग दलवङ्गतरभङ्गभरचण्डचर पण्डपर ।

वीरविरुदम्।।१६।।

[७७]

अंगाहितप्रमदरंगाधिपप्रवणलङ्कापतिप्रतिकृत्ते ।
शङ्काशतप्रसरकङ्कालितप्रखरझङ्कारितद्विपगते ।।

[७८]

जय जय रजनिकरमण्डलजिगीषुवदनबिम्बानुबन्धितसन्ध्यानुकारि-मणिकदम्बकानुविद्धमुकुटलमञ्जुलमञ्जुलक्ष्मीवितानवदनचन्द्रलावण्य-सुधास्वादसकुतूहलचिकुरनिकुरम्बराहुवदनावलम्बितमृणालिकारुचि-रचन्दनतिलक तिलकलावण्यचोरणचिराभिस[श]प्तनामिकासमुद्-धृतनिजनिश्वसितामृतनिवहमन्दीकृतगरलगुल्फैकभुजग भुजगरिमख-ण्डितारातिपटलपाटितोदरबहलवेदनानिवेदनश्रवणमूलावलम्बिमि-हिराभिरामकुण्डलयुगल युगलक्षचन्द्रकलानिर्म्माणजनितनैपुण्यविधि-विहितदन्तमाणिकायुगलयन्त्रितरसनेक्षुखण्डताण्डवितवचनरस नर-समूहविस्मापकविलोचनकनीनिकाबिन्दुसुन्दरभ्रू कुटिमण्डलप्रणव-चुम्बितश्रुतिसंगतब्रह्मातिरिक्तसू (शू) न्यताबिन्दुमणिकुण्डलमनोहर मनोहरणसमर्थशोणिमाधरमधुरमध्यरेखिकापरिवाहवाहितदशनरु-चिदग्धप्रपातनिम्नाञ्चलचिबुकरुचा रुचिर चारुचिरकोमलकरज-कुसुमसुकुमारकरपल्लवोल्लसितभुजपारिजातविशदशिराभिराम -तनुमसृणकक्षातनूरुहविसरमणीयमनिसरप्राकारितहृदयमन्दिरविरह-मान[ण] पद्मालयासरस्वतीनिहतनासिकाललितलवंगमुकुलायित-

स्तनवलितवलितरङ्ग सरनाभीसरोवरविसरदुरुपरिवाहवलितचरणा-रविन्दविलसदूद्ध्वरेखाजनितनतशत्रुसुन्दरीसीमन्तचिह्नचमत्कार जय महाराज ॥

[७६]

भ्राजद्भालस्थलमणिविदलत्तिमिरारम्भो
राजसि राजजंस्त्रिपुरसमाजप्रतिहतशम्भो ॥

कलिकर्णकलिका

[८०]

जागर्त्ति त्रिजगत्किरीट भवतस्ती(स्ति)र्यक्करामर्शन-
व्याख्यातप्रतिवीरवर्गविगतिर्गुम्फोऽयमुद्गुम्फितः ।
दन्तोद्योतशरान्विताधरपुटीपर्य्यन्तरेखागुण-
व्याकृष्टं वदनेन्दुनेव चिकुरध्वान्तेषु धन्यं धनुः ॥

[८१]

मघर्म्मबिन्दुबिन्दुमत्यहो भवन्तमन्तरा,
तनोरमाधुरीर्मनोरमा धुरीण शङ्कते ।
त्वयि श्रुते मदालसा हृदालसायते हरेः
करोति सङ्गमेन कारमंग मेनका रहः ॥

[८२]

उत्कण्ठावत्कलावत्यनुनयवचनादुर्व्वशी सर्व्वशील-
त्यागात्पत्रोपरित्रोटितमदनमद त्वां विधिर्व्यालिलेख ।
नन्दासुन्दाम धत्ते लिखति मकरिकां हृत्तले चित्रलेखा
रम्भालम्भावमङ्गैर्विरचयति घृताची तु साचीङ्गितानि ॥

शोभनश्लोकाः

[८३]

ललितलयलोल त्रितचोल गुरुगगनगोल रचितरणरोल कटु-
करकपोलकरिकसितकोल द्रवदवनिदोलमव नवनिचोल ॥

वीरविरुदम् ॥१७॥

[८४]

खञ्जरीटदृग्विसा(शा)ल पिञ्जरीकृतैकभाल सञ्जरीहरीषि बालमञ्जरीमदं भ्रुवाऽऽलपिञ्जरीकृतोरुमाल गुञ्जरीगरिष्ठताल कुञ्जरीयदन्तजालपुञ्जरीतिसद्यशाः, अङ्गनादृगन्तवृत्तबङ्गनायकप्रदत्तटङ्कनाधिराजनृत्यबगङ्नापतद्भटः, तुगनागयूथराजदङ्गनासिताहिराजसङ्गनागरीसमाजरंगनाटिकानटः, सासिनीलदृक्तरङ्गरामणीयकप्रसङ्गवामनीकृतैकभृङ्गधामनीरजाकृतिः, कामिनीविराजदङ्गयामिनीविलासिरङ्गगामिनी तव त्वनङ्गनामिनीमुखद्युतिः, कुण्डलीशबाहुपाशकुण्डलीनभाहुताशमण्डलीयहोमराशितण्डुलीयभद्रिपो, दण्डली च सर्वदेशचण्डलीनभूसुरेश कुण्डीभवद्धयेशमण्डलीपरप्रभो, त्वं त्वरापदृष्टिराग इन्दुराजदङ्गरागबिन्दुराजिभालभाग मन्दुराजितार्णवः, कुन्दराजिदन्तलेख तुन्दराजितत्रिरेखसुन्दराजितप्रवेषसुन्दरावनप्रभः, मन्दराद्यवोपमानमन्दराचलप्रधानकन्दरातरुप्रतानकन्दरागिरैरवानबन्दिराजिराजमानमन्दिराहिताभिमान इन्दिरामहावितानतुन्दिलीसकृद् भवान् ॥

कलिकर्णकलिका

[८५]

अथासमरसङ्गते समरसङ्गते त्वय्यति
स्फुटाननविभीषणे(ऽ)ननविभीषणेष्टप्रियाः ।

विलम्बिपुलकानना विपुलकाननान्तत्रुट-
न्मनोरमनवालका रमणबालकान् मुञ्चति ॥

[८६]

स्फारनाटितप्रवाल हारनामितैकनाल धारणास्यपद्मबाल भावनालभृङ्गमाल सारणानुजैकताल तारनागहस्तशाल हारिणा भुजेन पाल पारणापतन्नृपाल मारणाभिकुप्त(?)काल आरनालसद्-विकालपारनाभिभूतबाल तारनादशत्रुभालदारणासिभिन्दिपाल धारणाकपृष्ठपाल चारणानिगीततालकारणानुभावजाल तारणाविधौ कृपालवारणावि (व?) लीविशाल सारनागरीरसाल ॥

[८७]

भूमि(मी)न्दो भवता सह व्यसनतो ये गोतमत्वं गता
दुर्व्वासःपदवीं विलुण्ठनपरैर्नीतास्त्वमग्रेसरैः ।
ये वेलासिकताभरेण कपिलीभावं भजन्ति द्विषो
ब्रह्मण्यः किमिह स्तुतोऽसि बहुशस्त्वं तावयं तानपि ॥

शोभनश्लोकाः

[८८]

जय रणशीरधरध्वनिकीर जय वनचीरधरप्रतिवीर,
जय नदतीरकृतारिकुटीर जय सुशरीर जगत्यशरीर,
जय जितनीरधिनित्यगभीर जय परवीरणाकम्पशरीर,
जय पदवीरतभूभृदवीर जय वरवीर निरन्तरधीर
जय करवीरमनोहरहीर ॥

वीरविरुदम् ॥१८॥

[८९]

यामिनीपतिवदन कामिनीरतिसदन वामनीकृतमदन भ्रामिनीकृतकंदन भामिनीवशक गजगामिनीरसिक वसुधामणीतिलक बहुरामणीयकजनक रामनीरतहृदय नामनीरवमलय धामनीरितशयन वामनीलिमनयन सामनीहितहृदय रामनीरधिसदय सामिनीलितकुसुम दामनीङ्गतमधुप भ्रामनीरसित वलिवामनीभवसि परिणामिनीमवसि मतिसामिनीषितरसिक स्वामिनीहित समरगामिनीवयतिपरभ्रामनीमिषुमनपगामिनीभवसि नृपसामिनीर्मतिरुचितमामिणीसहितनृतकामनीकृतविमतकामनीरचितरत कामनीयभवन रामनीरदपवन ॥

कलिकर्णकलिका

[९०]

जय जय भुजवलवलितबहुविक्रमशमनकराल,
कुजनसमीरणसंविदारणसर्प्पितकरवाल ।
रणसर्प्पितकरवाल मिहिरमन्दीकृतकैरव,
सङ्गरचितकरकोपलिप्तदिग्गणरणभैरव ।
सङ्गरचितकटकोपचलितदन्तावलसञ्चय,
शरपविचरणविवर्णकर्णकुरुराजधनञ्जय ।
विन्दति गिरिपरिरम्भसय[?]मम्बुधिरधिकभियेव,
कमलिनिदलजलबिन्दुरिव चलति साहजगदेव ।
चलति साहजगदेव कटकजलधौ तव गर्ज्जति,
फुल्लति फणिपतिरङ्गतुङ्गकमठोऽपि निमज्जति ।
फुल्लति फणिपतिवङ्गमौलितलमौलिक्तस्थिति,
सहितर जय शतपत्रपत्रतोरणमनुविन्दति ॥

[९१]

भूप भ्रास्य(म्य)ति यं प्रति प्रतिगृहप्रारब्धपद्मालया
शैलूषीलयसूत्रधारमधुरो युष्मत्कटाक्षाङ्कुरः ।
तत्प्रासादविलोकनाद् विकुरुते विन्ध्याचलो ग्रीविकां
सम्भूतभ्रमसम्भ्रमेण भगवानम्भोजिनीवल्लभः ॥

शोभनश्लोकाः

[९२]

जय गंगाधरभावनभावन जय भृंगाभक्तपावनपावन
जय दुर्गापरधारणधारण जय वंगादिविरावणरावण
जय सभ्रामविसारणसारण जय शृंगारविचारणचारण
जय तुंगाहितवारणवारण जय रंगाबहुधारणधारण
जय बंगामविकारणकारण जय संगाटसदारणदारण

वीरविरुदम् ॥१९॥

[९३]

जय जय मुग्धलावण्यसागर जगदेकनागर महाराज तव चिकुर-शोभया विजितमभितो मया घनशिखिशिखि[ख]ण्डनिकुरम्ब तदव जय मोहितो नवजलदजन्मतो वहति सहिनटनमविलम्ब मणिकिरणसुरेन्दरेतर [व] हृदयमन्दिरे वसति कमलेदमरविन्दं भवति भवदाननं गलितशशिभाननं चलितमृदुभालतमकरन्दं उदयदलिवासनं भ्रुकुटिविशिखासनं तव नयनकोणगुणसारं वहति कुसुमायुधो मुग्धमिह नासिकातिकुसुमसायकमुदारं तव नयनखञ्जनं नियमयतु मञ्जसा समतनुत कुण्डलमुपाशं विधिरनि-(लि ?)कचन्दनाचारित बहुविन्दनासविधकृततण्डुलविकाशं

विमलमिदमानने वलति रदनद्वयं पर्णरसनसदपरदन्तैः किमु कमल-लालितं हिमकरकलायुगं वृतमरुणभानुभिरलं तैः जननयनदोलकौ तव नवकपोलकौ मदनमणिमुकुरसमनिपिहितचिबुकस्थलीदशनरुचिमण्डली वहति मणिदण्डमहिमानं कण्ठ इहमबन्धुरालपितमधुसिन्धुरावहति तव वीचिवलिभरेखाः मुकुटरविदारितश्रवणपुटशुक्तिका चलति रदमौक्तिकविशेषाः ॥

क्वलिक्वर्णक्वलिक्वा

[९४]

विद्युन्मालालीलाभाजौ राजन्नाजौ युष्मद्बाणाः ।
गत्वा गर्ज्जन्मातंगाली काली पालीमालीयन्ते ॥

[९५]

जय जय गगनगहन हयचयचलदलक सकलनय नयनतते
सरसरदनघननगनकदन गजगदन गणधर दहनहते ।
सरलसरलतरतरण जलजदलजयननयन लसदलसगते
चरणशरणनरतरणकरण जलकरणहरणशरधरणवते ॥

[९६]

आपूर्योदरमाशु, खण्डपरशो [ः] प्रव्यक्तमुद्भिद्यते
भालाक्षीक्षणतो धराधर भवच्चापप्रतापाङ्कुरः ।
जज्वालाजटिलो जहाति न मनाक् प्रालेयशैलोद्भवा-
गाढाश्लेषतुषारभानुसकलस्वर्ल्लोककल्लोलिनीः ॥

शोभनश्लोकाः

[९७]

जय जय मर्त्यमुकुट हयनृत्यसुबन्धुर ।
जय करखर्व्वतपनवरपर्व्वतसिन्धुर ।
जय रिपुसङ्घविपुलगजसिंहबन्धुर ।
जय भुवि हारविहितसुविहार सुकन्धर ।
जय हतलक्षधरणिधरपक्षपुरन्दर ।
जय परिपन्थिजलधि परिमन्थसि मन्दर ।
जय वरसद्मरुचिरतरपद्मवदिन्दिर ।
जय वरकुन्दरसिकभरसुन्दरमन्दिर ।
जय वरनागतरल[त्न?]शरणागतपञ्जर ।
जय शिरसीह निहिततुलसीतरुमञ्जर ॥

वीरविरुदम् ॥२०॥

[९८]

खलीलसंगमप्रसंगमर्दितावनीतलाः
कशाधिरोपन[ण]प्रकोपनर्तनैधशीतलाः ।
महासरित्तरंगनृत्यरंगदारितद्विषः
प्रकम्प्रवालधिप्रवालधिक्कृतारुणद्विषः ॥
वियद्विहारपण्डितद्विष[ख]ण्डितक्षपाकराः
सुपक्षकुन्तवच्छकुन्तवल्लभत्रपाकराः ।
वलक्षकेशवक्षपेशरश्मिगर्व्वमोचनाः
मरन्दपिच्छलीभवच्छिलीमुखाभलोचना ॥
अलोलकर्णशुक्तिकानिरुक्तकायशुद्धता-
स्त्रुटद्भुजंगवासमुद्रमासमुद्रमुद्धताः ।
समस्तराजमस्तराजमानरत्नवासरा-

धिराजबाह्वो महाह्वोपनद्धकन्धराः ॥
मरुत्तुलाभिपापवर्त्तुलानुतापधारिणः
सुलोह्वद्धटापसद्घटावलम्बकारिणः ।
पतस्यनौ समीभवत्यमी भवत्तुरंगमाः
सृजन्ति कन्धरामतिं धरा इवैकजंगमाः ॥

कलिकर्णकलिका

[९९]

अमित्रोदयत्रोटकाखेदभारैर्भवद्घोटका भूमिविस्फोटकाभाः
समीरापमानादमी राजमानास्तमोराजमानामयन्ति स्वपत्याम् ।
अदृश्या मुहुः शान्तयतः परागं तवामी शरा मीनकेतोरिवाश्वाः
श्मृशतो(न्तो)दिवं तोरणं तोलयन्तो व्रजन्तोऽनिलंतोह्वयन्तो जगन्ति ॥

[१००]

नटन्त इव सुच्छविस्फुरितपुच्छविस्फारणैः
प्रसन्नशशभृच्छिलासहजपिच्छिलांगद्विषः ।
अमी रणवसुन्धरामधि समीरणप्रक्रमाः
क्षमाधरतुरंगमा मम तु रंगमातन्वते ॥

शोभनश्लोकाः

[१०१]

सुवचनमलिनदलिनमकरन्द हिमरुचिहिमरुचिहसितमरन्द
गुणगणसदनवदनघनकुन्द तपदपरुजभुजमरकतकुन्द

प्रतिरथजलनिधिमथनमुकुन्द अविरतरणवितरणमुचुकुन्द
वदनविजितवरशरदरविन्द करतलचिरतलकृतकुरुविन्द
समदयसुतवरकरटिकलिन्द नृपतिमुकुटशतसतलिदलिन्द ।।

वीरविरुदम् ।।२१।।

[१०२]

नृत्यदमरभृत्यडमरनृत्यसमरमण्डला-
श्चित्तगमनदत्तशमनवित्तरमणदण्डनाः ।
तत्तदमलवृत्तपटलवृत्तसकलखण्डनाः
क्रुद्धचरणशुद्धमुशलयुद्धकुशलकण्डनाः ।।
सर्वललितगर्वगलितखर्वदलितसद्भटाः
स्तव्यकलितभव्यचलितनव्यतलित उद्भटाः ।
कम्पतलितसम्पललितचम्पललितलम्पटाः
सम्पदवनझम्पजवनकम्पिभुवनसम्पुटाः ।।
शृंगचरणरिंगदरणभुङ्गतरुणजंगमाः
संगिसुपुरभंगिमुखरतुंगशिखरसंगमाः ।।
त्वंगदमितटंगदमितभुंगनतभुजंगमाः
अंग दधति रंगमुंदयदङ्गतरतुरंगमाः ।।

कलिकर्णकलिका

[१०३]

स्फुटफेनमिषेण भवत्तुरणो(गो?)रमतीव विशुद्धमतीवयशः ।
खुरकुट्टितभूरथमूमितलं मृशतीव समीरतुलार्पणतः ।।

[१०४]

कमठपतिर्धर्लंफलति दलति कुञ्चति परिमीलति
भुजपद्मवाहकहकहकहति हन्त हालाहलमुज्झति;
जलधिजलं खलखलति मन्तमर्द्दनमनुविन्दति
रविरपि धरणिरजोभिरेष यामिन्यरविन्दति,
त्वयि तुङ्गतुरङ्गमरणजुषि धीरधरणिरपि धमधमति
पातालसमुल्लानबहलजलमखिलभुवनमपि सिमसिमति ॥

[१०५]

चत्वारोऽपि चतुर्द्दिगन्तगहनप्राकारपारङ्गमाः
श्रीखण्डैरभिमण्डिता भगवता निर्णीतमस्याङ्घ्रयः ।
मद्वै[त्वै?]तान् पुनरन्यघोटकघटासाध(धा)रणानुच्चकैः
पुण्याधारललाटके तिलकितस्त्वत्पञ्चकल्याणराट् ॥

शोभनश्लोकाः

[१०६]

सन्दलितकास कन्दलितहास तुन्दलितरास सुन्दरितनास मन्दरितवास कुन्दकृतवास कन्दरनिवास मन्दकृकलास वृन्दसविलास नन्दसुतलास ॥

वीरविरुदम् ॥२२॥

[१०७]

किसलयकञ्जारुणकर खरशरखञ्जायितपर गजवरगञ्जामुखरमधुव्रत सुव्रत जय जय ललितराजप्रशस्तिपञ्जिकाविराजमान महाराजकुलतिलक जय, आज्ञालङ्केश राज्ञामङ्केश कामनाकल्पवृक्ष नामनाशितविपक्ष शरणागतवज्रपञ्जर चरणानतराजकुञ्जर

शालग्रामशिलापवित्र महिपालग्रामकलालवित्र रोपरुद्रावतार कोषमुद्रावहार प्रतिष्ठापूरणपरशुराम अतिज्ञातपूरणपरशुराम अभिमानदुर्योधन अरियानपुरयोधन साहसैकमल्ल परदाहकैक-भल्ल सतिमिरपुञ्जक्षितिधरगुरुतर कुञ्जस्थितिपर करिवरगुञ्ज-न्म[धु]करनादरसादर ॥

कलिकर्णकलिका

[१०८]

स्वमते रमते भवता जनता वलते किल ते कमला विमला ।
तनुषे ननु खे विशिखाग्निशिखां त्वमुदारमुदा परितः स्फुरितः ॥
जय वीरवर स्फुटधीरतर त्वमनङ्गरमः परभङ्गयमः ।
अवदातवती तवता जगती कुरुषे युवतीः स्मरखेदवतीः ॥

[१०९]

स्फाराः कुण्डलिनः स्फुरन्ति परितः सिंहासनारोहण-
व्यापाराः प्रसरन्ति भान्ति चमरीपुच्छावघातक्रियाः ।
किञ्चान्यद् गिरिराजगव्हरजुषोऽप्येकाकिनस्त्वद्रिपो-
रुन्मीलन्ति पुरेव मत्तमहिषोदृप्यत्कटाक्षच्छटाः ॥

शोभनश्लोकाः

[११०]

आजिसप्त राजितप्त वीरदृप्त हीरलिप्त शोकमुक्त लोकयुक्त-रङ्गरक्त सङ्गसक्त ।

वीरविरुदम् ॥२३॥

[१११]

जय जय कामप्रतिमनिकामद्रविणसुपूरितपुरुषनिकाम,
जय रणरामभ्रमदभिरामभृकुटिवशीभवदुन्मदराम ।
जय रिपुजालस्फुटमृगजालस्वपुरवधूमुखमण्डितजाल,
जय करवालप्रथितप्रवालस्फुरदधरक्षणचुम्बितबाल ।
जय सुमृणालस्मितसुघृणालक्षितभुजनिर्ज्जितनोरजनाल ।
जय बहुकालध्वनदतिकालद्विरदघटाघनदुर्ज्जनकाल ।
जय महिपालप्रणतिकपालद्विदलितसर्वसगर्वकपाल,
जय रणतालध्वजकरतालप्रणयसलीलाचलद्भुजताल ।
जय नतमालप्रचुरतमालप्रतिभटकेशनिवेशितमाल,
जय भुवि शालप्रथितविशालद्युतिभुजघोरघनच्छविशाल ।
जय सदरालभृकुटिकरालक्वणितविनिर्ज्जितमत्तमृणाल,
जय सुरसालक्षितिसुरसालसुर[?]लसन्मदनासुरसाल ॥

कलिकर्णकलिका

[११२]

भवदमलगण्डगगनतलचण्डधनुरमृतभानुशकलमहसानु
ग्रहितनयनानि शशभृदुपलानि सपदि विलसन्ति बहलजलवन्ति,
जय चलमलिन्दकरिजितकलिन्दपरितलसदलिन्द नमदरिपुलिन्द
विकसदरविन्दचरणकुरुविन्दनृपकुशलवृन्दमनिशमनुविन्द ॥

[११३]

कण्ठे घण्टेव देवः कुमुदसुहृदयस्स्वर्धुनीमूर्द्धनीह
क्रामन्ती चामरत्वं रचयति रचनाभारवत्तारकौघः ।
मौलौ सिन्दूरबिन्दूभवति कमलिनीबन्धुरेष त्वदीयो
राजन्नाजन्मभूषामनुभवति नभःपञ्जरे पञ्जरेन्द्रः ॥

शोभनश्लोकाः

[११४]

सर्वदैव राजलोकगर्वशैवलानि कोकसेवनागतत्रिलोक देवनागपत्रिमोकदम्भवच्छरीररोग सम्भवत्तदीयशोक ।।

वीरविरुदम् ।।२४।।

[११५]

जय भूमिभूषणवदनपङ्कजहसितकोमलकेसर-
व्रजमिलितमत्तविलासिनीनयनालिभृङ्गतते ।
जय सन्तती[?]भवदवनिवल्लभमौलिकोटिकिरीट
दुर्ल्लभनीलरत्नसमुल्लिखन्नखचन्द्र चिह्नकृते ।
जय युद्धमेदिनिजनितचङ्क्रम राहुदर्पसमुद्र-
संक्रमसत्कृपाणसुखाभिसारिजगद्रमायुवते ।
जय दानवारिविवृद्धसागर जनितनव्ययशोनिशाकर
सम्पुटद्बलिकर्णकीर्तिसरोजशुद्धमते ।
जय सुन्दर द्विषदृष्टवारणपुण्डरीकनिकायदारण
विशिखशीतपरीतमु[?]कार्मुकमण्डलोडुपते ।
जय सर्वशत्रुकलत्रकुन्तलनद्धलोहितहस्तमण्डल-
सम्भवत्तिमिराधिरूढनवारुणोपमिते ।

कलिकर्णकलिका

[११६]

जय सद्गुणसिन्धो बहुजनबन्धो बन्धोपनतनृपतिनिचय
जय निर्भरमन्दारकमलरन्दारनन्दारचनरचनविनय ।
जय विक्रमसन्त्रोटितरिपुतन्तो सन्तोषितजनजनितनय ।
जय सुन्दररम्भावति परिम्भालम्भावुक जय नयविलय ।

युधि कुन्तकृपाणौ सरुधिरपाणौ पाणौ तरचिद्व्रमति वहति
परपत्तनलोका हरिहरि लोकालोकाचलगतिमुपदधति ।
अपि चञ्चलकालीभवदलकाली काली परिगतसुरयुवति
परितः करतालीजनितरुतालीतालीदलरुचिरिह नर्तति ॥

[११७]

दावाग्निर्नैव शारावधि शमितरिपुस्त्रैणदृग्बाणतृ(त्र?) द्भवो
दम्भोलिर्नायमम्भोनिधिवनवसि[स?]तिक्षोणिभिःक्षोभदक्षः ।
नार्कः कार्कश्यमञ्चन् परभुजविटपच्छाययाप्यां(?) प्रतीमः
प्रौढाहङ्कारलङ्कारमणघन भवद्वाहटापप्रतापः ॥

शोभनश्लोकाः

[११८]

जय विहसदङ्गनप्रचुर विमदङ्गनस्फुरितवरटङ्गनस्फुटघटित-रिंगन ॥

वीरविरुदम् ॥२५॥

[११९]

अवनतजम्भालम्भावन विहसितरम्भालम्भन गुरुतरदम्भालम्भणनामृतभावित जय जय निजवृत्तगन्धविस्मापितत्रिलोकलोकपालप्रभाव जय लोचनाञ्चलविकाशतः क्रि(कृ)तार्थीक्रियतामुदारदारुणान्धकारकवलितक्रोडपर्य्यन्तपरिखापदेशेन सकलजनचित्तवित्तापहारनिबन्धनं बन्धनमिवासादिता विरञ्चिविज्ञानविदूषकेण भवता बाहुशिफसम्भवेन सृष्ट्वाऽपि कष्टात् स्वपर्वसार्वभौमारचर्य्यमाणचिबुकलालनेन मसीभिरभिकुण्डलितासौधस्फुरद्भवनभित्तिगवाक्षमण्डलाननविनिर्यदङ्गनागणमृदङ्गगुड्गुमेन चलितकेतुकपंटकराभ्रमाहूतपुरहूतपत्तना मनोभवोन्मत्तविदग्धकामिनी

केलिकर्पूरपूरपांशुकदम्बडम्बरितमम्बरागणमलिन (निल) मन्दसन्दोलितध्वजवसनवर्द्धिनीभिरुपस्कुर्वती निजवल्लभदुर्लभानि रत्नानि यत्नादन्वेष्टुमागामिनीभिरिव समुद्रगामिनीभिः समन्ततोऽपि प्रणालिकाभिर(रा?)कालिकाम्बुसंवर्षणा क्वचिदिन्द्रनीलमणिशीलनेन सरसाभिसारिकानिकरसौभाग्यसम्पदे कुहूमहोत्सवमवतारयन्ति क्वापि च व्यापिचन्द्रावतदातसौधसंहतिचमत्कारेण चकोरचक्रवालरसनचातुरीपरीक्षणीयविशेषां राकामाकारयन्ति समस्तहरिदङ्गनाभरणरत्नशृङ्गाटकेयमागरा। बालाभालावतितिलकाला बालासित किल पालाजालानिलचलितालालक।

कलिकर्णकलिका

[१२०]

मणीभिरत्र यामिनी विदूरगामिनी कृता
यदीशितापि जापितोति भङ्गमङ्गनामुखैः।
प्रभाभिरुल्लसत्तृणा पतत्रिनायकाश्मनः
इयं विवस्वदर्वणामलीकचर्वणाकरो ॥

[१२१]

अङ्गैर्गाङ्गेयभङ्गैस्समरसहचरीबालवेशैश्च केशैर्दन्तैर्मुक्तालिकान्तैः स्फुटमधर···द्योतजालैः प्रवालैः।
हेमाम्भोजैरुरोजैर्बहुविषयमयीमात्मनैव द्वितीयां
हट्टामट्टालकस्थाः कमलदलदृशस्त्वत्करे कल्पयन्ति ॥

शोभनश्लोकाः

[१२२]

भालासितमुखभालासितमुख मालापितपरमालापित्तपर
बालारुणकरवालारुणकर।

वीरविरुदम् ॥२६॥

[१२३]

अथ पिञ्जरीकृतमञ्जरीविचलत्कशातकुलाकामिभिः[?]
सरसा रसा[ल]कुलैरलं बकुलैश्च विभ्रमगामिभिः [?]।
अलिरङ्कलक्षणसंकुलक्षणदाकरायतपुष्करैः
अवलम्बितद्युतिप्रतिबिम्बरम्यसरःकुलैः [?]॥
स्फटिकांशुभूतिविसर्प्पणस्फुरदग्रदर्पणमण्डला
मणिहर्म्यपालिकपोलललालितभानुमद्विधुकुण्डला ।
कनकानुविद्धघनीभवद्धरिनीलसौधर(व?)दम्बरा
सतलिङ्गनभ्रमपूरमत्तमयूरनर्त्तनडम्बरा ॥
प्रसरत्ययःकणचारुचिक्कणकुम्भकुञ्जरजातिनि—
ध्वनिता घनैरिव हट्टभैरवधूलिपूरणपातिभिः ।
दिवसक्षपाहटदनेकरत्नकपाटकूजितलम्भिता[?]
किमु कुम्भिकर्णनवीनवृन्तकवीजना सुखजृम्भिता ॥
मणिदस्युनीतम[न]स्विनीकथकैककैरवजागरा
चलकेतुकर्पटपङ्कलम्पटपण्यचत्वरसागरा ।
नवगानगुञ्जितकिन्नरीतनतन्नवीरसनागरा
परपातिसाह विभाति साहसमल्लपूरियमागरा ॥

कलिकर्णकलिका

[१२४]

अत्र सुन्दरीजनेन मल्लिकावलिभ्रमेण चीयते हि तावकालि-रञ्जताधिसौधपालि इन्दुरंङ्कुरुद्रहेमगोपुरागतश्चिरेण दावहव्य-वाहभोतिचञ्चलोऽभिचाकसीति एष मासि मासि देव भाति भङ्गुरोर(ऽ)त एव तुन्दिसञ्चिता सुधेति भूयशः प्ररोहमेति ॥

[१२५]

मुग्धापत्राणि मत्रालिकमधिवसुधा संविधाय स्पृशन्ति
क्रीडासौधे सुधांशुं कलितकरतलामर्शमादर्शबोधात् ।
अद्यापि द्रागुदीते शशभृति निभृतस्वामृतानामहिम्ना
दीर्घायुस्त(स्ता?)दृगम्भोरुहयुगलवलत्कज्जलस्यानुबिम्बः[?] ॥

शोभनश्लोकाः

[१२६]

जय परचन्दन नयतरुनन्दन धृतहरिवन्दन नतहरिचन्दन वरकरिविन्दन परपरिनिन्दन जगदभिनन्दन जितरघुनन्दन कृतरिपुक्र(क?)न्दन भियमिह विन्दन ॥

वीरविरुदम् ॥२७॥

[१२७]

स्कन्दाधिकबल मन्दायितनल सन्दारितपर टङ्गनरिङ्गन
कुन्दाकलितमरन्दाञलितरुकन्दाधि स्वयशोधनशोधन ।
वृन्दावनगतिसन्दानितमतिमन्दात्मजभावनपावन
इन्दाविह किल सन्दापिततुलकन्दाशयसि युदधतउद्धत ॥
विन्दादपि अनुविन्दादपि मुचुकुन्दादपि समिदङ्गनरिङ्गन
सुन्दादपि उपसुन्दादपिस्त्र(?)मुकुन्दादपि रणपण्डितमण्डित ।
मन्दानिलरतमन्दातिथिशतमन्दाकिनिकृतमज्जनसज्जन
वृन्दारुकवरवन्दारुकतर कं दारयसि न सद्भटमुद्भट ॥
स्यन्दानतमकरन्दापतदरविन्दाकुलशरशी(सी)तलशीतल
क्रन्दाकुलरिपुसन्दाहनिपुण बिन्दावपि न समस्तव सस्तव ।
द्वन्द्वारुणरणमन्दारकधन सन्दामयसि परं जनरञ्जन

स्यन्दालसकरिवृन्दाभिनवकलिन्दानतकर सूरज सूरज ॥
तुन्दानतकुरुविन्दायितकरकुन्दायतभुजसिन्धुरकन्धर
निन्दारहितपुलिन्दाधतिकधतिन्दाविति सूरजक्कणचिक्कण ।
मन्दाकिमलकनन्दानकनकसन्दायशशातवसानव
नन्दानयनमलिन्दाटविसमसन्दाहितकुजनालय पालय ॥
नन्दारतिलसदलिन्दावनतसनन्दाधिकमुनियाजनभाजन
विन्दाधिकशिवमिन्द्रादपि नवनन्दाधिकजनवन्दितनन्दित ।
सुन्दासमिव न कन्दानवमिह चन्द्रानन कुरुषे चितरेचित
सन्दानय द्युतिनकन्दामनिजलवृन्दावपि तृषितं नृपतिं नृप ॥

कलिकर्णकलिका

[१२८]

तव नृत्यति नृत्यमधोमुकुलत्करवारिरुहं तरवारितमः
स्फुटमप्सरसामभिसारमतः क्षितिवल्लभ ते रमतेऽरिभटः ।
बहुशो बहुशो भरणाभरणायितरङ्गतरङ्गमुदग्रहयः
भ्रमसि त्वमसि स्फुटबाहुमुखाहुतराजतराजकिरीटविधुः ॥

[१२९]

नीतं सिंहासनं चेदपहृतमचिराच्चामरं चातपत्रं
का हानिः पातिसाहान्वयतिलक तव द्वेषिणां प्रादुरासीत् ।
आसीनाः शैलशृङ्गोपरि सरिदमलस्रोतसा वीज्यमाना-
स्ते सद्यः स्त्रासपाणाकुलितफणिफणच्छायमह्नाय भेजुः ॥

शोभनश्लोकाः

[१३०]

कालानलकटकालारविकटकाला गुरुतिलकासित किल कालादपि बहुकालाधिकश शुकालापनकनकालासितजनकालाघव-घटकालानितघट ॥

वीरविरुदम् ॥२८॥

[१३१]

मदिरारसपानसुविक्रियमानसरोजसमानदृगन्तधराः
स्फुटनग्रसमग्रपिस(ष)ङ्गिमसम्मतगुम्फविगुम्फनलोलकराः ।
सरलीभदृढतवनू(?)रुहराजिविराजितनिर्म्मलगण्डयुगाः
परितोऽपि तरङ्गितभृङ्गकदम्बकचुम्बितचारुसरोजमुखाः ॥
श्रुतिसीमनिखातशिखावनमुद्गरभुग्नितकुन्तलबद्धपटाः
पृथिवीधरदुर्द्धरकन्धरसीमसमिद्धसमिद्धतशत्रुभटाः ।
मुखसेवनमेचकचन्द्रचमत्कृतपृष्ठविलम्बितचर्मधराः
किमु कृद्यमुखद्युतिदीपतलस्थलगूढसमूढतमःप्रकराः ॥
रणवर्तितशत्रुकदम्बकनाकुनिरङ्कुशकुण्डलिकुन्तयुता-
स्त्रिकबद्धसमुद्धतराजशिरोरसमत्तनसत्तरवारिलताः ।
मुदितेशनिदेशवचोयमजोकृतजीवनदुष्करकर्मगणा-
स्तव भूप चिरादनुरूपतरा विलसन्ति दुरन्तपदातिजनाः ॥

कलिकर्णकलिका

[१३२]

प्रलयानलकीला खरतरशीला लीलावति नयनत्वरिता
प्रसरद्रणकर्म्मठचिक्कणचर्मठणत्कृतशत्रुशरस्फुरिताः ।

समरोदधिकंका गुरुतरलङ्काहङ्कारत्रुटितघनाः
प्रचलन्ति विशङ्कममी यमकिङ्करमत्तमहोपतिपत्तिगणाः ॥

[१३३]

चेतांसीव दृगन्तचङ्क्रमकृतः कान्तादृगन्ता इव
द्रागामूढपराः शरा इव समित्यग्रे कृतस्वाननाः ।
शौर्यालङ्कृतयो निजप्रभुमनोदृक्सूत्रसञ्चारिणः
स्वामिन्नभ्रपदातयस्तव कथङ्कारं गिरां गोचराः ॥

[१३४]

रङ्गितरङ्गितदृक्कमले कमलेस(श)पदप्रथितावनतौ वन-तौल्यगतारिकदम्बपुरे वपुरेधितविभ्रमपञ्चशरे च शरेण वशीकृतसर्वनरे वनरेचितशत्रुकुरङ्गगणे गगणेऽपि लसद्वरवाजिविलासे लासविशेषमदप्रमदे प्रमदेभसमुल्लसमानगतौ नगतौल्यसलज्जभुजा-भुजगे भुजगेष्टतराङ्गदचारुरुचौ रुरुचौरविलासवलन्नयने नयनेत्र-विलोकितलोकमते कमतेशवलद्भ्रुजदर्पविकाशे काशविसर्पियशः पटलीपटलीनसमस्तहरिन्महिले महिलेपितविप्रियवृन्दवसे दवसेवन-विज्ञनीहरिपौ हरिपौरुषविन्दिभुजायुगलीयुगलीढनरेस(श)वृषालि-मदे(ऽ)लिमदेकसुतुङ्गमदङ्गविहारे हारविनिर्मितसत्परिवेषसुवेषसु-धानिधिशोभिमुखेऽभिमुखे बहुयाचकदेवतरौ बत रौद्रविलासकला-गिरिशे गिरिशेषरनिष्ठुरकामधुरामधुरापरिरम्भमहारसिकोरसिको न नतस्त्वयि दिग्गजसारे ॥

शोभनश्लोकाः

[१३५]

सुविशदवदनविनिन्दितहिमकर मलयजरसरुचिमन्दितहिम-कर हरिपरिचरणविलम्बितमुनिवर अवनिपनिकरकरम्बितपरिकर

कुलजलनिधिजलमण्डलशशधर मणिविनिहितरुचिकुण्डलवरधर
रयमयतुरगतरङ्गितसुरपुर मतिविमलिमचिरचङ्गिमसुमधुर
विलपितलसितभटीकृतरतिभर सतिमिरकुहरकुटीगतनिजपर ।।

वीरविरुदम् ।।२६।।

[१३६]

जय जयोद्दालसिंहविक्रीडमत्तमातङ्गखेलितकुसुमस्तबकदाम-वितानवर्तुलाचलचण्डललितकामबाणाशोकमञ्जर्यनङ्गशेखरभुज-ङ्गविलासमेघमालाख्यचण्डवेगसिंहविक्रान्तप्रचितकचण्डकीलचण्ड-वृष्टिप्रपातार्ण्णार्ण्णवव्यालजीमूतलीलाकरोद्दामशङ्खार्कचन्द्रेशभो-गीन्द्रपीयूषवाराहवातपन्नगेन्द्रदम्भोलिहेलावतीमालतीकेलिकङ्के-ल्लिलीलाविलासप्रमुखदण्डकद्योतितप्रताप ।

जय जय तगणतिरस्कारिवर्णत्रयोपरिसप्तदशवर्णावधिक-साधारणसहितपुरुषोत्तमतिलकाच्युतवर्द्धितरवीरभद्रसाकमातङ्ग-खेलितोत्पलगुणवति कल्पद्रुमकन्दलितापराजितयति नर्तनतरत्समस्तवेष्टनास्खलितपल्लवित समग्रतुरगात्मकविरुदविशङ्कवर्णनी-यानुभाव ।

जय दिगावादिमादिनादिगानादिविश्रामध्याद्विभङ्गीत्रिभ-ङ्गीसङ्गीतगुणतया पारिजात इव नवकलिकाभिराम ।

जय जय विदग्धतुरगद्यपद्यहरिणप्लुतनर्तकभुजगवल्गिता ललितायुगभेदिता द्विपदत्रिगतावरतनुच्छविमुग्धामध्याप्रगल्भाशि-थिलामधुरातरुणिषड्भेदितद्विपादिकामयत्रिभङ्गिप्रपञ्चसञ्चारित-गुणग्रामसामन्तचक्रचूडामणिमुषितसिंहासनक्रोडकुञ्चितान्धकार ।

जय जय महाराज एकैककलिकाश्लोकविरुदात्मकत्रिकरचित-विरुदावलीनिबद्धोलपनभवद्गुणाम्भोधिपुञ्जपारञ्जिगमिषव [?] क इव न लज्जते महाकविः । यदपि नाम त्रिकस्य जातिपर-

निर्द्देशमादिशन्तोऽर्व्वाचीनसमीचीनकवयो बहूनि पद्यानि समाचरन्ति तथापि पञ्चोपरित्रिंशदवधिकान्येव त्रिकानि द्विचतुःषट्दशकलान्येव विरुदानि द्वादशोपरि चतुःषष्ठिपर्यन्त एव कला एव कलिकाः, तदेव देव चिन्तयामः । प्रबन्धपरार्द्धमन्तरा क इव तावकीनगुणबिन्दुमप्यान्दोलयतु ॥

कलिकर्णकलिका

[१३७]

जहांगीर महावीर ध्रुवं सामाजिको गुणः ।
यतो युष्मत्करगता लक्षदानपराः शराः ॥

शोभनश्लोकाः

[१३८]

ह्लादिनीह्लदपरिप्लवगृहिणीग्लपितारिर्भव ।

वीरविरुदम् ॥३०॥

[१३९]

कान्त्या च प्रतिकर्मसञ्जनितया कीर्त्त्याव सर्वाधिकः
कुर्व्वाणोऽर्ज्जुनवत् पतङ्गसुतवत् प्रत्यर्थिदानोत्सवान् ।
राज्ञां च प्रतिहारदण्डदलनं वैरिस्त्रियाश्चादधद्
भूप ब्रह्मवयोऽनुरूपमुभयं विस्तारयायुर्यशः ॥

[१४०]

तादृक्सप्तसहोदरैकवलभीमूर्द्धन्यरत्नाङ्कुर–
श्रीभाजं चरणं महीपतिगुरोर्न्नत्वा मया गुम्फिते ।
ग्रन्थेऽस्मिन्मुदमश्नुतात्कुमुदिनी माताऽथ मातामहः
श्रीमानच्युतठक्कुरो जनयिता सन्मिश्रविश्वेश्वरः ॥

इति श्रीहरिताम्रकुलकर्णपूरमैथिलमयूरनवनीरदश्रीजहांगीर-कुलवन्दिष्यमान(ण)श्रीहरिदेवमिश्रविरचिता विरुदावली सम्पूर्णा॥[1]

---

१. लिपिकर्त्रा पद्यद्वयमिदं ग्रन्थान्ते लिखितम्—
युगशशाङ्कमुनीन्दुसमे १७१२ शके तुरगसप्तकलम्बकचन्द्रके । १५१७
धवलपक्षकसंयुतभाद्रके विधुजवारयुतो नवमीतिथौ ॥१॥
त्रिदशलोकसदर्च्यगिरीन्द्रयोश्चरणयुग्मसरोरुहषट्पदः ।
समलिखन्मणिकण्ठसुतः स्वयं हरिपुरे विरुदावलिकां शुभाम् ॥२॥
॥ श्रीः ॥

सिद्धान्तलक्षणजगदीशीव्याख्या

पण्डित श्रीकृष्ण माधव झा

साध्यतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यघटितकल्पे स्ववृत्तिभेदीय घटत्वावच्छिन्नप्रतियोगितासंबन्धेन घटः पटवान् घटत्वादित्यत्र तेन संबन्धेन हेत्वधिकरण-वृत्तिसाध्यतावच्छेदकत्वाभावस्य प्रतियोगिवैयधिकरण्यविरहेणान्याभावप्रतियोगिनः साध्यतावच्छेदकसंबन्धेनाधिकरणाप्रसिद्ध्या तत्राव्याप्तिवारणाय साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववती या प्रतियोगिव्यधिकरणहेतुसमाना-धिकरणाभावीया प्रतियोगिता तदवच्छेदकत्वीयस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावः साध्यता-वच्छेदके विवक्षणीयः। एवञ्च घटः स्ववृत्तिभेदीयघटत्वावच्छिन्नप्रतियोगितासंबन्धेन-पटवान् घटत्वादित्यत्र साध्यतावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतु-समानाधिकरणघटाभावीयप्रयोगितावच्छेदकत्वस्य साध्यतावच्छेदके पटत्वे व्यधिकरण तादृशस्वरूपसंबन्धावच्छिन्नाभावसत्त्वान्नाव्याप्तिः। घटाभावीयप्रतियोगितायां संयोग-संबन्धावच्छिन्नपटत्वावच्छिन्नप्रतियोगिताकसाध्यवद्वृत्त्यभावीयत्वस्य विरहेण तादृशो-भयाभावो वर्तते। स्ववृत्तिभेदीयप्रतियोगितासंबन्धेन तदभावप्रतियोगिनोऽधिकरणत्वं घटें प्रसिद्धम्। साध्यतावच्छेदकव्यधिकरणसंबन्धेन हेत्वधिकरणे घटाभावः प्रतियोगि-व्यधिकरणश्च। एवं रीत्या स्थलान्तरेऽपि बोध्यमिति निरस्तम्। अवच्छेदकतावान् वाच्यत्वादित्यत्र साध्यतानिरूपितावच्छेदकत्वाभावीय प्रतियोगितावच्छेदकत्वस्य साध्य-तावच्छेदके सत्त्वेनाव्याप्तेः। साध्यतावच्छेदकत्वाभावभिन्नाभावीयप्रतियोगितायां साध्य-वद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयस्य सत्त्वेन तदुभयाभावात् अभावान्तराणां न लक्षणघटकत्वम्। साध्याभावीयप्रतियोगितायां साध्यतावच्छेदक-तात्वानवच्छिन्नत्वाभावेन तादृशोभयाभावो वर्तत इति भवति साध्यभावो लक्षणघटक इति तत्राव्याप्तिरिति बोध्यम्।

अथ प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यं वाच्यम्। तथा च

प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्यतावच्छेदकत्वाभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसंबन्धस्य व्यधिकरणत्वेन तेन संबन्धेन साध्यतावच्छेदकत्वाभावप्रतियोगितावच्छेदकत्वाभावस्य केवलान्वयित्वेन न क्वापि अव्याप्तिसंभावना। अस्मिन् लक्षणे साध्यतावच्छेदकत्वानवच्छिन्नत्वं द्विधा प्रविष्टम्। संबन्धे, उभयाभावप्रतियोगिकोटौ च। उभयत्र प्रकृत-साध्यघटितावच्छेदकतात्वानवच्छिन्नत्वं बोध्यम्। यदि संबन्धे प्रकृतेत्यस्याप्रवेशः। तदा घटत्वावछिन्नसाध्यतावच्छेदकतावान् वाच्यत्वादित्यत्रातिव्याप्तिः। प्रतियोगिता-वच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणघटत्वावछिन्नसाध्यतावच्छेद-कतात्वावछिन्नप्रतियोगिताया यदवच्छेदकत्वम् अवच्छेदकतात्वम् तदभावस्य साध्यता-वच्छेदकतात्वान्न प्रतियोगितावच्छेदकत्वीयस्वरूपरूपव्यधिकरणसंबन्धावच्छिन्नप्रति-योगिताकस्य घटत्वावच्छिन्नसाध्यतावच्छेदकतात्वे साध्यतावच्छेदके सत्त्वात्। संबन्धे प्रकृतत्वस्य निवेशे नोक्तदोषः। घटत्वावच्छिन्नसाध्यतावच्छेदकतात्वरूप प्रकृतसाध्यता-वच्छेदकनिष्ठ साध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगिकस्वरूपसंबन्धेनप्रतियोगिता-वच्छेदकत्वस्यावच्छेदकतात्वस्य साध्यतावच्छेदके सत्त्वेन तस्य सामाना-धिकरण्यसंबन्धत्वमिति तेन संबन्धेन प्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदकेऽ-सत्त्वात्।

उभयाभावघटके साध्यतावच्छेदकतात्वानवच्छिन्नत्वेत्यत्र प्रकृतत्वस्यानिवेशे, अवच्छेदकतावान् वाच्यत्वादित्यत्राव्याप्तिः। पटत्वादिरूपहेत्वधिकरणवृत्तिप्रति-योगिव्यधिकरणाभावीया यः साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वान वच्छिन्नत्वोभयाभाववती घटत्वावच्छिन्न साध्यतावच्छेदकतानिष्ठा प्रतियोगिता तन्नि-रूपितघटत्वावच्छिन्नसाध्यतावच्छेदकतात्वनिष्ठावच्छेदकतायाः प्रकृतसाध्यतावच्छेद-कतात्वनिष्ठ साध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगिकस्वरूपसंबन्धो न व्यधिकरण-संबन्धः, इत्येतत्स्वरूपसंबन्धेन तादृशप्रतियोगितावच्छेदकत्वाभावस्यावच्छेदकतात्वे साध्यतावच्छेदकेऽसत्त्वात्। प्रकृतसाध्यघटितावच्छेदकत्वस्य अवच्छेदकत्वस्य प्रतियोगिता-वच्छेदके घटत्वावच्छिन्नसाध्यतावच्छेदकतात्वे प्रविष्टत्वात्। तत्र प्रकृतत्वस्योपादाने तु नोक्तदोषः। घटत्वावच्छिन्नसाध्यतावच्छेदकतात्वे प्रकृतसाध्यतावच्छेदकतात्वपर्याप्ता-वच्छेदकताया अभावेन प्रकृतसाध्यतावच्छेदकतात्वानवच्छिन्नत्वस्य तत्र सत्त्वेन तादृश-

प्रतियोगितावच्छेदकत्वप्रतियोगिकस्वरूपसंबन्धस्य साध्यतावच्छेदकत्वव्यधिकरणत्वेन तेन संबन्धेन तदभावस्य साध्यतावच्छेदके अवच्छेदकतात्वे सत्त्वेनाव्याप्तेरभावात्। प्रकृतसाध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूपसंबन्ध इत्यत्र, उभयाभावघटके प्रकृतसाध्यतावच्छेदकतात्वानवच्छिन्नत्वेत्यत्र च प्रकृतसाध्यतावच्छेदक निष्ठावच्छेदकतात्वानवच्छिन्नत्वं न वक्तव्यम् । अन्यथा घटत्वनिष्ठावच्छेदकतावान् वाच्यत्वादित्यत्रातिव्याप्तेः । घटत्वनिष्ठावच्छेदकत्वे साध्ये घटत्वस्यापि साध्यतावच्छेदकतया साध्याभावप्रतियोगितायां साध्यतावच्छेदकघटत्वनिष्ठावच्छेदकतात्वानवच्छिन्नत्वविरहेण साध्याभावीयप्रतियोगितायां साध्यवद् वृत्त्यभावीयत्व, साध्यतावच्छेदकनिष्ठावच्छेदकतात्वानवच्छिन्नत्वोभयाभावस्य सत्त्वेन प्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके घटत्वनिष्ठावच्छेदकतात्वे सत्त्वात् । तादृशसंबन्धस्य व्यधिकरणत्वात् । उभयाभावघटकप्रकृतसाध्यतावच्छेदकत्वत्वानवच्छिन्नत्वस्योपादाने तु नोक्तदोषः । साध्याभावीयप्रतियोगितायां तदुभयाभावस्य सत्त्वेन साध्याभावस्य लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वस्य समानाधिकरणतादृशस्वरूपसंबन्धेन साध्यतावच्छेदके सत्त्वेनातिव्याप्तिविरहोपपत्तेः । संबन्धकोटौ साध्यतावच्छेदकनिष्ठावच्छेदकतात्वानवच्छिन्नत्वस्योपादाने तु अवच्छेदकतावान् वाच्यत्वादित्यत्र साध्यतावच्छेदकतात्वनिष्ठावच्छेदकत्वाभावमादायाव्याप्तिः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरण साध्यतावच्छेदकतात्वनिष्ठा (अवच्छेदकतात्वनिष्ठा)वच्छेदकत्वाभावीया साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववती या अवच्छेदकतात्वनिष्ठावच्छेदकत्वाभावीयप्रतियोगिता तन्निरूपितावच्छेदकत्वस्य साध्यतावच्छेदकतात्वे सत्त्वात् । अतस्तत्राव्याप्तिवारणायोभयाभावकोटावपि साध्यतावच्छेदकनिष्ठावच्छेदकतात्वानवच्छिन्नत्वं तादृशप्रतियोगितायां न प्रवेश्यम् । एवञ्च साध्यतावच्छेदकत्वोभयाभावमादायातिव्याप्त्यसंभवेऽपि पूर्वकल्पवत् साध्यतावच्छेदकतात्वानवच्छिन्नत्वं साध्यतावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वरूपं न वाच्यमिति चेत् उच्यते । वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वपक्षे सः परमाणुः स्ववृत्तिभेदीयैतत्परमाणुत्वावच्छिन्नप्रतियोगितासंबन्धेन एतत्परमाणुमान् परमाणुत्वादित्यत्र व्यभिचारिणि साध्यतावच्छेदकवृत्त्यनियामकसंबन्धेन साध्य-

संबन्धिनि संबन्धान्तरावच्छिन्नसाध्याभावस्य वृत्तित्वेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्याभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्वस्य सत्त्वेन साध्यतावच्छेदकत्वाभावमादाय तत्रातिव्याप्तिः। तादृशसाध्यतावच्छेदकत्वाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावस्य सत्त्वेन तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्। सिद्धान्ते तत्र नातिव्याप्तिः। साध्यतावच्छेदके प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्याभावप्रतियोगितावच्छेदकत्वस्यैव सत्त्वात्। यदि सिद्धान्ते गगनादेः कालिकसंबन्धेन वृत्तित्वपक्षे कालो घटवान् महाकालत्वादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिः; तद्वारणाय प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायां यत्संबन्धावच्छिन्नत्व, यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वक्तव्यम्। एवं सति धनी चैत्रत्वादित्यत्राव्याप्तिः। साध्यतावच्छेदकस्वामित्वसंबन्धस्य वृत्त्यनियामकत्वेन प्रतियोगितानवच्छेदकत्वमिति हेतुसमानाधिकरणाभावीयप्रतियोगितायां यत्संबन्धावच्छिन्नत्वघटितोभयाभावस्याप्रसिद्धेः। तत्राव्याप्तिवारणाय वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वं स्वीकार्यम्। किं वा। स्वावच्छेदकताघटकसंबन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्व, यत्संबन्धावच्छिन्नावच्छेदकत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिः। अस्मिन् कल्पे धनी चैत्रत्वादित्यत्राव्याप्तिवारणाय वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वं स्वीकार्यम्। किं वा। तादृशप्रतियोगितावच्छेदकतायां साध्यवद्वृत्त्यभावीयप्रतियोगितानिरूपितत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावः। साध्यतावच्छेदकतात्वानवच्छिन्नावच्छेदकत्वीयस्वरूपसंबन्धावच्छिन्नतादृशावच्छेदकत्वाभावः साध्यतावच्छेदके विवक्षणीयः। प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकानधिकरणत्वघटितं प्रतियोगिवैयाधिकरण्यञ्च विवक्षणीयम्। महानसीयवह्निमद्भेदमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावो न निवेश्यः। हेत्वधिकरणे समवायेन वह्निमद्भेदमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां

साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्व साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावो न विवक्षणीय इति सिद्धान्तकल्पापेक्षयाऽस्मिन् कल्पे लाघवम्। एवञ्चास्मिन् कल्पे तत्परमाणुः स्ववृत्तिभेदीयैतत्परमाणुत्वावच्छिन्नप्रतियोगितासंबन्धेन एतत्परमाणुमान् परमाणुत्वादित्यत्र घनी प्रमेयत्वादित्यत्र च नातिव्याप्तिः। हेत्वधिकरणे वृत्त्यनियामकसंबन्धेन साध्याभावस्य लक्षणघटकत्वेन तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वादित्युच्यते। तदापि गगनादेरवृत्तित्वपक्षे तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकघटित यथाश्रुते साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वमेव लक्षणघटकाभावीयप्रतियोगितायां निवेशनीयम्। सिद्धान्तभिन्नेऽस्मिन् कल्पे प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावो निवेश्यते। सिद्धान्ते च प्रतियोगितायां तदुभयाभावो निवेश्यते इत्यणुरपि विशेषोऽध्यवसायकर इति न्यायाल्लाघवम्।

ननु गगनादेः कालिकेन वृत्तित्वपक्षे किमिति लघुभूतस्यानुपदोक्तव्याप्ति-लक्षणस्य न लक्षणत्वमिति चेच्छृणु। प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावीया या साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववती प्रतियोगिता तन्निरूपितावच्छेदकतात्वावच्छिन्ना प्रकृतसाध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगित वच्छेदकत्वप्रतियोगिकस्वरूपसंबन्धावच्छिन्ना प्रतियोगिता तन्निरूपकाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः। साध्यवद्वृत्त्यभावीयत्वञ्च साध्यवन्निरूपितवृत्तितावच्छेदकानुयोगिताविशिष्टत्वम्। वै०। स्वनिरूपितत्व, स्वनिष्ठानुयोगित्वानिरूपितत्वोभयसंबन्धेन। अस्य सद्धेतोः व्याप्तिलक्षणत्वं न वारयामः, किन्तु अनुमित्यनुकूलत्वव्याप्तित्वं वारयामः। अन्यथा विनिगमनाविरहेण साध्यतावच्छेदकतात्वानवच्छिन्नत्वघटितोभयाभावस्यैव प्रकृतानुमितित्वानवच्छिन्नत्वं, साध्यवद्वृत्त्यभावीयत्वोभयाभावघटितस्य साध्यतानिरूपित संसर्गत्व, तदवच्छेदकत्व, तदवच्छेदकत्वाद्यनवच्छिन्नत्व, साध्यवद्वृत्त्यभावीयत्वोभयाभावघटितस्य व्याप्तित्वापत्तेः।

साध्यवद्वृत्त्यभावीयत्वप्रकृतानुमितित्वावच्छिन्नत्वोभयाभाववती या लक्षणघटकाभावीया प्रतियोगिता तन्निरूपितावच्छेदकतात्वावच्छिन्ना साध्यतावच्छेदकतात्वानव-

च्छिन्नप्रतियोगितावच्छेदकत्वप्रतियोगिकस्वरूपसंबन्धावच्छिन्ना प्रतियोगिता तन्निरूपका भाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । एवं साध्यतावच्छेदकत्वत्वानवच्छिन्नत्वादिघटितोभयाभावघटितं व्याप्तिलक्षणमूह्यम् ।

ननु लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावघटितस्यैवानुमित्यनुकूलत्वम्; इतरेषां लक्षणघटकाभावीयप्रतियोगितायामुभयाभावसंपादनार्थत्वमित्यत्र किं विनिगमकमिति चेच्छृणु । मूलस्थसिद्धान्तव्याप्तिलक्षणपदैः, प्रतियोगि,प्रतियोगितावच्छेदक, साध्यतावच्छेदकादीनाञ्चोपस्थितयः क्लृप्ताः तत्तत्पदेभ्य एव तेषामुपस्थितय इत्यक्लेशकल्पनञ्च भवति । साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावघटितानां व्याप्तिलक्षणानाञ्च मूललक्षण प्रतिपाद्यत्वं नास्तीति क्लेशेनाक्लृप्तकल्पनं भवति । तथा च प्रकृतानुमितितद्विधेयत्वादेश्चोपस्थितिः सिद्धान्तलक्षणघटकपदैः भवति नवीनलक्षणपदैर्न भवति क्लेशाक्लेशयोर्विनिगमकत्वं गृहाण ।

एतेन वृत्त्यनियामकसंबन्धसाध्यतावच्छेदकव्यभिचारिणि (साध्यतावच्छेदकवृत्त्यनियामकसंबन्धकव्यभिचारिणि, प्रमेयधनवान् चैत्रत्वादित्यादौ) साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसंबन्धितात्वान्यतरविशिष्टा भावमादायातिप्रसक्त्यभावेऽपि न क्षतिः ।

न च वह्निमतः तादात्म्येन साध्यतायां धूमे पर्वतः तादात्म्येन बह्निमद्वान् धूमादित्यत्र तादात्म्येन वह्निमतो बह्नेः तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकभेदः हेत्वधिकरणे पर्वते साध्यतावच्छेदकतादात्म्यसमवायान्यतरसंबन्धेन प्रतियोगिव्यधिकरणः तदीयबह्निनिष्ठप्रतियोगितायां साध्यतावच्छेदकबह्निवृत्तित्वेन साध्यतावच्छेदकावृत्तित्वाभावात् साध्यतावच्छेदकावृत्तित्व साध्यवद्वृत्तियभावीयत्वोभयाभावस्य सत्त्वेन तत्प्रतियोगितावच्छेदकबह्निनिष्ठावच्छेदकत्वस्य साध्यतावच्छेदके बह्नौ सत्त्वेन तदभावस्यासत्वादव्याप्तिरिति वाच्यम् । साध्यवद्वृत्त्यभावीयत्व, यत्किञ्चित्साध्यतावच्छेदकावृत्तित्वोभयाभाववती या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया प्रतियोगिता तदवच्छेदकत्वाभावस्य लक्षणघटकाभावीयप्रतियोगितावृत्त्युभयाभावीयप्रतियोगिता-

निरूपितपरंपरावच्छेदकतावत्साध्यवताच्छेदकावृत्तिप्रतियोगितावच्छेदकत्वीयस्वरूपसंवन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदके विवक्षणेनादोषात् । तादात्म्येन वह्निमतो वह्नेर्भेदीयप्रतियोगितावच्छेदकवह्निवृत्त्यवच्छेदकत्वस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणवह्नि मद्वह्निभेदीयप्रतियोगितावृत्तितादृशाभावीयप्रतियोगितापरंपरावच्छेदकतावत्साध्यतावच्छेदकावृत्तिर्या प्रतियोगिता घटाद्युदासीननिष्ठा तदवच्छेदकत्वीयस्वरूपस्य व्यधिकरणतया तेन स्वरूपेण तादृशप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके सत्त्वात् । साध्यतावच्छेदकावृत्त्यवच्छेदकत्वप्रतियोगिकस्वरूपसंवन्धः साध्यतावच्छेदकावृत्त्यवच्छेदकत्वस्य व्यधिकरणः । धूमवान् वह्नेरित्यत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्याभावीयप्रतियोगितावृत्त्युभयाभावीयप्रतियोगितायाः परंपरावच्छेदकतावद्धूमत्वनिष्ठावच्छेदकत्वीयस्वरूपस्य समानाधिकरणसंवन्धत्वमिति तेन संवन्धेन तादृशोभयाभाववत् तादृशधूमाभावीयप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके धूमत्वेऽसत्त्वान्नातिव्याप्तिः । ननु वह्निमान् धूमादित्यत्र हेत्वधिकरणे पर्वते वह्निवह्नित्वोभयं नास्तीत्यभावभादायाव्याप्तिः । साध्यतावच्छेदकवह्नित्वनिष्ठायां तदीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकावृत्तित्वोभयाभावस्य सत्त्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदके वह्नित्वेऽसत्त्वादिति चेन्न । प्रतितोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकातिरिक्तवृत्तित्वोभयाभावविवक्षणेनादोषात् । वह्निवह्नित्वोभयाभावीयप्रतियोगितायां तदुभयस्य सत्त्वेन तदुभयाभावस्यासत्त्वात् वह्निवहित्वोभयाभावो न लक्षणघटक इति । एवं सामान्यधर्मावच्छिन्नाधिकरणत्वास्वीकारे साध्यवत्त्वस्य पारिभाषिकस्य (साध्यतावच्छेदके यन्निरूपितनिरूपकतानवच्छेदकत्व, सामान्यतोऽधिकरणतावच्छेदकत्वोभयाभावस्तदेवसाध्याधिकरणम् (साध्यवदिति) इतिवक्तव्यतया नवीनलक्षणे सिद्धान्तलक्षणापेक्षया लाघवाभावोऽपि प्रत्युत गौरवम् । अस्य सिद्धान्तलक्षणेऽप्रवेशात् । हेत्वधिकरणत्वं तु उभयलक्षणसाधारणम् । अन्यथा साध्यवत्त्वाप्रसिद्ध्या नवीनलक्षणासंभवात् । विशेषरूपेणसंसर्गत्वास्वीकारपक्षे साध्यतावच्छेदकतात्त्वानवच्छिन्नप्रतियोगितावच्छेदकत्त्वीयस्वरूपसंवन्धो विशेषः । तस्यास्वीकारे, एतत्संवन्धावच्छिन्नप्रतियोगितावच्छेदकत्त्वाभावः सध्यतावच्छेदके निवेशयितुमशक्य इति लक्षणमितितत्पक्षे न संभवतीति ।

अतएव (विशेषरूपेण संसर्गत्वास्वीकारादेव) परिष्कृतसाध्यतावच्छेदका

तिरिक्तधर्मानवच्छिन्नप्रतियोगितावच्छेदकत्वीयस्वरूप संबन्धावच्छिन्ना प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकातात्वावच्छिन्नाप्रतियोगितातन्निरूपकाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । प्रतियोगिवैयधिकरण्यञ्च प्रतियोगितावच्छेदकसंम्बन्धेनैव ग्राह्यम् । नातः तादात्म्यसमवायान्यतरसंम्बन्धेन वह्निसाध्यके वह्निः वह्निमान् वह्नित्वादित्यत्र समवायरूपसाध्यतावच्छेदकसंम्बन्धेन तादात्म्यसंम्बन्धावच्छिन्न प्रतियोगिताकसाध्यतावच्छेदकाभावस्य हेत्वधिकरणे वह्नौ वह्नित्वस्य सत्त्वेन प्रतियोगिसमानाधिकरणत्वात् प्रतियोगिवैयधिकरणत्वाभावेनाव्याप्तिः । तादात्म्यसंबन्धेन वह्नित्वं नेति प्रतीतिसिद्धाभावे हेत्वधिकरणे वह्नौ साध्यतावच्छेदकसमवायसंबन्धेन प्रतियोगिसामानाधिकरण्यं हेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व साध्यतावच्छेकावृत्तित्वोभयस्य सत्त्वेन न तदुभयाभावो वर्तते । समवायेन वह्नित्वं नास्तीत्यभावो न हेतुसमानाधिकरण इति लक्षणघटकस्तादृशोऽभावो न भवतीति हेतुसमानाधिकरणाभावस्याप्रसिद्धेः प्रतियोगितावच्छेदकसंम्बन्धेन प्रतियोगिवैयधिकरण्यविवक्षायां तु नोक्तदोषः । हेत्वधिकरणे वह्नौ वह्नित्वं नेत्यभावस्य प्रतियोगितावच्छेदक तादात्म्यसंबन्धेन प्रतियोगिव्यधिकरणस्य प्रसिद्धत्वात् ।

वह्निमतस्तादात्म्येन साध्यतायां धूमे हेतौ पूर्वोक्तरीत्याऽव्याप्तिवारणाय तादृशप्रतियोगितावच्छेदकत्वस्य लक्षणघटकाभावीयप्रतियोगितावृत्तितादृशोभयाभावीयप्रतियोगितापरम्परावच्छेदकतावत्साध्यातावच्छेदकावृत्तिप्रतियोगितावच्छेदकताप्रतियोगिकस्वरूपसंबन्धेनाभावस्य साध्यतावच्छेदकेऽवश्यविवक्षणीयत्वेनास्यापि दोषस्य तेनैव वारणमिति न पृथक्तयाऽयं निवेश आवश्यक इति। संबन्धघटके साध्यतावच्छेदके लक्षणघटकाभावीयप्रतियोगितावृत्तितादृशोभयाभावीयप्रतियोगितापरंपरावच्छेदकतावत्वविशेषणात् तादात्म्येन प्रमेयवद्वान् वाच्यत्वादित्यत्र नाव्याप्तिः । लक्षणघटकाभावीय प्रतियोगितावृत्तिर्यस्तादृशोभयाभावीयप्रतियोगितापरम्परावच्छेदकतावत्साध्यतावच्छेदकावृत्तिप्रतियोगितावच्छेदकत्वीयस्वरूपसंबन्धावच्छिन्ना या लक्षणघटकाभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्ना प्रतियोगिता तत्प्रतियोगितानिरूपकाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । अन्यथा सर्वासां प्रतियोगितानां साध्यतावच्छेदके सत्त्वेन तदवृत्तिप्रतियोगिताया अप्रसिद्धया साध्यतावच्छेदकावृत्ति प्रतियोगितावच्छेदकत्वप्रतियोगिकस्वरूपस्याप्रसिद्धया तेन स्वरूपेण तादृशप्रतियोगिता-

वच्छेदकत्वाभावोऽप्रसिद्ध इति प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्त्यापत्तेः। लक्षण-घटकाभावीयप्रतियोगितावृत्तितादृशोभयाभावीयप्रतियोगितानिरूपितावच्छेदकतावत्त्वस्य साध्यतावच्छेदके विशेषणत्वे तु नोक्तदोषः। प्रतियोगिव्यधिकरणधूमसमानाधिकरणघटाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकावृत्तित्वोभयाभावीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावद्घटरूपसाध्यतावच्छेदकावृत्ति-प्रतियोगितावच्छेदकताप्रतियोगिकस्वरूपसंबन्धेन तादृशप्रतियोगितावच्छेदकघटत्व-निष्ठावच्छेदकत्वाभावस्य पटरूपप्रमेयरूपसाध्यतावच्छेदके सत्त्वेन तत्राव्याप्त्यभावोपपत्तेरिति परास्तम्। विशेषरूपेण संसर्गत्वानभ्युपगमेन लक्षणघटकाभावीयप्रतियोगिता तादृशोभयाभावीयप्रतियोगितापरंपरानिरूपितावच्छेदकता प्रतियोगिकस्वरूपस्यासंबन्धत्वेन तेन संबन्धेन तादृशावच्छेदकत्वाभावस्य साध्यतावच्छेदके कथयितुमशक्यत्वेन तादात्म्येन प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्तेस्तादवस्थ्यात्। यत्तु तादात्म्येन धूमविशिष्टधूमवान् वह्नेरित्यत्रातिव्याप्तिः। प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व साध्यतावच्छेदकावृत्तित्वोभयाभाववत्प्रतियोगितानिरूपितावच्छेदकधूमनिष्ठावच्छेदकत्वस्य लक्षणघटकाभावप्रतियोगितावृत्त्युभयाभावीयप्रतियोगितानिरूपितपरम्परावच्छेदकतावत्साध्यतावच्छेदकधूमावृत्तिप्रतियोगितावच्छेदकत्वप्रतियोगिकस्वरूपरूपव्यधिकरण-संबन्धेनाभावः साध्यतावच्छेदके धूमे वर्तते व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वादिति। तन्न। विषयितास्वरूपान्यतर-संबन्धेन प्रागुक्तान्यतरवदभावमादायातिव्याप्तिवारणात्।

अतएव (अस्या व्याप्तेरनुमित्यनुयोगित्वादेव) साध्यवद्वृत्त्यभावीयत्व जगन्निरूपितवृत्तितानवच्छेदकानुयोगितानिरूपितत्वोभयाभावो लक्षणघटकाभावीय-प्रतियोगितायां लाघवाद् विवक्षणीयः। धूमवान् वह्नेरित्यत्र तादृशधूमाभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्वविरहेण तदुभयाभावो वर्त्तते इति साध्याभावो लक्षण-घटक इति न दोषः। वह्निमान् धूमादित्यत्र समवायादि व्यधिकरणसंबन्धेन वाच्यत्वाभावमादाय लक्षणसंगतिः। तादृशवाच्यत्वाभावीयप्रतियोगितायां जगन्निरूपित वृत्तितानवच्छेदकघटाद्यभावत्वरूपानुयोगितानिरूपितत्वविरहेण तादृशोभयाभावः।

न च लाघवाल्लक्षणघटकाभावे एव साध्यवद्वृत्तित्वजगद्वृत्तिभिन्नत्वोभयाभाव-विशेषणमस्त्विति वाच्यम् । अभावस्याधिकरणस्वरूपपक्षे तदभिन्नाभिन्नस्य तदभिन्नत्वमिति हेत्वधिकरणपर्वतवृत्तिमहानसीय वह्न्यभावोऽपि गगनाभाव एव । समानाधिकरणानामभावानामधिकरणरूपत्वेनैक्यमिति वह्निमान् धूमादित्यत्र महानसीय वह्न्यभावे तादृशोभयाभावो वर्तत इति भवति महानसीयवह्न्यभावो लक्षणघटक इति तदीयप्रतियोगितावच्छेदकत्वस्य सध्यतावच्छेदके सत्त्वेनाव्याप्त्यापत्तेः । लक्षणघटकाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, जगन्निरूपितवृत्तिता नवच्छेदकानुयोगितानिरूपितत्वोभयाभावस्य निवेशे तु नोक्तदोषः । अनुयोगित्वस्य वैलक्षण्येन समानाधिकरणाभावानामैक्येऽपि तत्तदभावगतानुयोगित्वानां भिन्नत्वमिति जगन्निरूपितवृत्तितानवच्छेदक महानसीयवह्न्यभावत्वरूपानुयोगितानिरूपितत्वस्य साध्यवद्वृत्त्यभावीयत्वस्य च सत्त्वेन तदुभयाभावस्य महानसीय वह्न्यभावप्रतियोगिताया मसत्त्वात् तदभावस्य न लक्षणघटकत्वमिति । अभावाधिकरणकोऽभावोऽधिकरण-स्वरूप इति पक्षेऽपि गगनाभावे यो महानसीयवह्न्यभावस्तस्य गगनाभावरूपत्व-मिति पक्षेऽपि लक्षणाघटकाभावे तदुभयाभावनिवेशेऽपि उक्तदोषो बोध्यः । यदि चा-भावाधिकरणकोऽभावप्रतियोगिकोऽभावोऽधिकरणस्वरूपः । अभावस्य नाधिकरण स्वरूपत्वमिति तर्हि महानसीयवह्न्यभावो न गगनाभावरूप इति महानसीयवह्न्यभावे साध्यवद्वृत्तित्व, जगद्वृत्तिभिन्नत्वोभयाभावस्यासत्त्वेन न तदभावमादाय वह्नि-मान् धूमादित्यत्राव्याप्तिरित्युच्यते । तदाऽभावस्याधिकरणानात्मकत्वपक्षे लक्षणघटका-भावे साध्यवद्वृत्तित्व, जगद्वृत्तिभिन्नत्वोभयाभावो निवेश्यताम् । प्रतियोगि वैयधिकरण्यञ्चात्र प्रतियोगितावच्छेदकसंबन्धेनैव वाच्यम् । घटः स्ववृत्तिवाच्यत्ववत्त्व संबन्धेन पटवान् घटत्वादित्यत्र स्वरूपसंबन्धावच्छिन्नघटाभावं केवलान्वयिनमादाय लक्षणसंगतिः कार्या । न च वह्निगगनोभयाभावस्य, विषयितया वह्नित्वविशिष्टस्य स्वरूपेणाभावस्य च केवलान्वयित्वेन तत्तदभावमादाय वह्निमान् धूमादित्यत्रा व्याप्तिः । एतेष्वभावेषु जगद्वृत्तिभिन्नत्वाभावेन तादृशोभयाभावस्य सत्त्वादिति वाच्यम् । जगन्निरूपितवृत्तितानवच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकत्वीय-स्वरूपसंबन्धेन तादृशोभयाभाववद्धेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वा भावस्य साध्यतावच्छेदके विवक्षणीयतयाऽत्राव्याप्त्यभावोपपत्तेः । अस्य स्वरूप

संबन्धस्य तादृशप्रतियोगितावच्छेदकत्वव्यधिकरणत्वादित्यपि परास्तम् । विशेषरूपेण संसर्गत्वानभ्युपगमात् । अतएव (विशेषरूपेण संसर्गस्यानभ्युपगमादेव) लक्षणघटकाभावे साध्यवद्वृत्तित्व, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयाभावो विवक्षणीयः । प्रतियोगिव्यधिकरणाभावस्य प्रमेयरूपसाध्यप्रतियोगिकत्वात् तादृशाभावाप्रसिद्धया प्रमेयवान् घटत्वादित्यत्राव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति । तथा च हेत्वधिकरणे घटे यः पटाभावः तस्य साध्यवद्वृत्तित्वेऽपि प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वविरहेण तादृशोभयाभावस्य तत्र सत्त्वात् लक्षणघटकत्वमुपपद्यते । न च प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्तिः । लक्षणघटकाभावीयप्रतियोगितामात्रस्य साध्यतावच्छेदकप्रमेयावच्छिन्नत्वेन तन्निरूपकाभावे तादृशोभयाभाव विरह इति तादृशलक्षणघटकाभावस्याप्रसिद्धेरिति वाच्यम् । साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वस्य लक्षणघटकाभावीयप्रतियोगितायां विवक्षणेनादोषात् । तथा च साध्यवद्वृत्तित्व, साध्यतावच्छेदकताव्यापकावच्छेदकताकप्रतियोगिताकत्वोभयाभाववान् यः लक्षणघटकाभावस्तदीयप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति पर्यवसितम् । अत्र साध्यवद्वृत्त्यभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताव्यापकावच्छेदकत्वानिरूपितप्रतियोगिताकत्वमस्य पर्यवसितार्थ इत्यपि हेयम् । (तथा च साध्यवद्वृत्तित्व, तादृशप्रतियोगिताकत्वोभयाभाववान् यो लक्षणघटकोऽभावस्तदीयप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । वह्निमान् धूमादित्यत्र लक्षणघटकघटाभावे साध्यवद्वृत्तित्वस्य सत्त्वेऽपि साध्यतावच्छेदकताव्यापकावच्छेदकताकप्रतियोगितानिरूपकत्वस्यासत्त्वेन तादृशोभयाभावो वर्तते इति तादृश घटाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वाद् भवति लक्षणसंगतिः । धूमवान् वह्नेरित्यत्र लक्षणघटकधूमाभावे साध्यवद्वृत्तित्वाभावेन तादृशोभयाभावो वर्तते । भवति साध्याभावो लक्षणघटक इति नातिव्याप्तिरित्यपि हेयम्) ।

केचित्तु अत्र गुरुधर्मस्य प्रतियोगितावच्छेदकत्वे लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं-

हेतो व्याप्तिरिति लाघवाद् वक्तव्यम्। वह्निमान् धूमादित्यत्र च घटाभावमादाय लक्षणसंगतिः। धूमवान् वह्ने रित्यत्र धूमाभावीयप्रतियोगितायां यत्किञ्चिद्धेत्वधिकरणायोगोलकनिरूपितसंबन्धितावच्छेदकवह्नित्वावच्छिन्नत्वाभावेन तादृशोभयाभावो वर्तते इति तत्प्रतियोगितानवच्छेदकत्वस्यसाध्यतावच्छेदकेऽसत्त्वेन नातिव्याप्तिः। धनी मनुष्यत्वादित्यत्र संबन्धान्तरसंयोगादिसंबन्धावछिन्नसाध्याभावप्रतियोगितायां व्यभिचार निरूपकाधिकरणानिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वविरहेण तादृशोभयाभावो वर्तते तदनवच्छेदकत्वस्य साध्यतावच्छेदके विरहेण नातिव्याप्तिः। न च धूमत्वावच्छिन्नप्रतियोगिकसंयोगेन धूमवान् वह्ने रित्यत्रातिव्याप्तिः। अयोगोलकनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धित्वाप्रसिद्ध्याऽभावान्तरीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम्। साध्यतावच्छेदकसंबन्धातिरिक्त संबन्धावच्छिन्नत्वसाध्यतावच्छेदकावछिन्नत्वोभयाभाववती या संबन्धितेति कथनेनादोषात्। तथा च साध्यतावच्छेदकसंबन्धातिरिक्तसबन्धावच्छिन्नत्व, साध्यतावच्छेदकावच्छित्वोभयाभाववती या यत्किञ्चद्धेत्वधिकरणनिरूपितसंबन्धिता तादृश संबन्धितावच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभाववती लक्षणघटकाभावीयप्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम्। तथा चोभयोः प्रसिद्धत्वेनायोगोलकनिरूपितवह्निनिष्ठ संयोगसंबन्धावच्छिन्नसंबन्धितायां साध्यतावच्छेदकधूमत्वावच्छिन्नत्वविरहेण साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभावो वर्तते इति तादृशसंबन्धितावच्छेदकवह्नित्वावच्छिन्नत्वसाध्यतावच्छेदक धूमत्वावच्छिन्नत्वोभयाभाववती या लक्षणघटकधूमाभावीया प्रतियोगिता तदनवच्छेदकत्वस्य साध्यतावच्छेदके धूमत्वेऽसत्त्वेनातिव्याप्त्यभावोपपत्तेः। न च विषयितया वह्निमत् वह्निविषयक, वह्निविशिष्टविषयक, वह्नित्वविशिष्टविषयकज्ञानान्यतमत्वादित्यत्रातिव्याप्तिः। वह्नित्वस्य हेत्वधिकरणनिरूपितसंबन्धितावच्छेदकत्वमिति हेत्वधिकरणनिरूपितसंबन्धितायां साध्यतावच्छेदकविषयित्वातिरिक्तसंबन्धावच्छिन्नत्वविरहेण हेत्वधिकरणज्ञाननिरूपितविषयित्वसंबन्धावच्छिन्नवह्निनिष्ठसंबन्धिता साध्यतावच्छेदक संबन्धातिरिक्त संबन्धावच्छिन्नत्व, साध्यतावच्छेदक वह्नित्वावच्छिन्न-

त्व, साध्यतावच्छेदकबह्नित्वावच्छिन्नत्वोभयाभाववती भवतीति तादृशसंबन्धितावच्छेदक बह्नित्वावच्छिन्नत्व, साध्यतावच्छेदकबह्नित्वावच्छिन्नत्वोभयस्यैव साध्याभावीयप्रतियोगितायां सत्त्वेन तदुभयाभाववत्या अभावान्तरीयप्रतियोगितायाः अनवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम् । यत्किञ्चिद्धेत्वधिकरणनिरूपिततादृशोभयाभाववत्संबन्धितावच्छेदकताविशिष्टावच्छेदकतानिरूपित्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभावस्य लक्षणघटकाभावीयप्रतियोगितायां विवक्षणेनादोषात् । वै० स्वसाजात्य स्वसामानाधिकरण्योभयसंबन्धेन । तथा च साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभाववत् यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व , साध्यतावच्छेदकावच्छिन्नत्वोभयाभाववती लक्षणघटकाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । वै० स्वसाजात्य, स्वसामानाधिरण्योभयसंबन्धेन । एवञ्च बह्निमान् धूमादित्यत्र नाव्याप्तिः । तादृशघटाभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धातिरिक्त संबन्धावच्छिन्नत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभाववती या यत्किञ्चिद्धेत्वधिकरणपर्वत निरूपित बह्निनिष्ठसंयोगसंबन्धावच्छिन्नसंबन्धिता तदवच्छेदक बह्नित्वनिष्ठावच्छेदकता विशिष्टावच्छेदकता तादृशोभयसंबन्धेन बह्नित्वनिष्ठैव तन्निरूपितत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभावस्य सत्त्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदके बह्नित्वे सत्वात् ।

ज्ञानं विषयितया बह्निमत् बह्निविषयकबह्निविशिष्टविषयकबह्नित्ववि· शिष्टबह्निविषयकज्ञानान्यतमत्वादित्यत्र नातिव्याप्तिः । यत्किञ्चिद्धेत्वधिकरण बह्नित्वविशिष्टबह्निविषयकज्ञान वृत्तिसाध्याभावीयप्रतियोगितायां साध्यता वच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वविरहप्रयुक्ततादृशोभयाभाववती बह्नित्वविशिष्ट बह्निविषयकज्ञाननिष्ठा संबन्धिता तदवच्छेदकबह्नित्वनिष्ठा सावच्छिन्नावच्छेदकता तद्विशिष्टा स्वसाजात्यस्वसामानाधिकरण्योभयसंबन्धेन सैव तन्निरूपितत्व विरहेण तादृशावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकावच्छिन्नत्वोभयाभावस्य सत्त्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदकेऽसत्वात् । साध्यतावच्छेदकबह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतायां साध्यतावच्छेदकबह्नित्वनिष्ठसावच्छिन्नावच्छेदक

तासामानाधिकरण्यस्य सत्वेऽपि स्वसाजात्यविरहेण तद्वैशिष्टचविरहात् तद्विशिष्टत्वा भावोपपत्तेरिति वदन्ति । तदसत् । महानसीयवह्निमान् धूमादित्यत्रातिव्याप्तेः । प्रतियोगितावच्छेदकवह्नित्वस्य निखिलहेत्वधिकरणनिरूपितसंबन्धितावच्छेदकत्वेन साध्यतावच्छेदकवह्नित्वावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धिता वच्छेदक वह्नित्वावच्छिन्नत्वयोः हेत्वधिकरणवृत्तिसाध्याभावीयप्रतियोगितायां सत्वेन तदुभयाभाववत्या अभावान्तरीयप्रतियोगिताया अनवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् । न च लक्षणघटकाभावीयप्रतियोगितायाँ साध्यतावच्छेदकावच्छिन्नत्व यत्किञ्चिद्धेत्वधिकरणनिरूपित संबन्धितावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वोभयाभावो निवेश्यते इति नोक्तदोषः । महानसीयवह्न्यभावप्रतियोगितायां साध्यतावच्छेका वच्छिन्नत्व , यत्किञ्चिद्धेत्वधिकरणपर्वतनिरूपितसंबन्धितावच्छेदकातिरिक्तमहानसीयत्वानवच्छिन्नत्वोभयाभावस्य सत्वेन महानसीयवह्न्यभावस्य लक्षणघटकत्वेन महानसीयवह्निमान् धूमादित्यत्र नातिव्याप्तिरिति वाच्यम् । एवंसति वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्त्यापत्तेः । यत्किञ्चिद्धेत्वधिकरण पर्वतनिरूपितसंबन्धितावच्छेदकवह्नित्वातिरिक्तमहानसीयत्वानवच्छिन्नत्व, साध्यता वच्छेदकावच्छिन्नत्वोभ याभावस्य सत्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदके वह्नित्वेऽसत्वात् । न च यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धिताविशेषणोभयाभावघटक साध्यतावच्छेदकावच्छिन्नत्वं स्वा(साध्यत्वा)नवच्छेदकानवच्छिन्नत्वसंबन्धेन साध्यताविशिष्टत्वरूपं वाच्यम् । तथा सति महानसीयवह्नित्वावच्छिन्नकालिक संबन्धावछिन्न यत्किञ्चिद्धेत्वधिकरणपर्वतनिरूपितसंबन्धितायां साध्यतानवच्छेदकमहानसीयत्वावच्छिन्नत्वस्य सत्वेन साध्यताविशिष्टत्वरूपसाध्यतावच्छदेका वच्छिन्नत्वविरहाद् विशेषणाभावप्रयुक्ततदुभयाभावस्य सत्वेन तादृशसंबन्धिता वच्छेदकमहानसीयत्ववह्नित्वनिष्ठावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नत्वस्य चोभयस्यैव महानसीयवह्न्यभावप्रतियोगितायां सत्त्वेन तादृशोभयाभावस्यासत्त्वात् महानसीयवह्न्यभावो न लक्षणघटक इति घटाभावमादाय लक्षणसमन्वय इति वाच्यम् । ज्ञानं विषयितया वह्निमत् वह्निविषयकमहानसीयवह्निविषयकज्ञानान्यतरत्वादित्यत्रातिव्याप्तेः । हेत्वधिकरणे महानसीयवह्निविषयकज्ञाने यो विषयितया वह्निर्नास्तीत्यभावः, तदीयप्रतियोगितायां

यत्किञ्चिद्धेत्वधिकरणमहानसीयवह्निविषयकज्ञाननिरूपितसंबन्धितायाः यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकातिरिक्तधर्मानवच्छिन्नत्व, साध्यतावच्छेदकानवच्छिन्नत्वरूप साध्यतावच्छेदकावच्छिन्नत्वोभयाभाववत्याः अवच्छेदकं यद् वह्नित्वं तन्निष्ठनिरवच्छिन्नावच्छेदकताविशिष्टः स्वसाजात्यस्वसामानाधिकरण्योभयसंबन्धेन स्वैव तन्निरूपितत्व, साध्यतावच्छेदकावच्छिन्नत्वयोरुभयोः वह्न्यभावप्रतियोगितायां सत्त्वेन साध्याभावो न लक्षणघटक इत्यभावान्तरीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । वह्निमान् धूमादित्यत्र तन्महानसीयवह्न्यभावमादायाव्याप्तिरपि भवति । तादृशतन्महानसीयवह्न्यभावप्रतियोगितायां तन्महानसासमानकालिकयत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वविरहेण स्वानवच्छेदकानवच्छिन्नत्वरूप साध्यतावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वोभयाभावसत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वात् ।

इह पुनरिदमवधेयम्, विभिन्नकालीनयोरपि परम्परासंबन्धस्वीकारे वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादाय नाव्याप्तिः । हेत्वधिकरणपर्वतवृत्तिमहानसीयवह्न्यभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्व, स्ववृत्तिवाच्यत्ववत्त्वसंबन्धावच्छिन्नयत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदका (महानसीयवह्नित्वा) वच्छिन्नत्वयोरुभयोः सत्त्वेन तादृशोभयाभावस्यासत्त्वात् सोऽभावो न लक्षणघटकः घटाद्यभावमादाय लक्षणसमन्वयः ।

महानसीयवह्निमान् धूमदित्यत्रातिव्याप्तिवारणाय लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वयत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धिताविशिष्टत्वोभयाभावो निवेश्यः । प्रतियोगितायां संबन्धितावैशिष्ट्यञ्च स्वानवच्छेदकानवच्छिन्नत्व संबन्धावच्छिन्नस्ववृत्तित्व, स्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन । प्रतियोगिवैयधिकरण्यञ्च प्रतियोगितावच्छेदकसंबन्धेनैव वाच्यम् । तथा च साध्यतावच्छेदकावच्छिन्नत्व, यत्किञ्चद्धेत्वधिकरणनिरूपितसंबन्धिताविशिष्टत्वोभयाभाववती या लक्षणघटकाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिक-

रण्यं हेतौ व्याप्तिरिति फलितम् । प्रतियोगितायां संबन्धितावैशिष्ट्यञ्च । स्वानवच्छेदकानवच्छिन्नत्व, स्वानवच्छेदकानवच्छिन्नत्वसंबन्धावच्छिन्नस्ववृत्तित्वोभयसंबन्धेन । बह्निमान् धूमादित्यत्र लक्षणघटकघटाभावीयप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वाभावेन तादृशोभयाभावो वर्तते । महानसीयबह्निमान् धूमादित्यत्र साध्याभावीयप्रतियोगितायां यत्किञ्चिद्धेत्वधिकरण (पर्वत) निरूपितबह्निनिष्ठसंबन्धिताविशिष्टत्वाभावेन साध्यतावच्छेदकावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरण (पर्वत) निरूपितसंबन्धिताविशिष्टत्वोभयाभावो वर्तते तदनवच्छेदकत्वस्य साध्यतावच्छेदकेऽसत्त्वेनातिव्याप्त्यभावोपपत्तेरिति । महानसीयबह्न्यभावीयप्रतियोगितायां तादृश - बह्निनिष्ठसंबन्धितानवच्छेदकमहानसीयत्वावच्छिन्नत्वस्य सत्त्वेन स्वा (संबन्धित्वा) नवच्छेदकानवच्छिन्नत्वाभावात् स्वा (प्रतियोगित्वा) नवच्छेदकानवच्छिन्नत्वसंबन्धावच्छिन्न स्व (तादृशबह्निनिष्ठसंबन्धिता) वृत्तित्वस्य तादृशप्रतियोगितायां सत्त्वेऽपि तादृशोभयाभावस्य सत्त्वात्साध्याभावो भवति लक्षणघटकः । एवञ्च संबन्धधर्मिकोभयाभावो वक्ष्यमाणो नादरणीयः । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽपि साध्यतावच्छेदकावच्छिन्नत्वस्य पर्याप्त्यघटितत्वेन न दोषः । साध्यतावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्याभावः तादृप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्न सामानाधिकरण्यं हेतौ व्याप्तिः । प्रमेयबह्निमान् धूमादित्यत्र साध्यतावच्छेदकसंबन्धसामान्ये प्रमेयबह्न्यभावीयप्रतियोगितावच्छेदकबह्नित्वावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावो न वर्तते । किन्तु घटसामान्याभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणीभूतपर्वतानुयोगिकत्वोभयाभावो वर्तते तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके प्रमेयबह्नित्वे सत्त्वम् । साध्यतावच्छेदकसंयोगे अपर्याप्त्या साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य सत्त्वेऽपि तादृशहेत्वधिकरणीभूतायोगोलकत्वावच्छिन्नानुयोगिकत्वाभावेन तादृशोभयाभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके प्रमेयधूमत्वेऽपर्याप्त्या सत्त्वात् प्रमेयधूमवान् बह्नेरित्यत्र नातिव्याप्तिः । तादृशप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वनिवेशस्य प्रयोजनाभावेन विषयितया साध्यतावच्छेदकविशिष्टाभाव -

प्रतियोगितायां (विषयितया धूमत्वविशिष्टाभावीयप्रतियोगितायां विषयितया प्रमेय-वह्नित्वविशिष्टाभावीयप्रतियोगितायां वा) साध्यतावच्छेदकपर्याप्तावच्छेदकतानिरूपितावच्छेद्यत्वस्य प्रसिद्धेश्च) एतादृशस्थले गुरुधर्मस्य प्रतियोगितावच्छेदकत्वं सर्वसंमतम् । अन्यथा प्रमेयवह्निं जानामीतिवत् प्रमेयवह्न्यभावं जानामीत्यनुपपत्तेश्च । वह्न्यभावं जानामीत्यापत्तेश्च । प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्यानिवेशे कालो घटवान् महाकालत्वादित्यत्र विषयितया घटत्वविशिष्टाभावो न प्रतियोगिव्यधिकरणः । तत्र समवायेन घटत्वविशिष्टप्रतियोगिसामानाधिकरण्यात् किन्तु गगनमवृत्तिमिति पक्षे गगनाभावमादाय लक्षणसंगतिः ।

यत्तु सध्यतावच्छेदकावच्छिन्नत्वञ्च यत्किञ्चित्साध्याधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकावच्छिन्नत्वरूपं विवक्षितम् । यत्किञ्चित्त्वनिवेशात् तादात्म्येन प्रमेयवान् द्रव्यत्वात्, वाच्यत्वाद्वेत्यत्र नाव्याप्तिः । तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया या यत्किञ्चित्साध्याधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वोभयाभाववती प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । यत्किञ्चिद्धेत्वधिकरणे पटाभावीयप्रतियोगितायां यत्किञ्चित्साध्याधिकरणघटनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकघटत्वावच्छिन्नत्वविरहेण तदुभयाभावस्य सत्त्वात्, तदनवच्छेदकत्वस्य साध्यतावच्छेदके प्रमेयत्वे सत्त्वान्नाव्याप्तिः । तन्न, ज्ञानं विषयितया घटवत् नित्यज्ञानत्वादित्यत्राव्याप्तेः । प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसमवायसंबन्धावच्छिन्नप्रतियोगिताकघटाभावीयप्रतियोगितायां यत्किञ्चिद्धेत्वधिकरणपटज्ञाननिरूपितसंबन्धितावच्छेदकपटत्वावच्छिन्नत्वविरहेण तादृशोभयाभावो वर्तते, तदवच्छेदकत्वस्यैव साध्यतावच्छेदके घटत्वे सत्त्वात् । न च हेत्वधिकरणघटज्ञाननिरूपिततादृशसंबन्धितावच्छेदकघटत्वावच्छिन्नत्वस्य तादृशघटाभावीयप्रतियोगितायां सत्त्वेन तदुभयस्यैव सत्त्वात् तदुभयाभावासत्त्वान्नोक्तदोष इति वाच्यम् । हेत्वधिकरणे यत्किञ्चित्त्वनिवेशेन यत्किञ्चिद्धेत्वधिकरणपटज्ञाननिरूपितसंबन्धितावच्छेदकपटत्वावच्छिन्नत्वविरहेण तदुभयाभावस्य घटाभावीयप्रतियोगितायां सत्त्वात् ।

अन्यथा धूमवान् वह्नेरित्यत्रातिव्याप्त्यापत्तेः। तादृशधूमाभावीयप्रतियोगितायां यत्किञ्चित्साध्याधिकरणमहानसनिरूपित साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नसंबन्धितावच्छेदकधूमत्वावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणपर्वतनिरूपितसंबन्धितावच्छेदक-धूमत्वावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणपर्वतनिरूपितसंबन्धितावच्छेदकधूमत्वाव-च्छिन्नत्वोभयस्यैव सत्त्वेन तदुभयाभावासत्त्वात् साध्याभावस्य लक्षणाघटकत्वापत्तेः। यत्किञ्चित्वस्य हेत्वधिकरणे निवेशे तु नोक्तदोषः। तादृशयत्किञ्चिद्धेत्वधिकरणत्वेनायोगोलकस्यैव ग्रहणात् तन्निष्ठसंबन्धितावच्छेदक वह्नित्वावच्छिन्नत्वस्य साध्याभावीयप्रतियोगितायां विरहेण साध्याभावस्य लक्षणघटकत्वोपपत्तेः। हेत्वधिकरणे यत्किञ्चि-त्वनिवेशात् तादात्म्येन प्रमेयवान् वाच्यत्वादित्यत्र नाव्याप्तिः। अन्यथा घटरूपप्रमेयस्य यत्किञ्चिद्धेत्वधिकरणे पटेऽभावमादायाव्याप्त्यापत्तेः। घटरूपप्रमेयाभावीयप्रतियोगितायाँ पटरूपसाध्याधिकरणनिरूपिततादात्म्यरूपसाध्यतावच्छेदकसंबधावच्छिन्नसंबन्धितावच्छेदकपटत्वावच्छिन्नत्वविरहेण तदुभयाभावस्य सत्त्वेन साध्याभावस्य लक्षणघटकत्वापत्तेः। यत्किञ्चित्वस्येष्टपरत्वेन यत्किञ्चित्साध्याधिकरणत्वेन घटरूपप्रमेयरूपसाध्यस्य तादात्म्येनाधिकरणं घट एव गृह्यते इति नोक्तदोषः। साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वकल्पे च प्रतियोगिताधर्मिकोभयाभावघटितकल्पानुसरणे नोक्तदोष इति बोध्यम्। तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व, यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः। यद्यपि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया या यत्किञ्चित् साध्याधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकावच्छिन्नत्वोभयाभाववती प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यत्र समवायेन घटाभावमादाय ज्ञानं घटवत् नित्यज्ञानत्वादित्यत्राव्याप्तिः। यत्किञ्चित्साध्याधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसंबन्धितावच्छेदकपटत्वावच्छिन्नत्वोभयाभावस्य समवायेन घटाभावीयप्रतियोगितायां सत्त्वेन तदवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्। प्रतियोगिवैयधि-

करणयञ्च प्रतियोगितावच्छेदकसंबन्धेन, तस्या अव्याप्तेर्वारणाय लक्षणघटकाभावीय-प्रतियोगितायां साध्याधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेद-कतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपनिरूपित स्वा (साध्यता) वच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धावच्छिन्नवृत्तित्व, यत्किञ्चिद्धेत्वधिकरणनिरूपित संबन्धितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्य-नुयोगितावच्छेदकानुयोगिकस्वरूपसंबन्धावच्छिन्न स्वा (प्रतियोगित्वा) वच्छेदकतात्वा-वच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धावच्छिन्नवृत्तित्वोभयाभावस्य निवेशः । समवायेन वह्न्यभावीयप्रतियोगितायां तदुभयस्यैव सत्त्वेन तदभावो न लक्षणघटक इति ज्ञानं विषयितया घटवत् नित्यज्ञानत्वादित्यत्र नाव्याप्तिः । एकत्वादेः पर्याप्त्यनभ्युपगमे समवायेन वह्न्यभावमादाय ज्ञानं विषयितया वह्निमत् नित्यज्ञान-त्वादित्यत्राव्याप्तिर्न वारयितुं शक्यते । साध्यतावच्छेदकवह्नित्वगतैकत्वस्य तादृश-पर्याप्त्यनुयोगितानवच्छेदकत्वेन तादृशैकत्वनिरूपितवृत्तित्वस्याप्रसिद्ध्या तथा कथयि-तुमशक्यत्वात् । तथापि पुनः प्रतिविधीयते । वह्न्याधेयत्वपर्याप्त्यन्यतरसंबन्धेन साध्यतायां वह्नित्वत्वेऽव्याप्तेः । वह्नित्वगतैकत्वाभावस्य प्रतियोगिवैयधिकरण्या-संभवात् । न च प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यं वाच्यम् । समवाय-संबन्धावच्छिन्नवह्न्यभावमादायाव्याप्तेः ।

यत्त्वेकत्वसाध्यकवाच्यत्वे साध्यतावच्छेदकगतैकत्वाभावमादायाव्याप्तिरिति । तन्न । स्वरूपेण तादृशरूपावृत्तिप्रतियोगितावच्छेदकत्वीयस्वरूपसंबन्धावच्छिन्नप्रति-योगिताकाभावविवक्षायां दोषाभावादिति ।

ये तु लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्व, साध्य-तावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभावस्तदनवच्छेदकसाध्यतावच्छेदका वच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र साध्यतावच्छेदकभिन्नसंबन्धेन साध्याभावो न लक्षणघटकस्तदीयप्रतियोगितायां तदुभयस्यैव सत्वेन तदुभयाभावस्यासत्वात् । तथा च वह्निमान् धूमादित्यत्र समवायेन वह्न्यभावमादाय नाव्याप्तिः । न च वृत्त्यनियामक-संबन्धस्य प्रतियोगितानवच्छेदत्वेन तेन संबन्धेन साध्याभावो न लक्षणघटकः । अन्यसंबन्धेन साध्याभावीयप्रतियोगितायां तदुभयस्यैव सत्वेन तदुभयाभावस्यासत्वात्

अन्यसंबन्धेनापि साध्याभावस्य न लक्षणघटकत्वमित्यन्याभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् धनी मनुष्यत्वादित्यत्रातिव्याप्तिरिति वाच्यम् । साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व यत्किञ्चिद्धेत्वधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकावच्छिन्नत्वोभयाभाववती या लक्षणघटकाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति विवक्षणेनादोषात् । धनी मनुष्यत्वादित्यत्र अन्यसंबन्धेन साध्याभावो लक्षणघटकः । तदीयप्रतियोगितायां यत्किञ्चिद्धेत्वधिकरणेति दलाभावेन तदुभयाभावस्य सत्त्वात् । न चैवमपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिकवृत्यनियामकसंबन्धसाध्यकव्यभिचारिणि धनत्वावच्छिन्नप्रतियोगिकस्वामित्वसंबन्धेन धनवान् मनुष्यत्वादित्यत्रातिव्याप्तिः । साध्यतावच्छेदकसंबन्धेन साध्याभावस्याप्रसिद्धया न लक्षणघटकत्वम् । अन्यसंबन्धेन साध्याभावीयप्रतियोगितायां तदुभयाभावस्यासत्वान्न तदभावस्य लक्षणघटकत्वमित्यन्याभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् । तत्रातिव्याप्तिरणाय साध्यतावच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभावस्य संबन्धितायां निवेशनीयतया वृत्यनियामकसंबन्धसाध्यकसद्धेतौ अयं धनी चैत्रत्वादित्यादौ अव्याप्तिः । प्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकस्यापि उक्तसंबन्धितावच्छेदकत्वादिति वाच्यम् । (तथा च साध्यतावच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभाववती या यत्किञ्चिद्धेत्वधिकरण निरूपित "साध्यतावच्छेदकसंबन्धावच्छिन्न" संबन्धिता तदवच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभाववती या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्न सामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । तथा च साध्यतावच्छेदकावच्छिन्न-। प्रतियोगिकवृत्त्यनियामकसंबन्धेन साध्ये धनी मनुष्यत्वादित्यत्र नातिव्याप्तिः व्यभिचारनिरूपकयत्किञ्चिद्धेत्वधिकरणनिरूपितसाध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नसंबन्धितायां साध्यतावच्छेदकावच्छिन्नत्वस्य विरहेण साध्यतावच्छेदकावच्छिन्नत्व साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभावस्य सत्वेन तादृशसंबन्धितावच्छेदकावच्छिन्नत्वविरहेण साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धा-

वच्छिन्नप्रतियोगिताकलक्षणघटकसाध्याभावीयप्रतियोगितायां साध्यतावच्छेदक-संबन्धातिरिक्तसंबन्धावच्छिन्नत्व, यत्किञ्चिद्धेत्वधिकरणनिरूपितसाध्यतावच्छेदक-संबन्धावच्छिन्नत्वोभयाभावस्य सत्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदकेऽसत्वात् । एवं सति वृत्त्यनियामकसंबन्धसाध्यकसद्धेतौ घनी चैत्रत्वादित्यत्राव्याप्तिः । लक्षण-घटकघटाभावीयप्रतियोगितायां साध्यतावच्छेदकघनत्वावच्छिन्नत्वविरहेण साध्यता-वच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभाववती संबन्धिता हेत्वधिकरणनिरूपिता कालिकसंबन्धावच्छिन्ना घटनिष्ठा तदवच्छेदकघटत्वा वच्छिन्नत्व, साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयत्वस्य लक्षणघटक-संयोगसंबन्धावच्छिन्नघटाभावीयप्रतियोगितायां सत्वेन न कोऽप्यभावो लक्षणघटक इति तादृशप्रतियोगिताकहेतुसमानाधिकरणाभावस्याप्रसिद्धेरिति वाच्यम्) । साध्यता-वच्छेदकताव्यापकावच्छेदकताघटितत्रितयाभावस्य हेतुसमानाधिकरणाभावीयप्रति-योगितायां विशेषणत्वेनादोषात् । तथा च साध्यतावच्छेदकावच्छिन्नत्व, साध्यता-वच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभाववद् यत्किञ्चिद्धेत्वधिकरणनिरूपित-साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नसंबन्धिता वच्छेदकावच्छिन्नत्व, साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वेतत्त्रितयाभाववती या प्रतियोगिव्याधिकरणहेतुसमानाधिकरणाभावीया प्रतियोगिता तदनवच्छेदकसाध्याता-वच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् ।

तथा च घनी चैत्रत्वादित्यत्र नाव्याप्तिः । लक्षणघटकसंयोगसंबन्धावच्छिन्न-घटाभावीयप्रतियोगितायां साध्यतावच्छेदकघनत्वावच्छिन्नत्वस्य साध्यतावच्छेदक-घनत्वनिष्ठाव छेदकताव्यापकावच्छेदकताकत्वस्य चासत्वेन यत्किञ्चिद्धेत्वधिकरण-निरूपितसाध्यतावच्छेदकसंबन्धातिरिक्तकालिकसंबन्धावच्छिन्नचैत्रनिरूपितघटनिष्ठ -संबन्धितावच्छेदकघटत्वावच्छिन्नत्वस्य सत्वेऽपि तादृशत्रितयाभावस्य सत्वात् । तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके घनत्वे सत्वादिति वदन्ति ।

तेऽनाकलन्तो लाघवगौरवं पूर्वपक्षरसिकाः । साध्यतावच्छेदकतदितरोभयान-वच्छिन्नत्वोभयाभावस्य लक्षणघटकाभावीयप्रतियोगितायामिति कल्पापेक्षयाऽस्मिन् नवीनकल्पे गौरवमिति ध्येयम् ।

अथ वक्ष्यमाणयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्ति-रित्यत्र हेत्वधिकरणे साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, प्रतियोगितावच्छेदका-वच्छिन्नाधिकरणत्वोभयाभाव एव (वक्ष्यमाण) प्रतियोग्यनधिकरणत्वशब्देन विवक्षणीयः। तावतैव सर्वदोषाभावात् वक्ष्यमाणप्रतियोगिताधर्मिकोभयाभावो न वक्तव्यः। (प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्ये यत्संबन्धा-वच्छिन्नत्व, यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति न वक्तव्यम्)। हेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नानधि-करणत्वमित्यत्र प्रतियोगितावच्छेदकावच्छिन्नत्वं न पर्याप्तिघटितम्। तथा च महान-सीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः। तदीयप्रतियोगितावच्छेदक-वह्नित्वावच्छिन्नाधिकरणत्वस्य हेत्वधिकरणमात्रे सत्वात्। प्रतियोगितावच्छेदक-निष्ठनिरूपकतावच्छेदकतायां (हेत्वधिकरणनिष्ठाधिकरणतानिष्ठनिरूप्यतानिरूपित-निरूपकतावच्छेदकतायां) साध्यतावच्छेदकतानिरूपितसंसर्गतावच्छेदकधर्मावच्छिन्न-संसर्गतानिरूपितत्वमेव वक्तव्यम्। तेन रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्व-विशिष्टाभावमादाय नाव्याप्तिः। संसर्गतावच्छेदकतायां पर्याप्त्यनिवेशाद् वह्नित्व-प्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यकधूमे नाव्याप्तिः। साध्यतावच्छेदकता निरूपितसंसर्गतावच्छेदकसमवायत्वावच्छिन्नसंसर्गतानिरूपितत्वस्य लक्षणघटकाभाव-प्रतियोगितावच्छेदकघटत्वनिष्ठावच्छेदकतायां सत्वात् महानसीयवह्निमान् तज्ज्ञानत्वा दित्यत्र वक्ष्यमाणरीत्या (निरूपकतावच्छेदकतायां पर्याप्तिर्न निवेश्यते इति रीत्या) हेत्वधिकरणे महानसीयवह्निविषयकज्ञाने महानसीयो नास्ति, वह्निर्नास्तीत्यभाव-प्रतियोगितावच्छेदकनिष्ठपर्याप्तावच्छेदकताकनिरूपकताकाधिकरणत्वस्य सत्वेन तदभावस्य प्रतियोगिव्यधिकरणत्वाभावान्न तमादायाव्याप्तिः। हेत्वधिकरणतानिरूपित निरूपकतायां प्रतियोगितावच्छेदकावच्छिन्नत्वस्य व्यापकत्वसंबन्धेन प्रतियोगिता-वच्छेदकत्ववृत्त्यवच्छेदकत्वार्थत्वे (प्रतियोगितानिरूपितावच्छेदकतावृत्त्यवच्छेदकता-निरूपितनिरूपकतेति कथने)। विषयितया वह्निमान् तज्ज्ञानत्वादित्यत्र वह्नित्व-विशिष्टाभावम्, विषयितया वह्नित्वविशिष्टवान् तज्ज्ञानत्वादित्यत्र वह्न्यभावश्चादाय

नाव्याप्तिः। प्रतियोगितावच्छेदकतासाध्यतावच्छेदकतयोः सावच्छिन्ननिरवच्छिन्नत्वेन भिन्नत्वेऽपि तयोः व्याप्यव्यापकभावस्य सत्वेन व्यापकतासंबन्धेन प्रतियोगितावच्छेदकतायां निरूपकतावच्छेदकताया वृत्तित्वात् हेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य सत्वेन तत्र प्रतियोगिव्यधिकरणत्वाभावेन लक्षणाघटकत्वादिति चेत्। अत्यन्ताभावस्य ध्वंस.प्रागभाव.घटादित्रितयप्रतियोगिकत्वमते कालो गोत्ववान् कालत्वादित्यत्र लक्षणघटकत्वेन संप्रतिपन्नः सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावो न प्रतियोगिव्यधिकरणो भवितुमर्हति। प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र पर्याप्तेरनिवेशेन घटस्वरूपप्रतियोग्यधिकरणत्वस्य साध्याधिकरणत्वस्य चोभयस्य हेत्वधिकरणे काले सत्वात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य वाऽप्रसिद्ध्याऽव्याप्तेः। अतः प्रतियोगिताधर्मिकोभयाभावकल्प आवश्यक इति। तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्येव युक्तः। तत्र महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणाय लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नोभयाभावनिवेश आवश्यकः। (प्रतियोगिव्यधिकरणत्वं पर्याप्त्या बोध्यम्। अन्यथा महानसीयवह्न्यभावस्य प्रतियोगिव्यधिकरणत्वानुपपत्तेः)। न चाभावाघटितकल्पे (यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति कल्पे) कालो गोत्ववान् कालत्वादित्यादावव्याप्तेरसंभवेन लक्षणघटकयादृशप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावनिवेशोऽस्यां व्याप्तौ नोचितः, पर्याप्त्या प्रतियोगितावच्छेदकानवच्छिन्नत्वस्य हेत्वधिकरणेऽनिवेशादिति वाच्यम्। लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वोभयाभावनिवेशस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यभावघटितकल्पाभिप्रायकत्वेन ग्रन्थसामञ्जस्यात्। प्रतियोगितावच्छेदकावच्छिन्नत्वं पर्याप्तिघटितमेव। अन्यथा तद्वह्निमान् धूमादित्यत्र साध्याभावस्य प्रतियोगिसमानाधिकरणत्वेन लक्षणा-

घटकत्वेनातिव्याप्त्यापत्तेः। एतेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया या धर्मविशिष्टान्याप्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति कथनेनैव वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादाय नाव्याप्तिः। महानसीयवह्न्यभावीयप्रतियोगितायां धर्मविशिष्टत्वस्यैव सत्त्वेन तदभावस्य लक्षणाघटकत्वात्। धर्मवैशिष्टयं च स्वावच्छिन्नत्वस्वेतरानवच्छिन्नत्वोभयसंबन्धेन। समवायेन वह्न्यभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणाय साध्यतावच्छेदक संबन्धेन प्रतियोगिवैयधिकरण्यं बोध्यम्। महानसीयवह्निमान् धूमादित्यत्र साध्याभावीय-प्रतियोगितायां वह्नित्वरूपधर्मवैशिष्टयस्य स्वावच्छिन्नत्व, स्वेतरधर्मानवच्छिन्नत्वोभय-संबन्धेन सत्वात् तदन्यत्वाभावेन साध्याभावो न लक्षणघटक इत्यभावान्तरमादायाति व्याप्तेर्वारणाय साध्यवृत्त्यभावीयत्वधर्मविशिष्टान्यत्वोभयाभावस्य लक्षणघटकाभावीय-प्रतियोगितायां निवेशे न कोऽपि दोषः। वै० स्वावच्छिन्नत्व, स्वेतरावच्छिन्नत्वोभय-संबन्धेनेति निरस्तम्। कालो गोत्ववान् कालत्वादित्यत्र सृष्टिकालवृत्तित्वविशिष्ट-घटत्वाद्यभाव एव लक्षणघटकः संपन्नः। तदीयप्रतियोगितायां स्वा (घटत्वत्वा) वच्छिन्नत्व, स्वेतर"सृष्टिकाल"वृत्तित्वोभयसंबन्धेन धर्मविशिष्टत्व, साध्यवद्वृत्यभावी यत्वोभयस्य सत्त्वेन तस्याभावस्य लक्षणाघटकत्वमिति लक्षणघटकतादृशाभावा-प्रसिद्धयाऽव्याप्तेः। अतो लक्षणघटकाभावीयप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभाव एव निवेश्य इति दिक्।

अत्र (यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृश प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामान्याधिकरण्यं हेतौ व्याप्तिरित्यत्र च) कालस्य जगदाधारत्वेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्या-प्रसिद्धया कालो घटवान् महाकालत्वादित्यत्राव्याप्तेर्वारणाय प्रतियोगितावच्छेदक साध्यतावच्छेदकान्यतरसंबन्धावच्छिन्नत्वस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नान-धिकरणत्वस्य हेत्वधिकरणे विशेषणत्वे न कोऽपि दोषः। (तथा च प्रतियोगिता-वच्छेदकसंबन्ध, साध्यतावच्छेदकसंबन्धान्यतरसंबन्धावच्छिन्नयादृशप्रतियोगितावच्छेद-कावच्छिन्नाधिकरणत्वाभाववद्धेत्वधिकरणं स्वावच्छिन्नत्वस्वेतरधर्मावच्छिन्नत्वोभय संबन्धेन धर्मविशिष्टत्व, साध्यवद्वृत्त्यभावीयत्वोभयाभाववती तादृशप्रतियोगिता तदन

वच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यत्र कालो घटवान् महाकालत्वादित्यत्र नाव्याप्तिः। लक्षणघटकसृष्टिकालवृत्तित्वविशिष्टगोत्वाभावीयप्रतियोगितायां तादृशोभयाभावस्य तादृशप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदके गोत्वे सत्त्वेन कालो गोत्ववान् कालत्वात्, कालो घटवान् महाकालत्वादित्यादौ नाव्याप्तिः। न च स्व (घट)वृत्तिभेदीयमहाकालत्वावच्छिन्नप्रतियोगिता संबन्धेन महाकालो घटवान् महाकालत्वादित्यत्र समवायादिसंबन्धेन पटाभावीय प्रतियोगितायां तदुभयस्यैव सत्त्वेन सृष्टिकालवृत्तित्वविशिष्टघटत्वाद्यभावीयप्रतियोगितायां तादृशोभयत्वस्य (साध्यवद्वृत्त्यभावीयत्वधर्मविशिष्टत्वोभयत्वस्य) सत्त्वेन च लक्षणघटकतादृशप्रतियोगिताकाभावस्याप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्। घटानुयोगिककालिक, प्रतियोगित्वादिसंबन्धावच्छिन्नप्रतियोगिताकमहाकालाभावमादाय लक्षणसमन्वयात्। एतत्संबन्धेन (घटानुयोगिककालप्रतियोगिकघटानुयोगिककालिकेन) स्ववृत्तिभेदीयकालत्वावच्छिन्नप्रतियोगित्वादिकालस्य घटवृत्तित्वेऽपि कालेऽवृत्तित्वात् घटादेः कालेऽवृत्तित्वात्) भवति कालाभावो लक्षणघटकः। एतत्संबन्धेन प्रतियोगिनः कालस्य घटवृत्तित्वेऽपि हेत्वधिकरणे कालेऽवृत्तित्वात्। यदि च विशेषरूपेण न संसर्गत्वादिः, प्रतियोगित्वादीनां वृत्त्यनियामकतया न प्रतियोगितावच्छेदकत्वमिति कालो घटवान् महाकालत्वादित्यत्र का गतिरित्युच्यते। तदा त्वयापि (एतादृशव्याप्तिवादिनाऽपि) संबन्धधर्मिकोभयाभावघटितकल्पोऽनुसरणीयः। तत्रैवोक्तरीत्यनुसरणे विफलमेव प्रतिभाति उभयानवच्छिन्नत्वादिकमिति चिन्त्यम्।

अयं भावः, प्रतियोगिताधर्मिकोभयाभावकल्पे अभावे हेत्वधिकरणवृत्तित्वस्यानिवेशे साध्यतावच्छेदकसंबन्धेन साध्याभावीयप्रतियोगितातायां तदुभयत्वस्यैव सत्वेन लक्षणेऽसंभवः। तत्र प्रतियोगिव्यधिकरणत्वानिवेशे कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः। हेत्वधिकरणवृतिसाध्याभावीयप्रतियोगितायां तदुभयस्यैव सत्त्वात्। प्रतियोगितायां सामान्यत्वस्या निवेशे धूमवान् बह्नेरित्यत्रातिव्याप्तिः। तादृशघटाभावीयप्रतियोगितायां तदुभयाभावस्य सत्त्वात्। महानसीयबह्न्यभावमादाय बह्निमान् धूमादित्यत्राव्याप्तिवारणाय धर्मविशिष्टान्यत्वं लक्षणघटकाभावीयप्रतियोगितायां निवेशनीयम्। वै. स्वावच्छिन्नत्व, स्वेतरधर्मानवच्छिन्नत्वोभयसंबन्धेन। महानसीयबह्निमान्

धूमादित्यत्र साध्याभावीयप्रतियोगितायां धर्मविशिष्टान्यत्वाभावेन साध्याभावो न लक्षणघटक इत्यभावान्तरमादायातिव्याप्तिवारणाय लक्षणघटकाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, धर्मविशिष्टत्वोभयाभावो निवेश्यः। वै. स्वावच्छिन्नत्व, स्वेतर-धर्मानवच्छिन्नत्वोभयसंबन्धेन। एवञ्चानया रीत्यैव दोषवारणसंभवे लक्षणघटकाभावीय-प्रतियोगितायां साध्यतावच्छेदक तदितरोभयानवच्छिन्नत्वनिवेशो जगदीशस्य विफल इति।

न च साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वनिवेशापेक्षया साध्यवद्वृत्तित्व धर्मविशिष्टत्वोभयाभावनिवेशे लाघवाभाव इति विनिगमकाभावेन निवेशान्तरेण निवेशान्तरस्यावैयर्थ्येन च लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदि-तरोभयानवच्छिन्नत्वोभयाभावनिवेशो न विफल इति वाच्यम्। सामान्यनिवेशापेक्षया विशेषनिवेशे गौरवमिति धर्मविशिष्टान्यत्वस्य सामान्यत्वेन साध्यतावच्छेदकतदित रेत्यस्य विशेषत्वात्।

अत्र चिन्ताबीजन्तु साध्यवद्वृत्त्यभावीयत्वस्योभयाभावघटकत्वं सामान्य-धर्मावच्छिन्नाधिकरणत्वस्यास्वीकारपक्षे साध्यतावच्छेदके यद्वृत्तितानवच्छेदकत्व, सामान्यतोऽधिकरणतावच्छेदकत्वोभयाभावस्तदेव पारिभाषिकं साध्यवत्त्वमिति कथनीयमिति गौरवं बोध्यम्।

परन्तु अत्र (लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयान-वच्छिन्नत्वनिवेशे) न पश्यामो दूषणलेशमपि दीधितिव्याख्याकर्तुर्जगदीशस्य। नापि दीधितिकारस्य दूषणलेशमपि। तस्य मार्गप्रदर्शकत्वात्। प्रतियोगितानवच्छेदकत्व-घटकावच्छेदकतायाः पर्याप्तिविवक्षायां तत्तात्पर्यस्य वक्तुं शक्यत्वात्। (लक्षणघटका भावीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वं साध्यतावच्छेदके निवेश्यमिति बोधयितुं लक्षणघटकाभावीयप्रतियोगितायां धर्मविशिष्टान्यत्वं न निवेशितं दीधिति कारेण। महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः। तादृश-प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणमहानसीयत्ववह्नित्वोभयभेदस्य साध्यतावच्छेदके वह्नित्वे सत्त्वात्,। अतो लक्षणघटकाभावीयप्रतियोगितायां धर्मविशिष्टान्यत्वं न निवेश्यम्। महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्राव्याप्त्यभावात्।

जगदीशेन चैकत्वादेः पर्याप्त्यनभ्युपगमेन वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिवारणं पर्याप्तिनिवेशेन न संभवति, शिष्यबुद्धिवैशद्याय कथञ्चिल्लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वं निवेशितम्। इति सूक्ष्मापराधान्वेषणेऽपि नापराध्यति सोऽपि आशयविदां मन्तव्यम्।

परे तु रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावमादायाव्याप्ति वारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वं निवेशनीयमिति तन्न युक्तम्। हेत्वधिकरणे साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकसाध्यता वच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति कथनेनैव तत्राव्याप्तिवारणसंभवेन तन्न निवेश्यम्। रूपवान् पृथिवीत्वादित्यत्र हेत्वधिकरणे तादृशोभयस्यैव सत्त्वेन तदुभयाभावस्यासत्वात्। विषयितया रूपत्वविशिष्टाभावस्य लक्षणाघटकत्वेन तत्राव्याप्त्यभावादिति यदुक्तं तन्न समीचीनम्। स्ववृत्तिवाच्यत्ववत्त्वसमवायोभयसंबन्धेन वह्नित्व विशिष्टसाध्यकसद्धेतौ वह्नित्वविशिष्टवान् धूमादित्यत्र सर्वेषां पदार्थानां साध्यता वच्छेदकप्रतियोगितावच्छेदकसंबन्धाभ्यां हेत्वधिकरणे वृत्तित्वेन प्रतियोगिव्यधिकरणा भावस्याप्रसिद्ध्याऽव्याप्तेर्वारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटक संसर्गतावच्छेदकावच्छिन्नत्वं पर्याप्त्या निवेशनीयम्। तथा च स्ववृत्तिवाच्यत्ववत्त्वसमावायोभयसंबन्धेन साध्यतावच्छेदक वह्नित्वपटत्वोभयावच्छिन्नानधिकरणे पटाद्यभावः प्रतियोगिव्यधिकरणः प्रसिद्ध इति न तत्राव्याप्तिः। तथा च प्रतियोगितावच्छेदकतायां पूर्वोक्तपरिष्कृतस्य साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्यावश्यनिवेशनीयत्वम्। एवञ्च तदनिवेशे प्रयुक्तं लाघवं दूरापेतम्। एवञ्च वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टस्य संयोगेन साध्यतायां धूमे संयोगेन वह्नित्वविशिष्टवान् धूमादित्यत्र लक्षणघटकाभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंसर्गतावच्छेदक पर्याप्तावच्छेदकताकसंसर्गतानिरूपितत्वस्य विरहेण तादृशावच्छेदकताकप्रतियोगिताक प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावाप्रसिद्ध्याऽव्याप्तिस्तद्वारणाय स्वानवच्छेदकसंबन्धावच्छिन्नत्व स्वसामानाधिकरण्योभयसंबन्धेन साध्यतावच्छेदकताविशिष्टा वच्छेदकत्वानिरूपकत्वं प्रतियोगितायां निवेशनीयमिति परिष्कृतस्य तस्य निवेशनीयत्वम्

रूपदान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावो न लक्षणघटकस्तदीय-प्रतियोगितायां तदुभयसंबन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्यैव सत्त्वात् । एवञ्च तदनिवेशप्रयुक्तलाघवं दूरापेतम् । सामान्यधर्मावच्छिन्नाधिकरणत्वा-स्वीकारे साध्यतावच्छेदकवृत्त्यभावीयप्रतियोगितानिरूपितपरंपरावच्छेदकत्वस्यैव साध्य-तावच्छेदकावच्छिन्नाधिकरणत्वं वाच्यम् । स्वाश्रयवन्निष्ठाधिकरणतानवच्छेदकत्व सामान्याधिकरणतावच्छेदकत्वोभयाभावः साध्यतावच्छेदके तदेव पारिभाषिकं साध्या-धिकरणम् (साध्यवत्) । तथा चैतत्कल्पे साध्यतावच्छेदकतदितरोभयानवच्छिन्नं लक्षण घटकाभावीयप्रतियोगितायां वक्तव्यमिति कल्पापेक्षया क्व लाघवम्, प्रत्युत गौरवमेव । अस्मिन् कल्पे लक्षणघटकाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्वधर्मविशिष्ट-त्वोभयाभावस्य निवेशः । साध्यवत्वं साध्याधिकरणत्वं सामान्यधर्मावच्छिन्नाधिकरण त्वस्यास्वीकारे उक्तपरिष्कृतरूपं वाच्यमिति लाघवोऽपि नास्ति ।

एवमेकत्वादेः पर्याप्त्यनभ्युपगमपक्षे एव लक्षणघटकाभावीयप्रतियोगितायां वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकतदि-तरोभयानवच्छिन्नत्वविशेषणस्यादरणीयतया स्वसाजात्य, स्वसामानाधिकरण्य स्वा-वच्छेदकसंबन्धावच्छिन्नत्वैतत्त्रितयसंबन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकत्वा-निरूपितत्व, एतत्संबन्धावच्छिन्नस्ववृत्तित्व, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत्त्रितय संबन्धेन साध्यताविशिष्टनिरूपकताकाधिकरणत्वस्यैव साध्यतावच्छेदकावच्छिन्ना-धिकरणत्वं वक्तव्यम् । तथा च लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदक तदितरोभयानवच्छिन्नत्वनिवेशापेक्षया तादृशोभयाभाव (साध्यवद्वृत्त्यभावीयत्वधर्म-विशिष्टत्वोभयाभाव) घटितैतन्नवीनलक्षणे किं लाघवं प्रत्युत गौरवमेवास्ति ।

न च पूर्वोक्तसंबन्धैः प्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्वस्य भवत्कल्पे-ऽपि प्रतियोगिवैयधिकरण्यघटकत्वं वक्ष्यमाणमेवेति वाच्यम् । अतिगुरुभूतव्यापकत्व-संबन्धेन प्रतियोगितावच्छेदकतावृत्त्यवच्छेदकताकनिरूपकताकाधिकरणत्वस्य गौरव-संपादकस्य युष्मत्पक्षे प्रवेशादित्याहुः ।

तदपि केवलसाध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वमात्रनिवेशम् अवलम्ब्य

परिचिन्तितं बोध्यम्। तत्पक्षे स्थितानां दोषवारणविशेषणानाम् अनुसन्धाने अस्मिन् प्राचीनपक्षे जगदीशकृतोभयाभावपक्षे एव लाघवं प्रतिभाति।

केचित्तु नित्यानुयोगिकत्वविशिष्टमहानसीयवह्नित्वावच्छिन्नप्रतियोगिकत्वाभाववद् विषयितासंबन्धेन ज्ञानं घटवत् नित्यज्ञानत्वादित्यत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणत्वेनाभिमतो यो महानसीयवह्न्यभावः तदीयप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणत्वस्य साध्याधिकरणत्वस्य च हेत्वधिकरणे नित्यज्ञाने सत्त्वेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धयाऽव्याप्तिः। प्रतियोगिव्यधिकरणत्वेन हेत्वधिकरणे यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्व साध्यतावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावः तदेव प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणमित्यत्र विवक्षितम्। तथा च महानसीयत्ववह्नित्वोभयानवच्छिन्नाधिकरणत्वस्य हेत्वधिकरणे सत्त्वेन महानसीयवह्न्यभावो भवति प्रतियोगिव्यधिकरणोऽत्र नोक्तदोष इति वदन्ति। तन्नातिरमणीयम्। विशेषरूपेण संसर्गताया इदानीमनभ्युपगमात्। अन्यथा नित्यज्ञानानुयोगिकत्वविशिष्टमहानसीयवह्नित्वावच्छिन्नप्रतियोगिकत्वाभाववद्विषयितासंबन्धेन वह्निमान् नित्यज्ञानत्वादित्यत्र हेत्वधिकरणे नित्यज्ञाने अभिमतहेतुसमानाधिकरणमहानसीयवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणत्व, वह्नित्वरूपसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वयोरुभयोः सत्त्वेन तदुभयाभावस्यासत्त्वात्। प्रतियोगिव्यधिकरणाभावाप्रसिद्धया तत्राव्याप्तिर्दुर्वारा स्यादिति। अथ विशेषरूपेण संसर्गताऽभ्युपगमस्यापि दृष्टत्वेन त्वपक्षे नित्यज्ञानानुयोगिकत्वविशिष्टमहानसीयवह्नित्वावच्छिन्नप्रतियोगिकत्वाभाववद् विषयितासंबन्धेन घटवान् ज्ञानत्वादित्यत्र पूर्वरीत्या सिद्धान्तेऽपि अव्याप्तिर्दुर्वारेति चेत्। दीधितिकारोक्तव्यधिकरणधर्मावच्छिन्नाभावखण्डनामासग्रन्थस्य प्रतियोगितावच्छेदकतापर्याप्तिनिवेश एव गदाधरेण परिगृहीतस्तद्वारणायादरणीयः। तथा च यादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं महानसीयत्ववह्नित्वोभयं तद्भिन्नं वह्नित्वमिति वह्निमान् धूमादित्यत्र नाव्याप्तिः। उभयभेदस्यैकस्मिन् सत्त्वात्। एतेन उभयाभावस्य लक्षणघटकाभावीयप्रतियोगिताविशेषणस्यैकत्वादेः पर्याप्त्यभ्युपगमानभ्युपगमोभयनिर्दुष्टतया पर्याप्तिघटितकल्पानुसरणं गदाधरभट्टाचार्यानुमतमिति परास्तम्। अन्यथा नित्यज्ञानुयोगिकत्वविशिष्टमहा॰

नसीयवह्निप्रतियोगिकत्वाभाववद् विषयितासंबन्धेन वह्निमान् नित्यज्ञानत्वादित्यत्र तादृशमहानसीयवह्न्यभावमादाय सिद्धान्ते प्रतियोगिताधर्मिकोभयाभावघटितकल्पेऽप्यव्याप्तेर्दुर्वारत्वापत्तेः। तादृशमहानसीयवह्न्यभावप्रतियोगितायां साध्यतावच्छेदकवह्नित्वावच्छिन्नत्व, साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नत्वोभयस्य सत्त्वेन तादृशोभयाभावस्यासत्त्वात्। अवच्छेदकत्वानुसरणेऽप्यव्याप्तिः। तादृशप्रतियोगितावच्छेदकवह्नित्वभेदस्य साध्यतावच्छेदकेऽसत्त्वात्।

जगदीशस्य लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदक तदितरोभयावच्छिन्नत्वाभावनिवेशश्च शिष्यबुद्धिवैशद्याय। न च पर्याप्त्यनभ्युपगमेन यदवच्छेदकत्वविचारग्रन्थे (अवच्छेदकत्वनिरुक्तौ) एकत्वादेः पर्याप्त्यनभ्युपगमे तु आहेत्युक्तम् तस्याभासग्रन्थत्वेन न मतनिर्णायकत्वमिति गृहाणेति दिक्।

इदन्तु चिन्त्यते। यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्व, साध्याधिकरणयत्किञ्चिद्व्यक्तिनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकताविशिष्टान्यावच्छेदकतावत्त्वोभयाभाववत्त्वमेव लक्षणघटकाभावीयप्रतियोगिताविशेषणम्। वै० स्वसजातीयत्व, स्वसामानाधिकरण्य, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत्त्रितयसंबन्धेन। तादृशावच्छेदकतावत्ता च निरूपितत्वसंबन्धेन। तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया या यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्व, यत्किञ्चित्साध्याधिकरणव्यक्तिनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकताविशिष्टान्यावच्छेदकताकत्वोभयाभाववती प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम्। वै०। स्वसजातीयत्व स्वसामानाधिकरण्य, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत् त्रितयसंबन्धेन। वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावमादाय नाव्याप्तिः। अस्यां प्रतियोगितायां यत्किञ्चित्साध्याधिकरणपर्वतव्यक्तिनिरूपितसाध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नसंबन्धितावच्छेदकताविशिष्टान्यमहानसीयत्वावच्छिन्नावच्छेदकताकत्वस्य साध्यतावच्छेदकवह्नित्वनिष्ठावच्छेदकताव्यापकप्रतियोगितावच्छेदकवह्नित्वनिष्ठावच्छेदकताकत्वस्य चोभयस्य सत्त्वेन न तदुभयाभावो वर्तते

इति महानसीयवह्न्यभावो न लक्षणघटक इति लक्षणघटकघटाभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके वह्नित्वे सत्त्वात् । एवं विषयितासंबन्धेन वह्नित्वविशिष्टवान् तज्ज्ञानत्वादित्यत्र वह्न्यभावमादाय नाव्याप्तिः । न वा विषयितासंबन्धेन वह्निमान् तज्ज्ञानत्वादित्यत्र वह्नित्वविशिष्टाभावमादायाव्याप्तिः । तादृशसंबन्धितावच्छेदकतयोः साजात्यस्य प्रतियोगितावच्छेदकतयोरभावेन साध्याधिकरणयत्किञ्चिद्व्यक्तिनिरूपितसाध्यतावच्छेकसंबन्धावच्छिन्नसंबन्धितावच्छेदकताविशिष्टान्यावच्छेदकताकत्वस्य यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वस्य चोभयस्यैव हेतुसमानाधिकरणाभावीयप्रतियोगितयोः सत्त्वेन तदुभयाभावस्यासत्त्वात् तत्तदभावो न लक्षणघटक इत्यन्यघटाभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । नापि रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावमादायाव्याप्तिः । स्वावच्छेदक (समवायसंबन्ध) संबन्धावच्छिन्नत्वविरहेण प्रतियोगितावच्छेदकतायाः साध्याधिकरणयत्किञ्चिद्व्यक्तिनिरूपितसाध्यतावच्छेदकसंबन्धावच्छिन्नसंबन्धितावच्छेदकताविशिष्टान्यत्वेन तन्निरूपितत्वस्य (तत्कत्वस्य) यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वस्य चोभयस्यैव तादृशप्रतियोगितायां सत्त्वेन तदुभयाभावस्यासत्त्वात् तदभावो न लक्षणघटक इति तादृशघटाभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । अतस्तत्तद्दोषवारकविशेषणानि (निरवच्छिन्नसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वम् । सावच्छिन्नसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां सावच्छिन्नत्वञ्च, प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वञ्च प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वमित्येतानि) विशेषणानि नोपादेयानि ।

यद्वा उक्तदोषाणां वारणाय यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्व, साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतावत्त्वोभयाभाव एव लक्षणघटकाभावीय प्रतियोगितायामुपादेयः । वै० स्वसाजात्य, स्वसमानाधिकरण्य, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत् त्रितयसंबन्धेन । अवच्छेदकतावत्त्वं प्रतियोगितायां निरूपितत्वसंबन्धेन उभयत्र (साध्याधिकरणयत्किञ्चिद्व्यक्तिनिरूपितेतिपूर्वलक्षणे पद्धेति लक्षणे च) व्यापकत्वनिवेशः, प्रमेयवान् वाच्यत्वादित्यत्र हेतुसमानाधिकरणाभावीय तादृशप्रतियो-

गिताप्रसिद्धचर्थः। अन्यथा व्यधिकरणसंयोगादिसंबन्धेन हेतुसमानाधिकरणाभावीयतादृश-प्रतियोगितायां साध्यतावच्छेदकतावत्त्व एव तादृशसंबन्धितावच्छेदकताविशिष्टान्यावच्छेदकतावत्त्वस्य चोभयस्य सत्त्वेन तत्राव्याप्तेः। एतदुभयाभावस्य तादृशप्रतियोगितायामप्रसिद्धत्वात् सर्वेषां पदार्थानां प्रमेयत्वेन साध्यतावच्छेदकनिष्ठावच्छेदकताकत्वस्य, तादृशसंबन्धितावच्छेदकताविशिष्टान्यावच्छेदकताकत्वस्य चोभयस्य सर्वस्यां प्रतियोगितायां सत्त्वेन तदुभयाभावस्यासत्त्वात्। व्यापकत्वनिवेशे च नोक्तदोषः। प्रमेयत्वावच्छिन्नप्रमेयनिष्ठावच्छेदकताव्यापिका स्वैव नान्या घटत्वनिष्ठा निरवच्छिन्नाऽवच्छेदकतेति तादृशावच्छेदकताविशिष्टान्यघटत्वनिष्ठावच्छेदकतावत्त्वस्य सत्वेऽपि यत्किञ्चित्साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्वस्य विरहेण तादृशोभयाभावस्य तादृशघटाभावीयप्रतियोगितायां सत्त्वेन तदनवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्। तादृशप्रति योगितायामवच्छेदकताकत्वं विहायावच्छेदकतावत्त्वोपादानेन रूपवान् पृथिवीत्वादित्यत्र हेत्वधिकरणे विषयितया रूपत्वविशिष्टाभावीयप्रतियोगितायां साध्यतावच्छेदकताव्यापकावच्छेदकतावत्त्वस्य साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतावत्त्वस्य चोभयस्य सत्वेन तदुभयाभावो न वर्तते इति तदभावो न लक्षणघटक इति न तत्राव्याप्तिः। समवायसंबन्धावच्छिन्नरूपत्वनिष्ठसाध्यतावच्छेदकताविशिष्टान्य रूपत्वनिष्ठविषयित्वसंबन्धावच्छिन्नावच्छेदकता भवति। तत्र स्वा (साध्यतावच्छेदकता) वच्छेदकसमवायसंबन्धावच्छिन्नत्वं नास्ति। यत्किञ्चित्त्वनिवेशेन महानसीयवह्निमान् तद्धूमादित्यत्र महानसीयवह्निघटोभयाभावमादाय नाव्याप्तिः। अन्यथा तदुभयाभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकमहानसीयत्ववह्नित्वोभयनिष्ठसाध्यतावच्छेदकताव्यापकत्वविरहेण तदीयप्रतियोगितायां तदुभयाभावसत्त्वेन साध्यतावच्छेदके महानसीयत्वे वह्नित्वे च तत्प्रतियोगितावच्छेदकत्वस्य सत्त्वादव्याप्त्यापत्तेः। यत्किञ्चित्त्वनिवेशे तु नोक्तदोषः। यत्किञ्चित्साध्यतावच्छेदकवह्नित्वनिष्ठावच्छेदकताव्यापकतादृशप्रतियोगितावच्छेदकवह्नित्वनिष्ठावच्छेदकतावत्त्व, साध्यतावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकत्वान्यघटत्वनिष्ठावत्त्वस्य चोभयस्य तदभावीयप्रतियोगितायां सत्त्वेन तदुभयाभावस्य तत्रासत्त्वात्। महानसीयवह्निघटोभयाभावो न लक्षणघटक इति तदन्यघटाभावमादाय लक्षणसमन्वय इति। अथ महानसीयवह्निमान् तज्-

ज्ञानत्वादित्यत्र महानसीयाभाववह्न्यभावप्रतियोगितयोः साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वस्य सत्त्वेन साध्यतावच्छेदके तत्प्रतियोगितावच्छेदकत्वस्यैव सत्त्वादव्याप्तिः। अत्र केचित् साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदक, यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वं लक्षणघटकाभावीयप्रतियोगितायां विशेषणान्तरं प्रवेश्यमित्यदोषः। तादृशप्रतियोगितायाः साध्यतावच्छेदकमहानसीयत्ववह्नित्वोभयनिष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं महानसीयत्ववह्नित्वगतद्वित्वं तदनवच्छेदकं महानसीयत्वगतैकत्वं वह्नित्वगतैकत्वं यत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं महानसीयत्वगतैकत्वं वह्नित्वगतैकत्वञ्च तत्र वृत्तित्वमस्ति इति तदवृत्तित्वाभावेन सा प्रतियोगिता न लक्षणघटिका तादृशघटाभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वान्न तत्राव्याप्तिः। प्रतियोगितायां रूपवृत्तित्वञ्च स्वावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेन। न च प्रतियोगिताविशेषणीभूततादृशरूपवृत्तित्वघटकयत्किञ्चित्त्वं न निवेश्यमिति वाच्यम्। तादात्म्येन प्रमेयविशिष्टस्य साध्यत्वे वाच्यत्वेऽव्याप्तेः। लक्षणघटकघटाद्यभावप्रतियोगितायाः तादृशानुयोगितानवच्छेदके तादृशानुयोगितावच्छेदके च घटत्वगतैकत्वे वृत्तित्वेन तादृशरूपावृत्तिप्रतियोगितायाअप्रसिद्धेः। यत्किञ्चित्त्वस्य निवेशे च नोक्तदोषः। तादृशपटत्वगतैकत्वे घटाद्यभावप्रतियोगिताया अवृत्तित्वेन घटाभावमादाय लक्षणसमन्वय इति। न च हेतुसमानाधिकरणघटगगनोभयाभावप्रतियोगितायाः तादृशानुयोगितानवच्छेदक हेत्वधिकरणनिरूपित तादात्म्यसंबन्धावच्छिन्नवृत्तिता (संबन्धिता) वच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकघटत्वगतैकत्वावृत्तित्वेन तदभावमादाय लक्षणसमन्वयः। द्वित्वावच्छिन्नप्रतियोगिताकभेदस्य केवलान्वयित्वेन (घटगगनोभयत्वस्य) द्वित्वस्य तादात्म्यसंबन्धावच्छिन्न वृत्तितायाः (संबन्धितायाः) अनवच्छेदकत्वादिति वाच्यम्। अस्यां प्रतियोगितायां साध्यतावच्छेदकप्रमेयतदितरघटत्वाद्युभयावच्छिन्नत्वस्य सत्त्वेन तदभावस्य लक्षणाघटकत्वात्। प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वनिवेशस्य वक्ष्यमाणत्वेन तदभावे न तदभावानां लक्षणघटकत्वात् तत्राव्याप्तेः। एवं च घूमाभावीयप्रतियोगितायां हेत्वधिकरणा

योगोलकानिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्ववृत्तित्वस्य विरहेण धूमाभावमादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिविरहेऽपि विषयितासंबन्धेन वह्निमान् वह्निविषयकमहानसी वह्निविषयकज्ञानान्यतरत्वादित्यत्रातिव्याप्तिः स्यादिति तादृशावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपे साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितानवच्छेदकत्वविशेषणम् । अन्यथा हेत्वधिकरणमहानसीयवह्निविषयकज्ञाननिरूपितवृत्तितावच्छेदक वह्नित्वनिष्ठावच्छेदकताप्रतियोगिक पर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्ववृत्तित्वस्य सत्त्वेन वह्न्यभावो न लक्षणघटक इति तादृशघटाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यापत्तेः । तन्निवेशे च नोक्तदोषः । तादृशवह्न्यभावप्रतियोगितायां साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकद्वित्वादौ घटत्वगतैकत्वेवाऽवृत्तित्वस्य सत्त्वेन भवति साध्याभावो लक्षणघटक इति समादधति । तन्मतं च (केचित्मतं) तादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वं साध्यतावच्छेदकगतरूपे न निवेश्यमित्यकारणप्रतिज्ञेति जानीमहे। एतन्निवेशेनैव तद्दोषवारणसम्भवे तद्विशेषणं न देयमिति भावः । अन्ते रण्डाविवाहः स्यादादावेव कुतो नहीति न्यायात् ।

'सुगमा' भिधा—

वैशेषिकसूत्रवृत्तिः

डी० टी० ताताचार्यकृता

(पूर्वतोऽनुवर्तमाना)

अथ पञ्चमाध्याये

प्रथममाह्निकम्

भोक्ता आत्मा निरूपितः। द्रव्यानन्तरं निर्दिष्टेषु गुणेषु भोग्यतया प्रधानभूता रूपादयो विशेषगुणा अपि बहुधा निरूपिताः। अथ गुणान्तरनिरूपणं पश्चात् करिष्यन् भोक्तुर्भोगहेतुभूतं कर्म निरूपयितुमारभते। तत्र प्रथमं शरीरगतं कर्म कारणतो निरूपयति—

१८४. आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥ १ ॥

हस्ते यत् कर्म जायते तस्य द्वे कारणे। एकं आत्मसंयोगः। य आत्मा तच्छरीरमधितिष्ठति तेन संयोगः हस्तस्य। तस्य आत्मनः हस्तेन संयोग इति वा। शरीरे जायमानस्य सर्वस्य कर्मणः इदं साधारणं कारणम्। मृतशरीरे कर्मणोऽभावात्। हस्ते यत् कर्म तत्र तदनुकूलः प्रयत्नः असाधारणकारणम्। प्रयत्नः आत्मन एव गुण इति तस्यात्मवृत्तित्वं स्वयं लभ्यते। मुसलं पश्यति। तत्कर्मकादान क्रिया हस्ते जायतामिति इच्छति। तद्विषयः प्रयत्नो जायते। ततो हस्ते क्रिया भवति। ईदृशो यत्नो यदि न जायते तर्हि इयं क्रिया नैव हस्ते जायेतेति द्वितीयमिदं कारणम्।

१८५. तथा हस्तसंयोगाच्च मुसले कर्म ॥२॥

तथेति हस्तस्य विशेषणम्। तादृशेत्यर्थः। आत्मसंयोगप्रयत्नाभ्यां कर्मवत्त्वार्हदशापन्नो यो हस्तः तत्संयोगादित्यर्थः। हस्तेन मुसलं गृहीत्वा उत्क्षिपति अवक्षिपति च। उत्क्षेपणावक्षेपणात्मिके क्रिये हस्ते, उद्गमनाधोगमनात्मिके क्रिये मुसले च जायेते। तत्र हस्तक्रिययोः कारणमुक्तम्। मुसलक्रिययोः कारणं विशिष्टहस्तसंयोगः। आत्मसंयोगप्रयत्नयोः हस्तसंयोगद्वारैव मुसलक्रियाहेतुत्वात् तावत्र अन्यथासिद्धौ। हस्ते कर्म मुसले च कर्मेति चकारयोजना।

१८६. अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥३॥

उक्तकारणरहितमपि कर्म हस्तमुसलयोरस्तीत्याह । अवक्षिप्तं मुसलं कदाचित् उलूखलान्तः पार्श्वे वा उपर्येव वा अभिहत्य तेनाभिघातेन स्वयमुत्पतति । तदाऽपि हस्तसंयोगस्तत्रास्त्येव । अथापि अयं अकारणं अस्मिन् अभिघातजे मुसलकर्मणि । कुतः । व्यतिरेकात् । विशिष्टहस्तसंयोगो हि कारणम् । वैशिष्ट्यं च तत्र कर्मोत्पत्त्यनुकूलस्य प्रयत्नस्य आत्मनि सत्त्वे भवेत् । न च तदानीं स प्रयत्नोऽस्ति । अतः तदानीं विद्यमानः केवलहस्तसंयोगः अकारणं तस्मिन् कर्मणि । अभिघातस्तु कारणम् । मुसलादावित्यादिशब्दः पूर्वत्र मुसलशब्दः उपलक्षणार्थ इति ज्ञापनाय ।

१८७. तथाऽऽत्मसंयोगो हस्तकर्मणि ।। ४ ।।

अभिघातेन मुसले उत्पतति हस्तोऽप्युद्गच्छति । अस्मिन् हस्तकर्मणि आत्मसंयोगः तथा अकारणम् । यद्वा मुसलकर्मणि हस्तसंयोगो यथा न कारणं तथेत्यनुपज्य योज्यम् । कुतो न कारणम् । विद्यते हि सः । उच्यते । विद्यमानोऽपि फलोपधायको न भवति । प्रयत्नरूपकारणान्तरविरहात् । यथा कारणान्तरविरहे सन्निहितोऽपि दण्डो घटस्य । अवर्जनीयतया तु तदानीमपि आत्मसंयोगसत्त्वम् ।

किं तर्हि हस्तोत्पतने कारणम् । उच्यते ।

१८८. अभिघातान्मुसलसंयोगाद्धस्ते कर्म ।। ५ ।।

अभिघातः तीव्रवेगक्रियाजनितो गाढसंयोगः । तस्मात् प्रयोजकात्, मुसलसंयोगात् साक्षात् कारणात् हस्ते कर्म उत्पद्यते । अभिघातवन्मुसलसंयोगादिति पाठो युक्तः ।

१८९. आत्मकर्म हस्तसंयोगाच्च ।। ६ ।।

'आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म' इत्यनेन पूर्वं शरीरकर्मणः कारणं स्थापितम् । तत्र कारणान्तरमप्यस्तीत्याह । आत्मशब्दोऽत्र शरीरवाची । कर्मसमभिव्याहारात् । तत् हस्तसंयोगाच्च भवति । यदा चैत्रः मैत्रं स्वहस्तेन तस्य हस्तमालंब्य कर्षति तदा मैत्रशरीरे जायमानं कर्म हस्तसंयोगादेवेति अयं तत्र कारणम् । अत्रापि हस्त इत्युपलक्षणम् । पादभुजादिसंयोगस्यापि कारणत्वात् । कायकर्मैव आत्मकर्मत्वेन व्यपदिश्यत इति वक्ष्यमाणमभिप्रेत्येह आत्मशब्दप्रयोगः ।

हस्तमुसलयोः परस्परसंयोगकारणकं कर्म उक्तम् । अथ संयोगनिवृत्तौ मुसलं यत् पतति तत्र कारणमाह—

१९०. संयोगाभावे गुरुत्वात् पतनम् ।। ७ ।।

गुरुत्वं तत्र कारणमित्यर्थः ।

गुरुत्वात् कथं पतनमेव, न क्रियान्तरमित्यत्राह—

१६१. नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ॥ ८ ॥

गुरुत्वं पतनमात्रे हेतुः । उद्गमने वा तिर्यग्गमने वा तदनुरूपं नोदनमपि कारणम् । एतदभावे सति केवलं पतनमिति ।

१६२. प्रयत्नविशेषान्नोदनविशेषः ॥ ९ ॥

नोदनविशेषस्य कारणमत्रोच्यते । वस्त्वन्तरसमवेतक्रियाहेतुभूतसंयोगसमानाधिकरणं कर्म नोदनम् । ऊर्ध्वगमनप्रयोजकत्वं तिर्यग्गमनप्रयोजकत्वं वा तस्य विशेषः । अयं प्रयत्नविशेषाद् भवति । ऊर्ध्वं नुदामीतीच्छाजनितः प्रयत्नःऊर्ध्वनोदनस्य कारणम् । ततो विलक्षणः तिर्यङ्नुदामीतीच्छाजनितः प्रयत्नः तिर्यङ् नोदनस्य कारणम् ।

१६३. नोदनविशेषादुदसनविशेषः ॥ १० ॥

नोदनविशेषस्य कार्यमत्रोच्यते । ऊर्ध्वनोदनरूपो यो नोदनविशेषः तस्मात् कारणात् नुद्यमानस्य वस्तुनः स्वोदसनं स्वोत्क्षेपणं नाम क्रियाविशेषो भवति । एतेन तिर्यङ्नोदनरूपो यो नोदनविशेषः तेन नुद्यमानस्य वस्तुनः तिर्यग्गमनरूपः क्रियाविशेषो भवतीत्यप्युक्तं वेदितव्यम् । अत्र "नोदनविशेषादुद्गमनम्" इत्येवं सूत्रपाठेन भवितुं युक्तम् ।

१६४. हस्तकर्मणा दारककर्म व्याख्यातम् ॥ ११ ॥

द्विविधं हस्तकर्म पूर्वमुक्तं—आत्मसंयोगप्रयत्नाभ्यां जायमानं, अभिघातवता मुसलेन संयोगाज्जायमानं चेति । तेन दारककर्म शिशुकर्म व्याख्यातं निरूपितं भवति । स्वात्मसंयोगप्रयत्नाभ्यां तस्य कदाचित् कर्म भवति । यदा स्वयमेव पाणिपादं विक्षिपति । कदाचित् परसंयोगाधीनम् । यदा माता हस्तावालम्ब्य तं सञ्चारयति ।

शरीरे अन्यत्र च प्रयत्नाधीनं तदनधीनं च कर्म निरूप्य तदिदानीं उदाहरणान्तरेण स्मारयामास । अथ यदर्थमिदं स्मारणं तदाह—

१६५. तथा दग्धस्य विस्फोटने ॥ १२ ॥

अग्निना दग्धस्य वेणोः यद् विस्फोटनं सशब्दं विदलनं तत्र कारणं तथा हस्तदारककर्मवद् द्रष्टव्यम् । सामान्यतः हस्तदारककार्यवदित्युक्तावपि योग्यतावशात् तयोः प्रयत्नानधीनं यत् कर्म तद्वदिति ज्ञेयम् । अभिघातवन्मुसलसंयोगो हस्तकर्मणीव, क्रियावन्मातृहस्तसंयोगो दारककर्मणीव च वह्निसंयोगो दह्यमानवेणविदलने कारणम् । अत इदं प्रयत्नानधीनं कर्म ।

१९६. यत्नाभावे प्रसुप्तस्य चलनम् ॥ १३ ॥

तथेत्यनुषज्य तादृशमित्यर्थो वाच्यः। पुरुषप्रयत्नाभावे सति सुषुप्तस्य पुरुषस्य चलनं यद् भवति तद् दावानलदह्यमानवेणुविस्फोटनवत् प्रयत्नेतरकारणकं द्रष्टव्य-मित्यर्थः। जाग्रद्दशायां प्रयत्नानधीनं शारीरं कर्म पूर्वमुक्तम्। अथ स्वापावस्थाया-मुच्यते। आहारपरिणामप्रयुक्ततेजोवायुसंयोगविशेषाधीनमिदं चलनमिति भावः।

१९७. तृणे कर्म वायुसंयोगात् ॥ १४ ॥

सर्वथा पुरुषसंयोगरहिते, मार्गे प्ररूढे तृणे यच्चलनं तद् वायुसंयोगादिति असन्दिग्धमेतत्। तद्वदेव प्रसुप्तचलनमपि पुरुषप्रयत्नेतरकिञ्चित्कारणकम्।

१९८. मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारणकम् ॥ १५ ॥

स्तेननिर्वारणार्थं विसृष्टो मणिः यत् स्तेनमभिगच्छति, सूची यत् अयस्का-न्तमभिसर्पति, यच्च एतादृशमन्यत् कर्म तत् सर्वं अदृष्टकारणकम्। न दृष्टं प्रत्यक्षेण वाऽनुमानेन वाऽनवगतं कारणं यस्य तत्। अस्ति कारणम्। तत्तु इदमिति विशिष्य वक्तुं न शक्यत इति भावः। एतेन दृष्टकारणादृष्टकारणभेदात् कर्म द्विविधं त्यपि विभागवदिति ज्ञापितम्।

१९९. इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे हेतुः ॥ १६ ॥

धनुषि सन्धाय मुक्ते इषौ यावल्लक्ष्यप्राप्ति एकमेव कर्मेति न मन्तव्यम्। भिन्नभिन्नमनेकं कर्म तत्र भवति। कोऽत्र हेतुः। किं तत्र लिङ्गम्। किं प्रमाणमिति यावत्। अयुगपत्संयोगविशेषः। संयोगानां विशेषाः भिन्नभिन्ना व्यक्तयः। ते च अयुगपत् न एककालभाविनः अपितु क्रमभाविनः। प्रथम दिग्विशेषावच्छिन्नाकाशसंयोगो जायते। तेन तज्जनकं कर्म नश्यति। अनन्तरं अन्यः संयोगोऽपरदिग्विशेषावच्छिन्नाकाशेन। तेन तज्जनकं कर्म नश्यति। एवमुत्तरोत्तरसंयोगनाश्यत्वात् तत्तज्जनकस्य कर्मणः न एकं कर्म आन्तमनुवर्तते। अपितु यावन्तः संयोगाः तज्जनकानि तन्नाश्यानि च कर्माणि तावन्ति भवन्तीत्यर्थः।

२००. नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च ॥ १७ ॥

यदि प्रथममुत्पन्नं कर्म तज्जन्यसंयोगान्नश्यति तर्हि अनन्तरं कुतो जायत इत्य-त्राह। नोदनादाद्यमिषोः कर्मेति ज्ञातमेतत्। तेन आद्येन कर्मणा उत्तरदेशसंयोगवत् वेगाख्यः संस्कारोऽपि कार्यते उत्पाद्यते। तस्माच्च संस्कारात् उत्तरं द्वितीयं कर्म जायते। तथा तेनैव प्रकारेण उत्तरमुत्तरं च सर्वं कर्म जायत इति कर्मनिकत्वमुपपन्नम्।

वेगे सति कर्म भवतीति वेगस्य गमनाख्यकर्म प्रति कारणत्वेऽन्वय उक्तः। अथ व्यतिरेकमाह—

२०१. संस्काराभावे गुरुत्वात्पतनम् ॥ १८ ॥

लक्ष्याभिघातेन वा नोदनमान्द्येन वेगस्य मध्य एव शान्तौ वा उपरि गमनं न भवति। किन्तु पूर्वोक्तरीत्या गुरुत्वहेतुकं पतनमेव। अतो वेगः उत्तरोत्तरगमनं प्रति कारणमिति।

इति वैशेपिकसूत्रवृत्तौ सुगमायां

पञ्चमाध्याये प्रथममाह्निकम्

अथ पञ्चमाध्याये

द्वितीयमाह्निकम् ।

प्रयत्नाधीनं तदनधीनं चेति कर्मणो विभागमभिप्रेत्य कर्म निरूपितम् । अथ सक्रियं अक्रियं चेति द्रव्यविभागमभिप्रेत्य तन्निरूपयति । तत्र प्रथमद्रव्ये पृथिव्यां यत् कर्म तत् कारणतो निरूपयति—

२०२. नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥ १ ॥

पृथिव्यां यत् कर्म तत् नोदनात् कर्मजनकसंयोगसमानाधिकरणात् कर्मणः भवति । कर्मवद्धस्तादिसंयोगादित्यत्रैव तात्पर्यम् । अभिघातात् गाढसंयोगात् । संयुक्तेन संयोगाच्च । नुन्नं दारु चलति । पार्थिवे दारुणि तस्मिन् चलनात्मकं कर्म नोदनात् । भित्तावभिहता शिला प्रत्यापतति । तत् तस्याः कर्म अभिघातात् । न परमेवं साक्षात् संयोगादेव पृथिव्यां कर्म, अपितु संयुक्तसंयोगादपि भवति । यथा एकस्मिन् शकटे नुन्ने तत्संयुक्तं शकटान्तरमपि चलति । इदमुपलक्षणं संयुक्तसंयुक्तसंयोगादेरपि । नोदनाभिघातादिति समाहारः ।

२०३. तद् विशेषेणादृष्टकारितम् ॥ २ ॥

तत् पृथिव्यां कर्म यद् विशेषेण भवति बलवद् भवतीत्यर्थः । तत् अदृष्टकारितं प्रत्यक्षेण वा अनुमानेन वा इदमिति विशिष्य निर्धारयितुमशक्येन केनापि कारणेन कारितं उत्पादितम् । भूकम्प इह विवक्षितः । एवं पृथिवीकर्म दृष्टकारणकं अदृष्टकारणकमिति द्वेधा भवति ।

अथ द्वितीयद्रव्यस्य अपां कर्म ।

२०४. अपां संयोगाभावे गुरुत्वात्पतनम् ॥ ३ ॥

अपां यावत् मेघसंयोगो भवति तावत् पतनं न भवति । तन्निवृत्तौ पतनं भवति । तत्र कारणं गुरुत्वम् ।

२०५. द्रवत्वात् स्यन्दनम् ॥ ४ ॥

अपामिति वर्तते । भूमौ पतिता आपः स्यन्दन्ते स्रवन्ति । तत् तासां स्यन्दनरूपं कर्म द्रवत्वात् कारणाद् भवति ।

२०६. नाडीवायुसंयोगादारोहणम् ॥ ५ ॥

भूमिष्ठानामपां मेघेषु आरोहणं यद् भवति तत् तासां कर्म नाडीवायुसंयोगात् । नाडीशब्देनेह तत्तुल्यप्रतीतयः सूर्यकिरणा विवक्षिताः । ताभिः वायुना च संयोगादित्यर्थः । नाडीत्यत्र अस्ति पाठभेदः ।

२०७. नोदनापीडनात् संयुक्तसंयोगाच्च ।। ६ ।।

अपामारोहणमित्यनुषज्यते । नोदनापीडनादिति समाहारः । श्रोत्रियाणामर्घ्यं-जलं यदूर्ध्वं गच्छति तन्नोदनात् । शिलातले पतितं तोयं यदुद्गच्छति तदापीडनात् अभिघातात् । गच्छता पुरुषेण शिरसि धृतात् कुम्भात् यदाप उच्चलन्ति तत् संयुक्त-संयोगात् ।

२०८. वृक्षाभिसर्पणमित्यदृष्टकारितम् ।। ७ ।।

भूमिष्ठा आपः यद् वृक्षमारुह्य सर्वत्र व्याप्नुवन्ति फलानामन्तश्च प्रविश्य तिष्ठन्ति एतदादिकं अपां कर्म अदृष्टकारितम् । आपः कुर्वन्ति । अदृष्टं कारणं ताः कारयति ।

पार्थिवीनामपां कर्मणः कारणमुक्तम् । अथ दिव्यानामुच्यते—

२०९. अपां सङ्घातो विलयनं च तेजःसंयोगात् ।। ८ ।।

सङ्घातः संहननरूपं कर्म । अवयवानां काठिन्यापरपर्यायनिबिडसंयोगानुकूलो व्यापारः संहननम् । द्रवत्वप्रत्यापत्त्यनुकूलो व्यापारः विलयनम् । संहता आपः करका भवन्ति । एवं करकावस्थाप्राप्तिः पुनर्द्रवीभावश्च तेजःसंयोगात् । कश्चन तेजःसंयोगः सङ्घातहेतुर्भवति । ततो विलक्षणः कश्चन तेजःसंयोगो विलयनहेतुर्भवति ।

ननु दिव्यास्वप्सु तेजःसंयोगोऽस्तीति कथं ज्ञायत इत्यत्राह—

२१०. तत्र विस्फूर्जथुर्लिङ्गम् ।। ९ ।।

तत्र दिव्यानामपां तेजःसंयोगसत्त्वे विस्फूर्जथुः अशनिपातः लिङ्गं प्रमाणम् । अशनिर्हि तेजोमयः । वृक्षादिदाहात् । सः मेघान्निर्गत्य पतन् मेघस्थानां अपां अस्ति तेजःसंयोग इति गमयति ।

२११. वैदिकं च ।। १० ।।

तत्र लिङ्गमित्यनुषज्यते । "चतुष्टय्यो वा आपः । मेघो विद्युत् । स्तनयित्नु-र्वृष्टिः ।" इति श्रूयते विद्युत् तेज एवेति । ननु मेघेषु विद्युत् प्रत्यक्षदृष्टैव । तत्र किं वेदोदाहरणेन । सत्यम् । परन्तु अद्भिः संयोगवत्तया सा न दृश्यते । वेदे तु अप्त्व-कीर्तनात् संयोगमूलोऽयं तेजोद्रव्यस्य अप्त्वव्यपदेश इति गम्यते । अतो युक्तं वैदिकं लिङ्गमिति ।

मेघात् अशनिपाते हेतुमाह—

२१२. अपां संयोगाद् विभागाच्च स्तनयित्नोः ।। ११ ।।

स्तनयित्नोः मेघस्य सम्बन्धिन्यः या आपः तासां मिथः गाढसंयोगात् संयुक्तानां विभागाच्च विस्फूर्जथुर्भवतीति योजना ।

एवं आद्यद्रव्यद्वयस्य कर्म निरूपितम्। अथ इतरद्रव्यस्य कर्म निरूपयति—

२१३. पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम्॥ १२॥

"नोदनाभिघातात् संयुक्तसंयोगाच्च तेजसि वायौ च कर्म। तद्विशेषेणादृष्टकारितम्" इति पृथिवीकर्मण इव तेजोवायुकर्मणोऽपि कारणं ज्ञेयमित्यर्थः। वायुनोदनादग्नौ कर्म जायते। दृषदोरभिघाताच्च। तस्मिन् सति अग्नेर्निर्गमात्। यदा अङ्गारः शलाकया नुद्यते तदा शलाकासंयुक्तकाष्ठखण्डसंयोगात् तत्संयुक्तः अग्निश्चलतीति तत्र संयुक्तसंयोगात् कर्म। व्यजननोदनात् वायौ कर्म। भित्तौ अभिहत्य परावर्तमाने वायौ अभिघातजं कर्म। व्यजननुन्नवायुसंयुक्ते वायौ संयुक्तसंयोगजम्।

२१४. अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक् पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि॥ १३॥

इतीति। इमानि कर्माणीत्यर्थः। अदृष्टकारितानि, अदृष्टकारणकानीत्यर्थः। अदृष्टं पुण्यपापरूपम्। दृष्टभिन्नं वा। अग्निरूर्ध्वमेव ज्वलति। न त्वधः तिर्यग्वा। वायुः तिर्यगेव पवते। न तु ऊर्ध्वं अधो वा। तत्र अदृष्टं कारणम्। प्रसङ्गादाह—अणुमनसोश्चेति। सृष्ट्यारम्भे अणूनामाद्यं कर्म अदृष्टकारणकम्। मनसश्च। तेन हीदं शरीरेण सम्बध्यते।

वायुपर्यन्तानां चतुर्णां द्रव्याणां कर्म निरूपितम्। अदृष्टकारणककर्मवत्त्वेन नवमद्रव्यस्य मनसः पूर्वसूत्रे प्रस्तुतत्वात् तदीयं दृष्टकारणकं कर्म हस्तकर्मवद् विज्ञेयमित्याह—

२१५. हस्तकर्मणा मनसः कर्म व्याख्यातम्॥ १४॥

प्रयत्नाधीनं तदनधीनं चेति द्विविधं कर्म यथा हस्ते तथा मनस्यपि। जागरावस्थायां तत्तदिन्द्रियसंयोगाय आत्मना तस्य प्रेरणात्। स्वप्नावस्थायां यत्नाभावेऽपि कारणान्तरेण तस्य सञ्चाराच्चेति भावः।

मनःकर्मोपरतिर्मोक्षप्रयोजक इति वक्ष्यन् प्रथमं तत्कर्मैव संसारहेतुरित्याह—

२१६. आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे॥ १५॥

इन्द्रियाणि बाह्यानि चक्षुरादीनि। मनसः पृथगुक्तेः। बाह्यार्थग्रहणे चतुर्णां सन्निकर्षो हेतुः। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति स्थितेः। आन्तरज्ञानादिग्रहणे बाह्येन्द्रियापेक्षा नास्ति। आत्मनोऽर्थसन्निकर्षस्यैव हेतुत्वात्। अस्य विशेषस्य द्योतनाय इन्द्रियमन इति क्रमान्तरेण निर्देशः। सन्निकर्षात् एतत्प्रयुक्ते सुखदुःखे इत्यर्थः। सन्निकर्षात् भोग्यवस्तुज्ञानं जायते। तेन सुखम्। पादे कण्ठकसंयोगे

सति तेन हेतुना आत्मसंयुक्तं मनः त्वगिन्द्रियेण संयुज्य वेधज्ञानं जनयति । तेन दुःखम् । सर्वं सुखं दुःखं च मनःकर्माधीनम् ।

२१७. तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः । स योगः ॥ १६ ॥

तस्य सुखदुःखहेतुभूतस्य सन्निकर्षस्य अनारम्भे अनुत्पादने सति । कथं तदनुत्पादनमित्यत्राह—आत्मस्थे मनसीति । अभ्यासवशीकृते मनसि आत्मचिन्तामात्रपरे सतीत्यर्थः । आत्मनि तिष्ठतीति आत्मस्थम् । तस्मिन् । स्थितिश्च तदेकचिन्तनम् । अभ्यासपाटवेन मनसि आत्मनिष्ठे सति विषयान्तरेभ्यो विमुखं तत् तत्सन्निकर्षहेतुभूतकर्मरहितं भवति । अतो न सन्निकर्षोत्पादनमिति भावः । शरीरस्य दुःखाभावः शरीरसम्बन्धि तत्प्रयुक्तं यद् दुःखं तस्याभावो भवति । यद्यपि दुःखाभाव इत्येवालम् । तथापि शरीरसम्बन्धप्रयुक्तमेवात्मनः सर्वं दुःखमिति ज्ञापनाय शरीरस्य दुःखाभाव इत्युक्तिः । "सशरीरस्य दुःखाभावः" इति पाठः किमस्तीति युक्तमन्वेष्टुम् । शरीरे सत्यपि दुःखाभाव इति तदर्थः । स योगः । सः दुःखहेतुभूतार्थसन्निकर्षारम्भककर्मरहितस्य मनसः आत्मनि स्थितिः योगः योगशब्दाभिधेयो मोक्षोपाय इत्यर्थः । आत्मनि स्थितिः तत्स्मृतिसन्ततिः । पूर्वसूत्रे सुखदुःखयोरुभयोरुपादानात् इहापि उभयोरभावो वक्तुमुचितः । तथाऽपि प्राज्ञैः वैषयिकस्य सुखस्य अल्पत्वास्थिरत्वादिहेतुभिः दुःखकोटौ परिगणनात् दुःखाभाव इति उभयाभाव एवाभिप्रेत इति ज्ञेयम् । सुखदुःखाभाव इति स्पष्टानभिधानं तु आत्मचिन्ताजन्यस्य सुखस्य तदानीं विद्यमानत्वेन सामान्यतः सुखाभावाभिधानं न घटत इत्यभिप्रायेण ।

एवं मनसा साध्यो मोक्षोपाय उक्तः । अथ मोक्षं निरूपयितुकामः यस्मान्मोक्षो विवक्षितः तस्य बन्धस्य स्वरूपं प्रतिपादयिष्यन् तदुपयोगितया किञ्चिदाह—

२१८. कायकर्मणा आत्मकर्म व्याख्यातम् ॥ १७ ॥

आत्मा विभुः । तस्य कर्म नास्ति । तथापि कायस्य यत् कर्म तदेव आत्मकर्मतया उपचर्यते व्यवहारसौकर्याय । तत्रानुपपत्तिर्न शङ्कनीया । व्यवहारस्य औपचारिकत्वात् ।

कायकर्मणा ज्ञातेन आत्मकर्मापि ज्ञातं भवति । अव्यतिरिक्तत्वादिति सूत्रार्थः ।

अथ बन्धस्वरूपं सकारणमाह—

२१९. अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चादृष्टकारितानि ॥ १८ ॥

अपसर्पणं पूर्वशरीरान्निष्क्रमणम् । उपसर्पणं शरीरान्तरसम्बन्धः । अशितं भुक्तमन्नम् । पीतं जलम् । अनयोः संयोगाः शरीरस्यान्तः जीवनार्हतया तेषु तेषु प्रदेशेषु सम्बन्धाः । कार्यान्तराणि इतोऽप्यन्यानि शरीरान्तराणि तैः संयोगाश्च अदृष्टकारितानि पुण्यपापैः दृष्टभिन्नैश्च कैश्चित् कारणैः कारितानि । पूर्वं किञ्चित् शरीरम् । तस्य परित्यागः । अन्यस्य शरीरस्य परिग्रहः । तत्र जीवनम् । जीर्णस्य तस्य परित्यागः । पुनरुत्तरोत्तरं अन्यान्यशरीरपरिग्रहः इत्ययं शरीरपरम्परापरिग्रह एव बन्धः । तस्य च अदृष्टं कारणमित्युक्तं भवति ।

अत्र अपसर्पणादीनि कर्माणि वस्तुतः आत्मनि न सन्ति । शरीराणामेव तु उत्पद्यमानानां तेन सम्बन्धो भवति । अतोऽत्रौपचारिको व्यवहारः ।

अथ कारणाभावप्रयुक्तकार्याभावरूपो मोक्ष इत्याह—

२२०. तदभावे संयोगाभावोऽप्रादुर्भावः स मोक्षः ।। १९ ।।

तस्य कारणभूतस्य अदृष्टस्य योगाभ्यासेन नष्टत्वादभावे यः संयोगस्य शरीरान्तरसम्बन्धस्यानुत्पत्त्या अभावः तद्रूपः अप्रादुर्भावः जन्मात्यन्ताभावः भवति । सः जन्मात्यन्ताभाव मोक्षः मोक्षपदवाच्यः परमपुरुषार्थः । सर्वस्य शास्त्रस्य यतो मोक्षः तदुपायश्च प्रधानप्रतिपाद्यौ अतः "स योगः ।" "स मोक्षः" इति पृथग्वाक्येन तयोरभिधानमिति ज्ञेयम् ।

इत्थं कर्मवत्तया मनःपर्यन्तेषु द्रव्येषु निरूपितेषु तमो नाम अन्यदपि द्रव्यमस्ति तच्च क्रियावत् इति ये मन्यन्ते तेषां मतं निरस्यति । द्रव्यत्वाभावेऽपि गुणः कर्म वा तदस्तु इति ये मन्येरन् तेषां तन्मतंच—

२२१. द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद् भाऽभावस्तमः ।। २० ।।

तमोऽनित्यमिति तावदवश्यं वाच्यम । कदाचित् सत्त्वात् कदाचिदसत्त्वाच्च । तत्र अनित्यं द्रव्यं सर्वं द्रव्यसमवायिकारणकम् । न च तमसः समवायिकारणं किञ्चिदुपलभ्यते । अत एव न गुणः कर्म वा । समवायिकारणद्रव्यानुपलम्भात् । न ह्याश्रयद्रव्यं विना गुणः कर्म वा वर्तेत । निष्पत्तेः उत्पत्तेः वैधर्म्यं विरुद्धधर्मवत्त्वम् । विरुद्धधर्मः समवायिकारणभूतद्रव्याभावः । एवं तावत् तमः न द्रव्यं गुणः कर्म वा । किं तर्हि अभावः । कस्याभावः । भायाः प्रकाशस्य अभावः । कस्मात् । प्रकाशविरुद्धत्वात् । प्रकाशतमसोर्हि मिथो विरोधः । घटतदभावयोरिव एकत्र युगपदनवस्थानात् । तत्र तमोऽभावः प्रकाश इति वक्तुं न शक्यते । प्रकाशाश्रयस्य तेजसः उष्णस्पर्शाश्रयतया पृथगङ्गीकर्तव्यत्वात् । न चैवं प्रकाशाभावरूपतया तमसोऽङ्गीकारे काचिदनुपपत्तिः । द्रव्यस्यैवासिद्धौ तस्य कर्मणः कः प्रसङ्गः ।

न परं तेजसोऽसन्निधाने तमो भवति । अपितु

२२२. तेजसो द्रव्यान्तरेणावरणाच्च ॥ २१ ॥

सन्निहितस्य दीपस्य शरावादिना द्रव्यान्तरेण पिधानाच्च प्रकाशप्रसराभावात् तमो भवति । अतो भाऽभाव एव तम इति स्पष्टमेतत् ।

२२३. दिक्कालावाकाशञ्च क्रियावद्वैधर्म्यान्निष्क्रियाणि ॥ २२ ॥

वायुकर्मनिरूपणानन्तरं मनःकर्म आत्मकर्म च निरूपितम् । अत्र प्रतिलोम-क्रमस्य प्रसक्तत्वात् तेनैव क्रमेण मध्यमानि त्रीणि द्रव्याणि निर्दिशन् तेषां कर्म नास्ति; अतस्तन्निरूपणं न क्रियत इत्यभिप्रेत्येदमाह । तेषां कर्माभावे हेतुः क्रियावद्वैधर्म्यादिति । क्रियावत् सर्वं द्रव्यं मध्यमपरिमाणम् । न किमपि विभु । इमानि त्रीणि पुनः विभूनि अतो निष्क्रियाणीत्यर्थः । क्रियावद्वैधर्म्यं क्रियावद्द्रव्यवृत्तिधर्मविजातीयधर्मवत्त्वम् ।

२२४. एतेन कर्माणि गुणाश्च व्याख्याताः ॥ २३ ॥

एतेन दिगादित्रयस्य निष्क्रियत्वप्रतिपादनेन कर्माणि व्याख्यातानि निष्क्रियत्वे-नोक्तानि भवन्ति । गुणाश्च तथा व्याख्याता भवन्ति । कथम् क्रियावद्वैधर्म्यस्य तुल्य-त्वात् । क्रियावन्तो हि सर्वे पदार्था मूर्तिमन्तः । मूर्तिः स्पर्शाणुपरिमाणान्यतरविशिष्टं स्वरूपम् । न च कर्माणि ईदृशमूर्तिमन्ति । नापि गुणाः । अत इमानि निष्क्रियाणि ।

२२५. निष्क्रियाणां समवायः कर्मभ्यो निषिद्धः ॥ २४ ॥

निष्क्रियाणां दिगादीनां वस्तूनां समवायः तेषु समवायेन वृत्तिरित्यर्थः । कर्म-भ्यः कर्मणां सकाशात्, निषिद्धः प्रमाणैः व्यावर्तितः । कर्मसु अविद्यमानतया प्रमित इत्यर्थः । ननु दिगादीनि वस्तूनि परत्वापरत्वगुणादिरूपकार्याणि प्रति कारणानि भवन्ति । निष्क्रियाणां तेषां कारणत्वं कथं घटेत । कुलालदण्डचक्रादीनि हि क्रियावन्त्येव सन्ति कारणानि भवन्ति । इति शङ्कापरिहाराय निष्क्रियाणामेव तेषां कारणत्वमुप-पादनीयम् । न तु कारणत्वसिद्धये तेषु क्रियावत्त्वमावश्यकमिति मन्तव्यमिति बोधनाय "निष्क्रियाण्येव तानि" इत्यवधारणं एतत्सूत्रकृत्यमिति विभाव्यम् ।

अथ निष्क्रियाणां कारणत्वं प्रदर्शयन् प्रथमं गुणानां दर्शयति—

२२६. कारणन्त्वसमवायिनो गुणाः ॥ २५ ॥

असमवायिनः क्रियासमवायरहिताः गुणाः कारणं तु कारणमेव । स्वस्वकार्य-निर्वर्तका भवन्त्येव हीति भावः । गुरुत्वं पतनहेतुर्भवति । द्रवत्वं स्यन्दने हेतुः । संयोगः शब्दहेतुर्भवति । संयोगान्तरस्य च । न ह्यत्र कर्मापेक्षा वर्तते । निष्क्रियाणामपि कर्मणां स्वयं क्रियारूपत्वात् स्वकार्यनिर्वर्तकत्वं भवितुमर्हतीति मत्वा तत्रानुपपत्तिशङ्कां स्वरसतः कोऽपि न कुर्यादिति कृत्वा कर्माणि विहाय गुणेषु परमुपपत्तिप्रदर्शनम् । एतदर्थमेव प्रपूर्वसूत्रे कर्माणि गुणाश्चेति उभयेषां पृथक्करणं कर्मणां पूर्वनिर्देशश्च ।

२२७. गुणैर्दिग्व्याख्याता ॥ २६ ॥

क्रियारहिता गुणाः यथा कारणं भवन्ति तथैव दिगपि क्रियारहितैव परत्वापरत्वे प्रति कारणं भवतीति ज्ञेयमिति भावः ।

२२८. कारणेन कालः ।। २७ ।।

व्याख्यात इति विपरिणतमनुषज्यते । क्रियारहित एव कारणमिति ज्ञापित इति तदर्थः । कारणेन "नित्येष्वभावादनित्येषु भावात् कारणे कालाख्या" इति कालः कारणमिति वदता सूत्रेणेत्यर्थः ।

वसन्ते पुष्पाणि, ग्रीष्मे तापः, वर्षासु वृष्टिः इत्यबाधितप्रतीतिबलात् कालः कारणमित्युक्तम् । तत्र क्रियानिरपेक्षस्य स्वरूपत एव हि कालस्य कारणत्वं विवक्षितम् । अतः निष्क्रिय एव कालः कारणमिति स्थितम् ।

दिक्कालयोः स्वातिरिक्ततत्तद्द्रव्यगतपरत्वापरत्वकारणं निष्क्रिययोः कथं भवतीति स्वरसतः शङ्का भवतीति कृत्वा निष्क्रिययोरेव तयोः कारणत्वं सम्भवतीत्युक्तम् । आकाशस्य "दिक्कालावकाशं च क्रियावद्वैधर्म्यान्निष्क्रियाणि" इति निष्क्रियत्वेनोक्तस्य द्रव्यान्तरगतक्रियाधीनसंयोगविभागशब्दकारणकशब्दसमवायित्वेनानुमीयमानस्य "निष्क्रियस्य तस्य कथं शब्दाश्रयत्वम्" इति शङ्का नैवोदेतीति नास्याः परिहारं करोति सूत्रकारः । इमं विशेषमभिप्रेत्यैव "दिक्कालाकाशानि" इति समासमकृत्वा "आकाशं च" इति पृथङ् निर्देश इति विभाव्यम् ।

इति
वैशेषिकसूत्रवृत्तौ सुगमायां
पञ्चमाध्याये द्वितीयमाह्निकम्

अथ षष्ठाध्याये

प्रथममाह्निकम्

लौकिकक्रियारूपं कर्म निरूपितम् । अथ वैदिकक्रियारूपं तन्निरूप्यते । तत्र वेदप्रामाण्यसिद्धये तत्कर्तुराप्तत्वं वक्ष्यन् प्रथमं तस्य कर्तृमत्त्वं साधयति—

२२९ः बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥ १ ॥

लौकिकस्य अस्मदादिप्रत्यक्षस्य एतन्मूलकस्यानुमानस्य च अगोचरो योऽर्थः तद्बोधकः ऋग्यजुःसामाथर्वभेदेन विभज्यमानः शब्दराशिर्वेदः । तत्र यानि वाक्यानि सन्ति तानि सर्वाणि केनचित् कैश्चिद्वा कर्तृभिः कृतानीति वक्तव्यम् । रामायणमहाभारतादिवाक्यवत् । न हि वक्तारं पुरुषं विना लोके किञ्चन वाक्यं दृश्यते । अशरीरिणी वागस्तीति चेत् सत्यम् । न तु अवक्तृका वागस्ति । तत्रापि अदृश्यस्य वक्तुरवश्यम्भावात् । वाक्यानां कर्ता च सः, यः तदर्थबोधवान् । आहुर्हि अर्थं बुद्ध्वा शब्दरचनेति । अनेन वाक्यरचनां प्रति वक्तुस्तद्वाक्यार्थबोधः कारणमित्युक्तं भवति । अनया व्याप्त्या वेदवाक्यरचनाऽपि तदर्थबोधपूर्विकेति सिद्ध्यति । इदमुच्यते--'बुद्धिपूर्वा वाक्यकृतिर्वेदे' इति । बुद्धिर्बोधः, स च वाक्यार्थविषय इत्यर्थाल्लभ्यते । न च बुद्धिर्बोद्धारं विनेति कर्तृसिद्धिः ।

एवमनुमानात् सिद्धस्य वेदकर्तुराप्तत्वं साधयति—

२३०. ब्राह्मणे संज्ञाकर्म सिद्धिलिङ्गम् ॥ २ ॥

मन्त्रो ब्राह्मणमिति वेदस्य द्वौ भागौ । तत्र ब्राह्मणभागे अलौकिकानां कर्मणां अन्येषां च स्वर्गनरकादिरूपाणां अर्थानां संज्ञाः दृश्यन्ते । संज्ञाश्च "प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः" इति पूर्वोक्तरीत्या तदर्थसाक्षात्कारसमर्थैरेव कृता भवितुमर्हन्ति । अतः ब्राह्मणे दृश्यमाना याः अलौकिकानामर्थानां संज्ञाः तासां कर्म क्रिया, तत्कर्तॄणां, तत्करणपूर्वकं ता उपयुज्य वेदवाक्यानि रचितवतां पुरुषाणां, सिद्धौ अतीन्द्रियार्थसाक्षात्कारसामर्थ्ये, लिङ्गं प्रमाणं भवति । तथा च अनेन लिङ्गेन अवगतशक्तिविशेषाणां वेदकर्तॄणां वेदवाक्यरचनहेतुभूतं ज्ञानं प्रमात्मकमेवेति तेषां यथार्थदर्शित्वरूपं आप्तत्वं निश्चीयते । अतस्तत्कृतस्य वेदस्य प्रामाण्यं निर्विघातमिति भावः ।

एवं वेदप्रामाण्यं प्रसाध्य अथाद्य तत्प्रमेयं धर्ममाह—

२३१. बुद्धिपूर्वो ददातिः ॥ ३ ॥

दानार्थकधातुवाची ददातिशब्दः अत्र दद्यादिति दानविधिमाह। सः बुद्धिपूर्वः, "दाने कृते इदं फलं भवति। अतः एतत्फलकामैः दानं कर्तव्यम्। तच्च एवं कर्तव्यम्।" इति बुद्धिपूर्वकः। अनया बुद्ध्या वेदकर्ता दानविधिं वेदे निबद्धवानित्यर्थः। एवं विहितं दानं "अभ्युदयसाधनतया" वेदेन बोधितत्वात् "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इत्युक्तलक्षणाक्रान्तं भवतीति धर्मपदवाच्यं भवति।

अध्ययनं इज्या दानमिति धर्मस्त्रिविधः। वेदबोधितः। तत्र अध्ययनं वेदग्रहणधारणार्थतया दृष्टफलमिति स्पष्टम्। कालान्तरानुभाव्यस्वर्गादिफला इज्या अदृष्टफलेत्यपि स्पष्टम्। अतो धर्मानुष्ठानप्रथमसाधनशरीरधारणोपयुक्तदानप्रतिग्रहविषये किञ्चित् वक्तुकामः प्रथमं दानस्य धर्मत्वं अत्राब्रवीदिति ज्ञेयम्।

२३२. तथा प्रतिग्रहः ॥ ४ ॥

परेण दीयमानस्य स्वीकरणं प्रतिग्रहः, सोऽपि तथा बुद्धिपूर्वः। प्रतिग्रहः कदा कस्मात् कथं कर्तव्य इति बोधपूर्वकं निबद्ध इति भावः। यथाविधि क्रियमाणः प्रतिग्रहो धर्मो भवति। अन्यथा नेत्युक्तं भवति। दानेऽप्येतदनुसन्धेयम्।

२३३. आत्मान्तरगुणानामात्मान्तरगुणेष्वहेतुत्वात् ॥ ५ ॥

प्रतिग्रहं विना दानस्यानिष्पत्त्या दानान्तर्भूत एव प्रतिग्रहः। तत् कथमस्य दानापेक्षया पृथक् धर्मत्वमिति शङ्कापरिहारार्थमिदं सूत्रम्। सत्यं दानं केनचित् क्रियमाणं परेण क्रियमाणं प्रतिग्रहमपेक्षते। न तु तावता दानांशः प्रतिग्रहः। दानं हि नाम वस्तुनि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम्। अस्मा इदं न मम, इति ज्ञानविशेषः। अयं दातृनिष्ठः। तन्निष्ठफलजनकः। दात्रा स्वस्वत्वनिवर्तनपूर्वकं आपाद्यमानस्य परस्वत्वस्य "इदं वस्तु मदीयं भवतु" इति परेण क्रियमाणा अनुमतिः प्रतिग्रहः। अयमपि ज्ञानविशेषात्मा। परनिष्ठः तन्निष्ठफलहेतुः। एवं दानभिन्नस्य दातृभिन्ननिष्ठगुणरूपस्य प्रतिग्रहस्य दातृनिष्ठफलविशेषात्मकगुणहेतुत्वाभावात् प्रतिग्रहीतृनिष्ठफलजनकत्वाच्च दानात् पृथग्धर्मत्वमवश्यं वाच्यमिति भावः।

सूत्रे प्रथमः आत्मान्तरशब्दः प्रतिग्रहीतृपरः। द्वितीयः दातृपरः। आत्मान्तरगतं ज्ञानं इच्छा अदृष्टं वा आत्मान्तरगताया इच्छायाः प्रवृत्तेः सुखादेर्वा हेतुर्न भवति। तथा प्रकृतेऽपीति दृष्टान्तज्ञापनाय गुणानां गुणेष्विति बहुवचनम्।

२३४. तद् दुष्टभोजने न विद्यते ॥ ६ ॥

अभ्युदयसाधनतया धर्मभूतस्य दानस्य इतरस्माद् विविच्य बोधाय इतरद् दर्शयति अनेन सूत्रेण। तद् उक्तविधबुद्धिपूर्वकत्वं, दुष्टस्य पुरुषस्य भोजने, णिजन्तात् ल्युटि इदं रूपम्। आशने इत्यर्थः। दुष्टाय अन्नदाने इत्युक्तं भवति। न विद्यते नास्ति। दुष्टाय क्रियमाणं अन्नदानं न धर्मः। अदुष्टसम्प्रदानकस्यैव दानस्य उक्तविधवेद-

कर्तृबुद्धिपूर्वकत्वेन धर्मत्वादिति भावः। अत्र भोजनमिति द्रव्यान्तरदानानामप्युपलक्षणम्।

कः दुष्ट इत्यत्राह—

२३५. दुष्टं हिंसायाम् ॥ ७ ॥

हिंसायां सत्यां तस्या हिंसायाः कर्तारं पुरुषं दुष्टं विजानीयात्। तस्य भोजनं न धर्मः। नाभ्युदयाय।

ननु हिंसारहितः पुरुषो लोके दुर्लभः। अन्ततः मशकपिपीलिकादिहिंसाया अवर्जनीयत्वात्। अत्राह—

२३६. तस्य समभिव्याहारतो दोषः ॥ ८ ॥

हिंसाकारितया दुष्ट इत्यत्र दुष्ट इत्यनेन विवक्षितो यः पुरुषः तस्य समभिव्याहारतः संसर्गात् दोषः पातित्यं भवति। पातकिसंसर्गो हि पातित्यहेतुः। अतः यस्य संसर्गात् इतरस्य पातकं भवति तादृशः ब्रह्महत्यादिकरणात् पातकवान् कापुरुषः दुष्ट इतीहाभिप्रेतः। तस्य भोजनं नाभ्युदयहेतुः। न धर्म इति भावः।

२३७. तददुष्टे न विद्यते ॥ ९ ॥

तत् "तद् दुष्टभोजने न विद्यते" इत्युक्तं अबुद्धिपूर्वकत्वं तन्मूलकं अभ्युदयाहेतुत्वं वा अदुष्टे उक्तविधदुष्टभिन्ने भोक्तरि सति न विद्यते। तस्य भोजनस्य बुद्धिपूर्वकत्वं भवतीति भावः। "तददुष्टे विद्यते" इति नञ्रहितः पाठः किमस्तीति युक्तमन्वेषणम्। अदुष्टेन भोक्त्रा तद्विद्यत इति योजनं यद्यपि सङ्गतं तथापि न स्वारसिकम्। दोषाभावमात्रेणापि पुरुषो दानयोग्यो भवतीति सूत्रकार इह विवक्षति।

यद्यप्येवं तथापि गुणा अपि यत्र सन्ति स पात्रीकर्तव्य इत्याह—

२३८. पुनर्विशिष्टे प्रवृत्तिः ॥ १० ॥

पुनः किन्तु विशिष्टे स्वापेक्षयाऽपि अभिजनविद्यावृत्तादिभिः अधिके, उत्कृष्टे, पुरुषे प्रवृत्तिः दानविषयो यत्नः। कर्तव्येति शेषः।

२३९. समे हीने वा प्रवृत्तिः ॥ ११ ॥

विशिष्टस्यालाभे, आभिजात्यादिभिः स्वस्य समे सदृशे, हीने अपकृष्टे वा प्रवृत्तिः कार्या। न तु अदुष्टलाभमात्रेण तृप्तिः कार्या। यथा यथा प्रतिग्रहीता गुणवान् तथा तथा दानस्य वीर्यवत्तरत्वादिति भावः। अत्र प्रवृत्तिरिति अनुषङ्गादेव लाभात् पुनः पाठः एतद्ज्ञापनार्थः।

२४०. एतेन हीनसमविशिष्टधार्मिकेभ्यः परस्वादानं व्याख्यातम् ॥ १२ ॥

प्रधानकर्मणी। प्रोक्षणमङ्गम्। अथ नियमाः दिङ्नियमः। प्राङ्मुख उदङ्मुखो वा उपविश्य आचामेदित्यादिः। नक्षत्रनियमः अस्मिन्नक्षत्रे इदं कर्म कर्तव्यमिति। यथा पुनर्वस्वोरादधीतेति। मन्त्रनियमः विहितमन्त्रेण स्मृत्वैव तत्तत्कर्म कर्तव्यमिति। कालनियमः सायं जुहोति, प्रातर्जुहोति, पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायां अमावास्यया यजेतेति। अभिषेचनोपवासयोः सन्न्यासिसाधारणत्वात्, सन्न्यासिनां गृहस्थादीनां यज्ञादिवत् विशिष्य वक्तव्यकर्मविशेषाभावात् सन्न्यासाश्रमस्य मोक्ष प्रधानतया अदृष्टार्थत्वस्य स्पष्टत्वाच्च तदीयं कर्म किमप्यत्र नोक्तमिति ज्ञेयम्।

एवं वैदिकं कर्म दृष्टादृष्टप्रयोजनभेदेन द्वेधा विभज्य दर्शितम्। अथ उपधानुपधाभेदेन विभजति, उपधारूपं परित्याज्यमिति ज्ञापनाय—

२४७. चातुराश्रम्यमुपधा अनुपधाश्च॥ ३॥

चतुर्षु ब्रह्मचर्यादिषु आश्रमेषु स्थितानां कर्तव्यतया विहितानि कर्माणि उपधारूपाणि अनुपधारूपाणि च भवन्ति।

उपधानुपधाशब्दौ स्वयमेव व्याचष्टे—

२४८. भावदोष उपधाऽदोषोऽनुपधा॥ ४॥

उपधाशब्देन भावदोषः प्रवृत्तिनिमित्ततया उच्यते। तदभावः अनुपधाशब्देन। तथा च पूर्वसूत्रे चतुराश्रमसम्बन्धीनि कर्माणि भावदुष्टानि भावदोषरहितानि, इति द्विविधानीति विवक्षितमिति भावः। भावः आशयः, अभिसन्धिः। अश्रद्धया सत्कारलाभपूजादिहेतोः क्रियमाणानि भावदुष्टानि। श्रद्धया भगवत्प्रीत्यर्थं लोकक्षेमार्थं च क्रियमाणानि भावदोषरहितानि। पूर्वाणि अभ्युदयाय न भवन्ति। तस्मात् तानि न कर्तव्यानीति। यद्यपि अन्तिमाश्रमिणां यज्ञदानादिरूपं कर्म नास्ति तथाऽपि भिक्षाचरणजपादिरूपं किञ्चित् अस्तीति चातुराश्रम्योक्तिः॥

२४९. यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि॥ ५॥

इष्टाः प्रियाः अनुभाव्याः रूपादयः यस्य तद् वस्तु इष्टरूपरसगन्धस्पर्शम्। यद्वस्तु ईदृशं प्रोक्षितं अभ्युक्षितं च तत् शुचि शुद्धम् उपयोगार्हमित्यर्थः। इष्टरूपत्वादिः दृष्टा शुद्धिः। प्रोक्षणाभ्युक्षणजन्या अदृष्टा। समन्त्रकं प्रोक्षणम्। अमन्त्रकं तदेव अभ्युक्षणमिति वदन्ति।

भावदोषाभावः शुचिभोजनात्। अशुचिभोजनात्तु भावो दुष्यतीति ज्ञापनाय प्रथमं शुचिलक्षणमस्मिन् सूत्रे ब्रवीतीति ज्ञेयम्।

अथ अशुचिपदार्थमाह—

२५०. अशुचीति शुचिप्रतिषेधः॥ ६॥

न शुचि अशुचि। अशुचीत्यनेन यन्न शुचि भवति तदुच्यत इत्यर्थः। यदनिष्टरूपादि अप्रोक्षितमनभ्युक्षितं च तत् अशुचीत्युच्यत इति यावत्॥

अन्योऽप्यर्थं अस्य शब्दस्यास्तीत्याह—

२५१. अर्थान्तरं च ॥ ७ ॥

न केवलमुक्तरीत्या यत् शुचि तद्भिन्नं अशुचिशब्दाभिधेयं, अपि तु यत् जात्या आश्रयेण निमित्तेन वा दुष्टं तदपि तदभिधेयमित्यर्थः। कलञ्जगृञ्जनादिकं जातिदुष्टम्। अभिशस्तपतितादिद्रव्यमाश्रयदुष्टम्। उच्छिष्टकेशाद्युपहतं निमित्तदुष्टम्। भावदोषानुत्पत्तिकामैः इदं सर्वं न भोक्तव्यम्। शुचिभोजनमेव कर्तव्यम्, इति भावः ॥

अथ क्वचित् शुचि भोजनमपि न फलाय कल्पत इत्याशङ्क्य परिहरति—

२५२. अयतस्य शुचिभोजनादभ्युदयो न विद्यते। विद्यते वाऽर्थान्तरत्वात् यमस्य ॥ ८ ॥

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। यस्य एते सन्ति सः यतः। यस्य न सन्ति सः अयतः। अस्य अयतस्य यमरहितस्येत्यर्थः। शुचिभोजनात् शुद्धाहारसेवनात्, अभ्युदयः भावदोषाभावरूपः, विहितकर्मानुष्ठानयोग्यतारूपः, फलविशेषः न विद्यते नास्ति। नोत्पद्यते। कुतः। नियमाभावात्। एते हि यमाः विहितकर्मानुष्ठानसाद्गुण्यापादकाः अत एव तदङ्गभूता नियमा भवन्ति। शुचिना हि शास्त्रचोदितं कर्म कर्तव्यम्। न च हिंसादिकर्तुः यमरहितस्य शुचित्वमस्ति। न चाशुचिना क्रियमाणं भोजनं भुज्यमानस्य शुचित्वेऽपि फलाय कल्पेत। अतोऽभ्युदयो न विद्यत इति पूर्वः पक्षः। अत्र सिद्धान्तमाह-विद्यते वेत्यादिना। वकारः पक्षान्तरोपस्थापनद्वारा पूर्वपक्षनिरसनबोधकः। विद्यत एवाभ्युदयः अयतस्यापि शुचिभोजनात्। कुतः। अर्थान्तरत्वाद् यमस्य। यमः भोजनाद्यङ्गभूतनियमेभ्योऽर्थान्तरम्। अहिंसादीनां यमानां योगाङ्गत्वं पुरुषार्थत्वं वा। न तु भोजनादिकमर्थित्वम्। तथा विधानाभावात्। स्नातेन भोक्तव्यम्, पञ्च महायज्ञान् कृत्वा भोक्तव्यम्, भगवते निवेदितं भोक्तव्यम्, इत्येवमादीनामेव नियमानां तदङ्गत्वात् ॥

उक्तमेव द्रढयन्नाह—

२५३. असति चाभावात् ॥ ९ ॥

शुचिभोजनानङ्गभूते यमेऽसत्यपि अङ्गभूतनियमाभावस्याभावात्, अङ्गभूतनियमसत्त्वादित्यर्थः। विद्यत इत्यनुषक्तेन अन्वयः। यद्वा अङ्गभूतनियमे असत्येव शुचिभोजनजन्यस्य अभ्युदयस्य अभावात्। न तु अनङ्गभूते यमे असतीत्यर्थः। असति च भावादिति पाठः किमस्तीत्यन्वेष्टव्यम् ॥

अथ धर्माधर्मरूपस्य कर्मणः संसारबन्धहेतुत्वं वक्ष्यन् कर्मणि पुरुषप्रवृत्तेर्हेतुं वदति—

प्रधानकर्मणी। प्रोक्षणमङ्गम्। अथ नियमाः दिङ्नियमः। प्राङ्मुख उदङ्मुखो वा उपविश्य आचामेदित्यादिः। नक्षत्रनियमः अस्मिन्नक्षत्रे इदं कर्म कर्तव्यमिति। यथा पुनर्वस्वोरादधीतेति। मन्त्रनियमः विहितमन्त्रेण स्मृत्वैव तत्तत्कर्म कर्तव्यमिति। कालनियमः सायं जुहोति, प्रातर्जुहोति, पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायां अमावास्यया यजेतेति। अभिषेचनोपवासयोः सन्यासिसाधारणत्वात्, सन्यासिनां गृहस्थादीनां यज्ञादिवत् विशिष्य वक्तव्यकर्मविशेषाभावात् सन्न्यासाश्रमस्य मोक्ष प्रधानतया अदृष्टार्थत्वस्य स्पष्टत्वाच्च तदीयं कर्म किमप्यत्र नोक्तमिति ज्ञेयम्।

एवं वैदिकं कर्म दृष्टादृष्टप्रयोजनभेदेन द्वेधा विभज्य दर्शितम्। अथ उपधानुपधाभेदेन विभजति, उपधारूपं परित्याज्यमिति ज्ञापनाय—

२४७. चातुराश्रम्यमुपधा अनुपधाश्च ॥ ३ ॥

चतुर्षु ब्रह्मचर्यादिषु आश्रमेषु स्थितानां कर्तव्यतया विहितानि कर्माणि उपधारूपाणि अनुपधारूपाणि च भवन्ति।

उपधानुपधाशब्दौ स्वयमेव व्याचष्टे—

२४८. भावदोष उपधाऽदोषोऽनुपधा ॥ ४ ॥

उपधाशब्देन भावदोषः प्रवृत्तिनिमित्ततया उच्यते। तदभावः अनुपधाशब्देन। तथा च पूर्वसूत्रे चतुराश्रमसम्बन्धीनि कर्माणि भावदुष्टानि भावदोषरहितानि, इति द्विविधानीति विवक्षितमिति भावः। भावः आशयः, अभिसन्धिः। अश्रद्धया सत्कारलाभपूजादिहेतोः क्रियमाणानि भावदुष्टानि। श्रद्धया भगवत्प्रीत्यर्थं लोकक्षेमार्थं च क्रियमाणानि भावदोषरहितानि। पूर्वाणि अभ्युदयाय न भवन्ति। तस्मात् तानि न कर्तव्यानीति। यद्यपि अन्तिमाश्रमिणां यज्ञदानादिरूपं कर्म नास्ति तथाऽपि भिक्षाचरणजपादिरूपं किञ्चित् अस्तीति चातुराश्रम्योक्तिः॥

२४९. यदिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ॥ ५ ॥

इष्टाः प्रियाः अनुभाव्याः रूपादयः यस्य तद् वस्तु इष्टरूपरसगन्धस्पर्शम्। यद्वस्तु ईदृशं प्रोक्षितं अभ्युक्षितं च तत् शुचि शुद्धम् उपयोगार्हमित्यर्थः। इष्टरूपत्वादिः दृष्टा शुद्धिः। प्रोक्षणाभ्युक्षणजन्या अदृष्टा। समन्त्रकं प्रोक्षणम्। अमन्त्रकं तदेव अभ्युक्षणमिति वदन्ति।

भावदोषाभावः शुचिभोजनात्। अशुचिभोजनात्तु भावो दुष्यतीति ज्ञापनाय प्रथमं शुचिलक्षणमस्मिन् सूत्रे ब्रवीतीति ज्ञेयम्।

अथ अशुचिपदार्थमाह—

२५०. अशुचीति शुचिप्रतिषेधः ॥ ६ ॥

न शुचि अशुचि। अशुचीत्यनेन यन्न शुचि भवति तदुच्यत इत्यर्थः। यदनिष्टरूपादि अप्रोक्षितमनभ्युक्षितं च तत् अशुचीत्युच्यत इति यावत्॥

अन्योऽप्यर्थ अस्य शब्दस्यास्तीत्याह—

२५१. अर्थान्तरं च ।। ७ ।।

न केवलमुक्तरीत्या यत् शुचि तद्भिन्नं अशुचिशब्दाभिधेयं, अपि तु यत् जात्या आश्रयेण निमित्तेन वा दुष्टं तदपि तदभिधेयमित्यर्थः । कलञ्जगृञ्जनादिकं जातिदुष्टम् । अभिशस्तपतितादिद्रव्यमाश्रयदुष्टम् । उच्छिष्टकेशाद्युपहतं निमित्तदुष्टम् । भावदोषानुत्पत्तिकामैः इदं सर्वं न भोक्तव्यम् । शुचिभोजनमेव कर्तव्यम्, इति भावः ।।

अथ क्वचित् शुचि भोजनमपि न फलाय कल्पत इत्याशङ्क्य परिहरति—

२५२. अयतस्य शुचिभोजनादभ्युदयो न विद्यते । विद्यते वाऽर्थान्तरत्वात् यमस्य ।। ८ ।।

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । यस्य एते सन्ति सः यतः । यस्य न सन्ति सः अयतः । अस्य अयतस्य यमरहितस्येत्यर्थः । शुचिभोजनात् शुद्धाहारसेवनात्, अभ्युदयः भावदोषाभावरूपः, विहितकर्मानुष्ठानयोग्यतारूपः, फलविशेषः न विद्यते नास्ति । नोत्पद्यते । कुतः । नियमाभावात् । एते हि यमाः विहितकर्मानुष्ठानसादगुण्यापादकाः अत एव तदङ्गभूता नियमा भवन्ति । शुचिना हि शास्त्रचोदितं कर्म कर्तव्यम् । न च हिंसादिकर्तुः यमरहितस्य शुचित्वमस्ति । न चाशुचिना क्रियमाणं भोजनं भुज्यमानस्य शुचित्वेऽपि फलाय कल्पेत । अतोऽभ्युदयो न विद्यत इति पूर्वः पक्षः । अत्र सिद्धान्तमाह-विद्यते वेत्यादिना । वकारः पक्षान्तरोपस्थापनद्वारा पूर्वपक्षनिरसनबोधकः । विद्यत एवाभ्युदयः अयतस्यापि शुचिभोजनात् । कुतः । अर्थान्तरत्वाद् यमस्य । यमः भोजनाद्यङ्गभूतनियमेभ्योऽर्थान्तरम् । अहिंसादीनां यमानां योगाङ्गत्वं पुरुषार्थत्वं वा । न तु भोजनादिकमर्थित्वम् । तथा विधानाभावात् । स्नातेन भोक्तव्यम्, पञ्च महायज्ञान् कृत्वा भोक्तव्यम्, भगवते निवेदितं भोक्तव्यम्, इत्येवमादीनामेव नियमानां तदङ्गत्वात् ।।

उक्तमेव द्रढयन्नाह—

२५३. असति चाभावात् ।। ९ ।।

शुचिभोजनानङ्गभूते यमेऽसत्यपि अङ्गभूतनियमाभावस्याभावात्, अङ्गभूतनियमसत्त्वादित्यर्थः । विद्यत इत्यनुषक्तेन अन्वयः । यद्वा अङ्गभूतनियमे असत्येव शुचिभोजनजन्यस्य अभ्युदयस्य अभावात् । न तु अनङ्गभूते यमे असतीत्यर्थः । असति च भावादिति पाठः किमस्तीत्यन्वेष्टव्यम् ।।

अथ धर्माधर्मरूपस्य कर्मणः संसारबन्धहेतुत्वं वक्ष्यन् कर्मणि पुरुषप्रवृत्तेर्हेतुं वदति—

२५४. सुखाद् रागः ॥ १० ॥

सुखं स्वयमभिलाषविषयः । येन सुखं जायते तस्मिन् सुखसाधने कर्मणि पुरुषस्य रागः इच्छा स्वयमभिलषितात् फलभूतात् सुखात् जायते ॥

२५५. तन्मयत्वाच्च ॥ ११ ॥

तन्मयत्वं रागप्रचुरत्वम् । तस्माच्च रागो भवति । न परमिह जन्मनि क्रिया-विशेषजन्यं सुखं ज्ञात्वा तस्यां क्रियायां पुरुषो रज्यति । किन्तु प्राक्तनानन्तजन्म-परम्परानुभवजनितसंस्कारद्वारा रागप्रचुरत्वाच्च तस्मिन् तस्मिन् कर्मणि रागो जायत इत्यर्थः । अत एव हि जातमात्रस्य शिशोः स्तन्यपाने प्रवृत्तिः । आहुश्च "वीत रागजन्मादर्शनात्" इति ॥

२५६. अदृष्टाच्च ॥ १२ ॥

पुण्यापुण्यरूपात् अदृष्टाच्च कर्मणि रागो जायते । विचित्रफलकारणं हि अदृष्टम् । तत् कदाचित् अनभ्यस्तपूर्वेऽपि कर्मणि रागं जनयेत् ॥

२५७. जातिविशेषाच्च ॥ १३ ॥

जातिर्जन्म । तद्विशेषाच्च केषाञ्चित् केषुचित् कर्मसु रागो जायते । यथा केषाञ्चित् मधुरभक्षणे । केषाञ्चिल्लवणभक्षणे । यथा च केषाञ्चित् परिवादे । अन्येषां मिथ्यास्तुतौ, इतरेषां मौने, इति । इत्थं चतुर्भिः सूत्रैः रागकारणान्युक्तानि । तत्र सुखादित्यस्य स्थाने दुःखादिति निवेश्य द्वेषकारणप्रतिपादकतयाऽपि इमानि सूत्राणि योजनीयानि ॥

एवं हेतुमुक्त्वा तद्धेतुका पुरुषस्य कर्मसु प्रवृत्तिरित्याह—

२५८. इच्छाद्वेषपूर्विका धर्माधर्मयोः प्रवृत्तिः ॥ १४ ॥

रागशब्दार्थविशदीकरणायात्र इच्छाशब्देन तदुक्तिः । इच्छाद्वेषौ पूर्वौ कारणे यस्याः सा । धर्मे पुरुषस्य प्रवृत्तिः अधर्मे च । प्रवृत्तिः आचरणम् । स्वर्गपश्वादि-कामस्य तत्साधने यज्ञकर्मणि रागात् प्रवृत्तिः । शत्रुद्वेषात् तद्वधकर्मणि रागः । तेन च तत्र प्रवृत्तिः । पापे द्वेषात् नित्यकर्मणि रागः । सन्ध्यावन्दनादिनित्यकर्मपरित्यागे हि पापं भवेत् । तेन तदनुष्ठानम् । तात्कालिकसुखाभासे रागात् सुरापानादौ प्रवृत्तिः । तात्कालिकदुःखे द्वेषात् अवश्यकर्तव्यकर्मवर्जनम् । एवमिच्छाद्वेषाभ्यां धर्मे अधर्मे च पुरुषस्य प्रवृत्तिः ॥

एवं धर्माधर्मरूपं कर्म इच्छाद्वेषहेतुकमित्युक्तम् । अथाद्य एवंरूपकर्महेतुकं जननमरणप्रबन्धरूपः संसार इत्याह—

२५९. तत् संयोगो विभागः ॥ १५ ॥

तदित्यव्ययम् पञ्चम्यन्तार्थकम् । तस्मात् धर्माधर्मात्मककर्मरूपात् हेतोः संयोगः जीवात्मनः देहसम्बन्धः । जन्मतत्प्रयुक्तसुखदुःखानुभवश्चेति भावः । विभागः देहवियोगः । मरणमिति यावत् । पुनः संयोगः विभागः । पुनरपि संयोगः विभाग इति परम्पराऽनुवर्ततेति ज्ञापनाय चकाराप्रयोगः ।

एवं कर्मकृतः संसार इत्युक्ते तस्मान्मुक्तिः कथमिति जिज्ञासा स्वरसतो जायते । तत्र पूर्वमेवेदमुक्तमित्याह——

२६०. आत्मकर्मसु मोक्षो व्याख्यातः ॥ १६ ॥

आत्मकर्मसु "कायकर्मणा आत्मकर्म व्याख्यातम्" इत्यादिषु पञ्चमाध्याय-द्वितीयाह्निकसूत्रेषु त्रिषु मोक्षः व्याख्यातः कथं भवतीति निरूपितः । अत इह पुनर्नोच्यत इति भावः ॥

— :०: —

इति वैशेषिकसूत्रवृत्तौ सुगमायां

षष्ठाध्याये द्वितीयमाह्निकम् ॥

वैदिक अर्थतन्त्र : उत्पादन तथा उसके अंग

डा० राम नरेश त्रिपाठी*

भारतीय अर्थतन्त्र की अपनी एक निश्चित अवधारणा रही है क्योंकि भारतीय समाज व्यवस्था में 'अर्थ' को व्यवस्था का मूलभूत तत्त्व माना गया है। वन्य मानव को विकसित सभ्यता से आर्यों ने जिस सुचारु ढंग से सजाया है, वह ऐतिहासिक पृष्ठों में आज भी अंकित है। वेदों का हमारे भारतीय जीवन में अपना एक पृथक् अस्तित्व रहा है। यही कारण है कि लोग वेदों की उत्पत्ति स्वयं सृष्टिकर्ता ब्रह्मा के द्वारा मानकर उनकी पूजा करते हैं। परन्तु वास्तव में यह पूजा मात्र की वस्तु नहीं है। इनमें भारतीय समाज का जीता जागता चित्रण है, जिसे कभी भी भुलाया नहीं जा सकता। तत्कालीन आर्थिक जीवन के हर पहलू हमें इन वेदों में देखने को मिलते हैं। चाहे कृषि का उत्पादन रहा हो, अथवा अन्य वस्तुओं का। उसे बांट कर खाने, अभाव में एक दूसरे से विनिमय करने की परम्पराएं विद्यमान थीं। वस्तु का मूल्य भले ही आज की तरह रुपये में न निर्धारित होता रहा हो, परन्तु प्रत्येक वस्तु का किसी दूसरी वस्तु से मूल्य निर्धारित किया जाता रहा है। वर्तमान आर्थिक दृष्टिकोण से यदि हम यह कहें कि उत्पादन, उपभोग, वितरण एवं विनिमय, के आधार पर मूल्य निर्धारण की प्रक्रिया वैदिक समाज में विद्यमान थी तो किसी पाश्चात्य अर्थशात्री अथवा उनके अनुयायियों के लिये खेद की बात नहीं है।

वैदिक समाज में कृषि के माध्यम से उत्पन्न पदार्थों को अन्न की संज्ञा दी गयी और चूंकि वे इस अन्न के उत्पादन में अपना श्रम, पूंजी, साहस, उद्यम आदि सब कुछ लगाते थे, इसलिये वे उसका सम्मान ही नहीं, अपितु पूजा करते थे। श्रम से उत्पादित वस्तु के मूल्य को आंकने की उनमें क्षमता थी, वे उसके मूल्य को समझते थे। यही कारण है कि वैदिक समाज में अन्न, जल, पृथ्वी तथा श्रम को अधिक महत्व दिया गया था। नाना प्रकार की फसलों को तैयार करने, उन्हें काटने का विवरण हमें वैदिक साहित्य में मिलता है। यजुर्वेद संहिता के इस एक मन्त्र से तत्कालीन कृषि व्यवस्था का स्वरूप पर्याप्त स्पष्ट हो जाता है।

---

*अहियापुर, इलाहाबाद

युनक्त सीरा वियुगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्[1] ॥

"हल और फाल को मजबूत रस्सी से बांध कर जुआ बैल के कन्धे पर रख दो। अच्छी तरह से जोती हुई स्वच्छ धरती पर बीज बो दो। मंत्रों का उच्चारण करो। खूब अच्छी फसल उगाओ। पकी हुई फसल को काटने के लिये हंसिया हाथ में लेकर तैयार रहो।"

उत्पादन नाम की उत्पत्ति ही यदि कृषि कार्य से मानी जाय, तो कोई संदेहास्पद बात न होगी। क्योंकि आदि मानव ने सर्व प्रथम अन्न उत्पादन, खेती करने का ज्ञान प्राप्त किया था। उसके बाद उपभोग की बातें सामने आयी। इसी का परिणाम था कि वैदिक समाज में कृषि क्षेत्र में उत्पादन का ज्ञान पूर्ण रूपेण विकसित प्राय हो चुका था। उपर्युक्त संहिता के ही एक अन्य मंत्र में खेती से अधिक अन्न पैदा होने के विचार देखने को मिलते हैं।

शुनं सुफाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तनास्मे[2] ॥

"हमारे हलों में लगे तेज लोहे के फाल खेत को अच्छी तरह जोतें। किसान आनन्द पूर्वक अपने सुन्दर बैलों को लेकर खेत में आवें। हमारी पूजा से प्रसन्न होकर इन्द्र और वरुण हमारी धरती पर समुचित समय पर वर्षा और धूप करें। इस प्रकार हमें अच्छी फसलें प्राप्त हों।"

हमारे आधुनिक अर्थशास्त्री इस भ्रम में हैं कि वेदों में अथवा प्राचीन भारतीय अर्थशास्त्र में उत्पादन के सम्पूर्ण अंगों जैसे श्रम, पूंजी, उद्यम आदि पर विचार नहीं किया गया है। उपर्युक्त दो मंत्रों से ही पता चल जाता है कि उत्पादन में सहायक प्रायः सभी तत्त्वों पर विचार किया गया है। हल, लोहे का फाल, खेत को जोतना, इन्द्र एवं वरुण से वर्षा तथा धूप की याचना, उत्पादन के सहायक अंग हैं। आज का वैज्ञानिक भी यही मानता है कि कृषि उत्पादन के लिये खेत की जुताई, जल एवं धूप अति आवश्यक है। फिर तो यह एक विचारणीय प्रश्न है कि आज का अर्थशास्त्री, वैज्ञानिक भी जब उन्हीं तत्त्वों को स्वीकार करता है, तब प्राचीन भारतीय आर्थिक विचार वैज्ञानिक क्यों न माने जायें ?

---

१. यजुर्वेद १२.६८ (तु० की० अथर्ववेद ३.१७.२।)
२. यजुर्वेद १२.६९ (तु० की० अथर्ववेद ३.१७.५।)

हमारे देश में ऋषियों ने अन्न को प्रतिष्ठा दी और इसी से अधिक उत्पादन की प्रेरणा मिली। हमारे पूर्वजों ने सामाजिक एवं पारिवारिक जीवन को सुखी बनाने की कल्पना की, ताकि अधिकतम सामाजिक कल्याण होता रहे।

इस उत्पादन का आधार भूमि अर्थात् पृथ्वी थी, जिसे लोग जननी, जन्मभूमि तथा मातृभूमि आदि के रूप में मानते थे। अथर्ववेद में वर्णित पृथ्वी सूक्त में इसे 'कामदुघा' 'पयस्वती' 'सुरभिः' 'धेनु' आदि नामों से जाना गया है। तत्कालीन सुधी अध्येता यह भली भांति जानते थे कि मानव जीवन अन्न-वायु-जलमय है। प्रकृति भी इन्हीं तीनों पदार्थों (तत्त्वों), पर आधारित हैं। मनुष्य प्रकृति का एक प्राणिमात्र है। परन्तु उपर्युक्त तत्त्वों की सार्थकता भी तभी संभव थी, जब भूमि अथवा पृथ्वी हो। यही कारण है कि सृष्टि सृजन कर्त्ता ने सर्व प्रथम पृथ्वी जल, वायु तथा अन्न को निर्मित किया। वैदिक ऋषियों ने भी इन्हें ही प्राथमिकता दी। बाद में अग्नि एवं अन्तरिक्ष के महत्व को भी समझा जाने लगा।

यहाँ पर यह भली प्रकार से स्वीकार किया जा सकता है कि 'प्राणि' मात्र का उत्पादन भी प्रकृति के उत्पादन का एक अंग था। इस उत्पादन में सहायक जितने भी प्राकृतिक पदार्थ रहे हैं, उनको उपयोग में लाया गया है, फिर तो वस्तुओं का उत्पादन सिद्धान्ततः आर्थिक प्रगति का सूचक अथवा अर्थशास्त्र का विषय बन जाता है।

अथर्ववेद का पृथ्वी सूक्त इस बात का द्योतक है कि जिस पृथ्वी से हम अनेक वस्तुओं के उत्पादन की अपेक्षा रखते हैं, वह कितनी महान है। इसकी उपयोगिता निम्न मन्त्रों से स्पष्ट हो जायेगी।

असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः[३] ॥

"उत्तुङ्ग शिखरों, उन्नत प्रदेशों, सदा प्रवहमान निर्झरों, लम्बे चौड़े हरे भरे मैदानों और समतल भूभागों से शोभित परम विस्तृत यह धरती-जिसमें अगणित शक्ति सम्पन्न ओषधियां हैं—हमारे लिये सुगम हो, प्राप्त हो और इसकी आराधना-वन्दना से हम सबका कल्याण हो।"

---

३. अथर्ववेद १२-१-२।

यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु[४] ।।

'जिस मातृभूमि (पृथ्वी) के अंचल में समुद्र लहरें ले रहा है, जहाँ सरितायें कलगान करती हैं, सरोवर शोभित हैं, कृषि होती है और पर्याप्त अन्न उपजता है, जिस पर जड़ और जंगम विश्व शोभायमान है, जिसपर यह प्राणि जगत चलता-फिरता, सोता-बैठता है, वह मातृ भूमि हमें वहीं आवास प्रदान करे, जहां हम मीठे मीठे पेय प्राप्त कर सकें ।

उपर्युक्त दोनों मंत्रों से हमें एक तो पृथ्वी की भौगोलिक स्थिति का पता चलता है, दूसरे उन पदार्थों का ज्ञान होता है, जो उत्पादित हैं या फिर प्रकृति जन्य हैं । हरे भरे मैदान, सिंचाई के लिये नदियाँ, रत्नों की खान जहाँ मिलती है, उस समुद्र, तालाब, पेड़ पौधों से आच्छादित पृथ्वी की स्थिति के बारे में अवगत कराया गया है । वास्तव में ये सब जलवायु के साधनभूत तत्त्व हैं । इसके विद्यमान रहने पर ही अधिक अन्न उत्पादन की कल्पना की जा सकती है । इन साधनों के नष्ट होने पर उत्पादन में कमी का होना स्वाभाविक है । यही कारण है कि दूसरे मन्त्र में खेती होने और पर्याप्त अन्न उत्पन्न होने के विचार रखे गये हैं । जिस किसी देश में अथवा जिस काल में जलवायु के साधनभूत तत्त्वों की कमी हुई, वस्तुओं (अन्न) के उत्पादन में भी कमी होने लगती हैं । आज हमारा देश इन्हीं तत्त्वों की कमी का शिकार है । हरे भरे मैदान नहीं रहे, पहाड़ों तथा मैदानों के पेड़ काट डाले गये, तालाबों के खोदे जाने में कमी आयी, वृक्षारोपण बन्द हुआ । फलतः देश से नम जलवायु गायब हो गयी । पृथ्वी की उर्वराशक्ति क्षीण होने लगी, देश में अनाज की कमी और जनसंख्या में वृद्धि हुई, जो वर्तमान समाज के लिये एक समस्या बन कर रह गयी ।

वैदिक समाज में संभवतः इन तत्त्वों, साधनों की कमी न थी । सारा देश धन-धान्य से सम्पन्न था । अगले दो मंत्रों में हमें पृथ्वी की इस सम्पन्नता का पता चलता है ।

यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।
या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु[५] ।।

---

४. वही १२.१.३ ।
५. वही १२.१.४ ।

जहाँ पर चार दिशायें है, जहाँ अन्न की खूब खेती होती है, जो अगणित प्राणि जगत् को पालती-पोसती है, वह मातृभूमि हम सबको गो, और अन्न से परिपूरित करे'।

यहाँ पर कतिपय अर्थशास्त्री यह भ्रम करेंगे कि वैदिक काल में तो केवल ऋचाओं एवं मंत्रों के माध्यम से धन की याचना की गयी है। श्रम के द्वारा अन्न उत्पन्न करने धन प्राप्त करने का प्रयास नहीं किया गया, किन्तु ऐसा नहीं है।— वैदिक युग में उत्पादन के समस्त साधनभूत तत्त्वों का प्रयोग किया जाता रहा है। इस सूक्त में अगणित प्राणि जगत के पालन पोषण होने का उल्लेख किया गया है। चारों दिशाओं में अन्न की खूब खेती होती थी। इससे यह स्पष्ट है कि उत्पादन एवं जनसंख्या दोनों में सांमजस्य था। लोग इस बात के लिये प्रयत्नशील रहते थे कि दोनों में समान अनुपात बना रहे। गो और अन्न से परिपूरित करने की याचना इस का प्रत्यक्ष प्रमाण है। वैदिक आर्य अपने अ तीत को भूले नहीं थे, वे पूर्वजों द्वारा अपनाये गये पुरुषार्थ—अर्थात् धर्म, अर्थ काम और मोक्ष को—आगे बढ़ाने का प्रयास करते रहते थे।

यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथ्वी नो दधातु[१]॥

'जहाँ पर हमारे पूर्वजों ने पुरुषार्थ करके अपना जीवन सम्पन्न एवं सफल बनाया था, जहाँ देवों ने असुरों का संहार किया था, जहाँ गौओं, अश्वों और विहगों को आश्रय मिलता हैं, वह भू माता हमें ऐश्वर्य युक्त करे, तेजोमय बनावे"।

उस समय के लोग पृथ्वी को उत्पादन का प्रमुख साधन मानते थे। वास्तव में यह सत्य भी है। भूमि के अभाव में अन्य साधन व्यर्थ हो जाते हैं, चाहे वह श्रम हो अथवा पूंजी। अगले सूक्त में पृथ्वी को संसार का भरए-पोषण करने वाली बताया गया है। विचारकों का यह कथन जीविका मात्र के समस्त साधनों से सम्बद्ध है, जो हमें इस पृथ्वी से प्राप्त हो जाते हैं।

विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशिनी।

---

१. अथर्ववेद १२-१-५।

वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु[७] ॥

'जो सारे संसार का भरण-पोषण करती है, जो अपने वक्ष में धन को धारण करती है, जो सारे संसार के लोगों को आश्रय देती है, सबको निवास देती है, जो वैश्वानर को अपने अन्तस्तल में छिपाये रहती है, जिस धेनुरूपी धरती के लिये इन्द्र वृषभ रूप है, वह भू देवी हमें पूर्ण वैभव प्रदान करे'।

हमारा राष्ट्र तभी समृद्धिशाली होगा, जबकि अधिकतम उत्पादन संभव हो। अधिकतम उत्पादन तभी संभव होगा जबकि समस्त साधन उपलब्ध हों। राष्ट्र को आगे बढ़ाने, समाज को अधिकतम कल्याण की दिशा देने की बात कोई नयी नहीं है। उस युग में भी एक अच्छे शासन एवं राष्ट्र के बारे में चिन्तन किया जाता रहा है।

यार्णवेऽधि सलिलमग्र आसीत् यां मायाभिरन्वचरन् मनीषिणः।
यस्या हृदयं परमे व्योमन् सत्येनावृतममृतं पृथिव्याः।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे[८] ॥

'पहिले जिसका आसन जलधि में था और जिस पर माया से मनीषियों का आधिपत्य एवं शासन था, जिसका पवित्र हृदय सुदूर व्योम में निवास करता है, जिसका घर सत्य से घिरा और सत्य से ही भरा हुआ और अमृत है, वह भूमि हमें दीप्ति दे, बल दे, शक्ति और सहारा दे और उसकी कृपा से हमारा राष्ट्र शक्तिशाली हो, तेजोमय हो।

इस मंत्र में शासित राष्ट्र होने का उल्लेख मिलता है। तत्कालीन समाज में लोग उन समस्त साधनों की खोज में लगे थे, जिनसे वे राष्ट्र का कल्याण होना समझते थे। इसी प्रकार एक अन्य सूक्त में अगणित 'पोषक तत्त्व' का उल्लेख किया गया है। इन पोषक तत्वों का उत्पादन क्षेत्र वही पृथ्वी है। आज भी ये तत्त्व मुख्यतः पृथ्वी में पाये जाते हैं। वैज्ञानिक प्रगति के साथ-साथ भले ही कृत्रिम साधनों, वस्तुओं एवं तत्वों का निर्माण किया जाने लगा हो, जो उत्पादन में सहायक हैं, किन्तु उसका मूल स्वरूप प्रकृति से ही जुड़ा हुआ है।

---

७. वही १२.१.६।

८. अथर्ववेद १२.१.८।

यत्ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जंस्तन्वः संबभूबुः ।
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रोऽहं पृथिव्याः ।
पर्जन्यः पिता स उ नः पिपर्तु[9] ॥

'जो तेरा मध्य भाग है, जो तेरे नाभि देश हैं, जो अगणित पोषक तत्त्व तुझसे उत्पन्न होते हैं, वहीं उन्हीं के बीच तू हमें रख । तू हमें अपावन से पावन कर दे और हमारे हृदय में आनन्द भर दे । हम इस धरती के बेटे हैं, वह हम सब की माता है । पर्जन्य (बादल) हमारा पिता है । वह हमें प्राण दे, आश्रय दे, रक्षा करे ।'

इस सूक्त में उत्पादन के एक अन्य साधन 'पर्जन्य' का उल्लेख किया गया है । क्योंकि भूमि केवल बीज को धारण कर सकती है । उसके उगाने के लिये जल की आवश्यकता होती है, जो हमें बादलों से मिल सकता है । बादल को पिता का सम्मान दिया गया है, पृथ्वी को माता का । वास्तव में जिस प्रकार से पिता और माता सन्तान की उत्पत्ति करते हैं, उसी प्रकार बादल + पृथ्वी = अन्न अथवा प्रकृति जन्य वस्तुओं को उत्पन्न करते हैं । यही कारण है कि उपर्युक्त दोनों साधनों को वेदों में महत्वपूर्ण स्थान दिया गया है ।

उपर्युक्त दोनों साधनों के अतिरिक्त धूप अथवा सूर्य को जिसे आज भी वैज्ञानिक अथवा अर्थशास्त्री उत्पादन के लिये उपयोगी मानते हैं, वैदिक समाज में महत्वपूर्ण स्थान दिया गया था । समस्त प्राणियों का आधार यदि पृथ्वी एवं जल है, तो सूर्य का उसके पोषण में कम स्थान नहीं है ।

त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।
तवेमे पृथिवि पंच मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्यः उद्यन्त सूर्यो रश्मिभिरातनोति[10] ॥

'सारे प्राणी तुझसे ही उत्पन्न हुये हैं और वे तुझ पर आनन्द विहार करते हैं । जितने भी दो पांव वाले अथवा चार पांव वाले प्राणी हैं, जितने भी जीव हैं, सबका पालन हार केवल तू ही है । हे भू देवी ! ये जितने भी मानव हैं, सब तेरे

९. अथर्ववेद १२-१-१२ ।
१०. वही १२.१.५ ।

जाये हैं, तेरी ही सन्तानें हैं और इनके लिये ही उदित होकर सूर्य अपनी रश्मियों से अमृत का प्रसार करता है।'

यहाँ पर यह भी बता देना उचित होगा कि पाश्चात्य अर्थशास्त्री भूमि की परिभाषा में प्रकृति की अन्य वस्तुयें नदी, तालाब, पहाड़ आदि को भी जोड़ते हैं। भारतीय अर्थशास्त्री भी इस परिभाषा से अलग नहीं रहा। भारतीय अर्थशास्त्री तो प्रारम्भ से यह स्वीकार करता रहा है कि उपर्युक्त सभी वस्तुएँ भूमि के अन्तर्गत आती हैं।

शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता।
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः[११]'।

'यह भूमि ही शिला है, प्रस्तर है, अपार गिरि शैल है। यह भूमि ही धूल मिट्टी है। सभी रूपों में यह भूमि ही परिणत है। यह भी धर्म के आधार पर टिकी हुई है। जिसके वक्षस्थल में स्वर्ण की मनोहर खान है, उस पृथ्वी देवी को हम आदर के साथ प्रणाम करते हैं[२]।'

इस भूमि एवं प्रकृतिजन्य वस्तुओं का अधिकतम उपयोग उत्पादन के लिये ही किया जाता रहा है। 'अधिक अन्न उपजाओ' का नारा हमारे वेदों का ही दिया हुआ नारा है। यह कोई नया नहीं। तैत्तिरीय उपनिषद् में 'अन्नं 'बहुकुर्वीत' का नारा दिया गया है। खेद है कि हम इस नारे को छोड़ चुके हैं। हमें उत्पादन के लिये इससे प्रेरणा लेनी चाहिए।

"अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः।
पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता।
तदेतदन्नमन्ने प्रतिष्ठितम्। य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति।
अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या[१२]।

"अधिक अन्न उपजाओ। इसके लिये कृतसंकल्प बनो। अन्न ही पृथिवी है। आकाश का भी आधार अन्न ही है। पृथिवी का आधार आकाश है और आकाश का आधार पृथिवी है। इस प्रकार अन्न अन्न में प्रतिष्ठित है, एक दूसरे पर आधारित हैं। जो इस रहस्य को जानता हैं, वह असली सत्य से परिचित है। वह अन्न का

११: अथर्ववेद १२.१.२६।

१२: तैत्तरीय उपनिषद्। भृगुवल्ली अनुवाक ९।

आनन्द प्राप्त करता है। वह स्वजनों-परिजनों एवं पशुधन से भरा पूरा रहता है। वह यशस्वी, प्रसिद्ध, महान होता है।''

इस आदेश से हमें 'श्रम' में तत्पर रहने की प्रेरणा मिलती है। साथ ही आकाश पृथिवी एवं अन्न में एक सामंजस्य स्थापित करने का निर्देश भी मिलता है। श्रम उत्पादन का सहायक अंग है। भूमि, जल, धूप तथा जलवायु आदि तत्त्वों के होने पर भी यदि 'श्रम' न किया गया तो उत्पादन संभव नहीं है। आज भी अर्थशास्त्री श्रम को अधिक महत्त्व दे रहे हैं। अन्तर केवल इतना हो सकता है कि आज के श्रम की एक निर्धारित दिशा है और उस समय किसी निर्धारण को लक्ष्य न मानकर कर्तव्य समझ कर कार्य की पूर्ति तक लोग श्रम करते थे।

—०—

REVIEWS

Charles S. J. White, *The Caurāsī Pada of Śrī Hita harivaṃśa* (Asian studies at Hawaii, No. 16), The University press of Hawaii, 1977.

This book contains an introduction covering 52 pages, an English translation of the Padas with notes to the translation covering together 66 pages and the Braj Bhasha text of the Caurasī Pada in Deva Nagari covering 81 pages. The text of the Padas is in Litho type and in very good hand writing. The editor has noted variant readings also. The translation has been well done and adequately represents the text. In the introduction, Mr. White gives the background of the Bhakti cult tracing it back to the Upaniṣads.

The Rādhā Vallabha Sampradāya is one of the aspects of the Bhakti movement where the representation is the love between Kṛṣṇa and Rādhā like man and woman, Kṛṣṇa representing the supreme soul and Rādhā an individual soul. The description of human sexual love as that of the supreme and an individual soul is a matter of great curiosity to the westerner. Mr. White came to India and studied the text at Agra and other places and visited Mathurā and Brindaban which found place in the description.

Mr. White's study is a welcome addition to the Bhakti literature and we congratulate him for this nice production.

—B. R. Saxena

Dr. Bisvanatha Bhattacharya, *Aśvaghoṣa : A critical study*, Viswabharati, Santiniketan, 1976.

This is the latest authentic study of Aśvaghoṣa, the great Buddhist poet of classical literature. The author takes up a general study of Aśvaghoṣa's life, date and works. This is followed by a critical and datailed study of the four authentic Kāvyas of Aśvaghoṣa, namely (1) Buddha-carita, (2) Saundara-Nanda, (3) Śāriputra-prakaraṇa, and (4) Rāṣṭrapālanāṭaka. There are many other books which have not been considered authentic by Dr. Bhattacharya. Next the author takes up Aśvaghoṣa's language and style and deals with the merits and blemishes found in Aṣvaghoṣa's works with a critical point of view. He also deals with Aśvaghoṣa's influence on the posterity and here he compares Mātṛceṭa, Kumāralāta, Divyāvadānakāra, Bhāsa and Kālidāsa. He rightly treats Kālidāsa as posterior to Aśvaghoṣa. There has been a considerable controversy over the date of Kālidāsa and some scholars adhering to the view that Kālidāsa flourished in the first century B. C. have put Aśvaghoṣa posterior to Kālidāsa. I believed that the controversy would cease after the observation of Dr. Keith in his 'History of Sanskrit Literature'. I wish that while discussing the date of Aśvaghoṣa, Dr. Bhattacharya could refer to this controversy and examine it in detail.

The study is very detailed and in the critical examination of merits and defects in style and language

Dr. Bhattacharya has given with illustrations, the Alaṅkāras found in Aśvaghoṣa's works. This has made the book very useful to the students and teachers of Sanskrit poetry.

Aśvaghoṣa does not find adequate place in the study of Sanskrit in our Universities. I suggest that instead of restricting the courses to classical authors posterior to Aśvaghoṣa, the Universities should have in their prescribed course, the development of Sanskrit poetry from Vālmīki and Aśvaghoṣa onwards.

We congratulate Dr. Bhattacharya on the production of this very valuable work and we hope that this will prove popular.

—B. R. Saxena

Journal
of the
Ganganatha Jha
Kendriya Sanskrit Vidyapeetha,
Allahabad

A note to the contributors

The Journal of the Ganganatha Jha Kendriya Sanskrit Vidyapeetha is a quarterly research Journal of Indology. Articles on all branchas of Indology are invited from the scholars for publication in the journal.

The articles should normally be written in English. However those written in Sanskrit or Hindi may also be accepted. The journal also publishes small, hithertoo unknown Sanskrit works or those edited afresh with the help of new manuscripts material. The articles sent in for publication should be typed iu double space with sufficient margin on the left. Footnotes should be numbered in consecutive order. All Sanskrit and non-English words should be underlined. In Bibliographical references the titles of papers and books should be underlined and the place as well as the year of the publication in respect of books should be mentioned at its first occurrence.

The journal follows the international system of transliteration of Sanskrit words.

Each contributor is given 25 offprints of his paper free of cost along with a copy of the issue of the Journal containing his paper. The authors are requested to give their full postal address and to supply a short *bio data* for favour of publication in the Journal.

OUR PUBLICATIONS

Journals :

1—Quarterly Journal of the G. N. Jha K. S. Vidyapeetha Vol. I to XXIX 50.00

Special Volumes

(i) Umesh Mishra Comm. Volume, 115.00
(ii) Pt. K. C. Chattopadhyaya Felicitation Volume 55.00
(iii) G. N. Jha Centenary Volume 25.00
(iv) Autobiographical Notes of Mm. Dr. Sir G.N. Jha 25.00
(v) Dr. A. N. Jha Commemoration Volume
(vi) Mm. Dr. Gopinath Kaviraj Commemoration Volume
(vii) Journal of the G. N Jha K. S. Vidyapeetha Vol. XXXIII (Rs. 10.00 each) 40.00

Books

1—Annual Bibliography of Indology, 1969 30 00
2—Annual Bibliography of Indology, 1970-71
3—Descriptive Catalogue of Sanskrit Mss. Vol. I—III 185.00
4—Sanskrit Documents in the National Archives of India Edited by S.N. Sen & Mm. Umesh Mishra 15.00
5—Modern Assamese Literature by Dr. Neog 6.00
6—Jānarāja Campū with Lakṣmīguṇamaṇimālā by Kṛṣṇadatta. 14.00
7—Bāpū (Sanskrit) Edited by Dr. B.R. Saxena 10.00
8—Kāvyaprakāśa with three commentaries-Bālacittānuranjanī. Sārabodhini and Darpaṇa. 60.00
9—Mimamsa Jurisprudence : The Source of Hindu Law by Sri A S. Nataraja Aiyer 4.00
10—Manusmṛti with Manubhāṣya of Medhātithi, Edited by Mm G N. Jha. 125.00
11—Prātimokṣasūtra of Mahāsamghikas Edited by Dr. W. Pachowa and Ramakant Mishra. 5.00
12—Mahākālasaṁhitā (Kāmakalā haṇḍa) 30.00
13—Mahākālasaṁhitā (Guhyakāli Khaṇḍa, Pt. I and II). 130.00
14—Vṛtti Vārtika of Appaya Dīkṣit, Critical Edition.
15—Mīmāṁsārasapalvalam · Critical Edition
16—Indological Studies by Dr B. C. Law. 21.00
17—Jātaka Mālā-ek adhyayana.
18—Gautamīya Sūtra Prakāśa
19—Descriptive Catalogue of Vidyapeetha Publications.
20—Jahāngīra Virudāvalī
21—SiddhāntalakṣaṇatatvālokaVyākhyā by Krishnamadhava Jha
22—Vaiśeṣika Vṛtti Sugamā by D. T. Tatachari.

OUR FORTHCOMING PUBLICATIONS

1. Mahākālasaṁhitā; Guhyakālīkhaṇḍa. Pt. III
2. Descriptive Catalogue of Sanskrit Mss., Vol. IV
3. The System of Kṛt Accentuation in Pāṇini and the Veda
4. Chakra-Kaumudī of Badrinath : critical edition and simple Hindi translation.
5. Vāṇī Vilasitam. (Some modern Sanskrit poems)